Shri Raghunatha Temple MSS. Library,
JAMMU

No. ५४३० घ

Title सम्प्रदाय प्रदीपिका

Author +

Extent 296 Age +

Subject धर्मशास्त्र संपूर्णम्

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible]

३८ ३८ प्रानुपलेकादशी

३८ ३८ हामनवमी

३८ २८ नृसिंहचतुर्दशी

[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

१२८

धर्मशास्त्र निर्णयग्रंथः
संप्रदायप्रदीपिका प० २१६

नं. [illegible]26-45
संप्रदाय प्रदीपिका
धर्मशास्त्र निर्णयग्रन्थः

5430

226 पत्राणि

F.=217
Complete

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ५४३० — घ

सम्प्रदाय प्रदीपिका (संपूर्णम्)
धर्मशास्त्र निर्णयग्रन्थः
~~पत्राणि~~ २१८ (सम्पूर्णम

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

श्री रघुवीर पुस्तकालय * मंदिर श्री रघुनाथ जी *
ग्रं. सं.

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प्र दी
१

ॐ तत्सत् स्वस्ति श्री विघ्नहर्त्रे नमः ॐ श्रीगु
रवे नमः ॐ श्रीगणेशाय विघ्नेशाय भवाद्भु
तकेशवे नमो निर्विघ्नमारब्धकार्यनिर्वाह
हेतवे गुरून्नत्वा विघ्नेशं तदुपदेशक्रमाग
तम् आनन्दः कुरुते धर्मसम्प्रदायप्रदीपि
काम् अन्यथात्वमसन्नावा तमसा येषु भास
ते तान्धर्मान्दीपयत्येषा तन्नतो भाति दीपि
का उद्यतायां दीपिकायां गत विप्रतिपत
यः यथेष्टं स्मरति मार्गेषु शिष्टाः साधुचर
न्वमी जयति श्री महासिंहो भूपालो लो
कविश्रुतः प्रमाता सर्वविद्यानां ज्ञाता बाधा
तायनश्रियाम् यथा श्रियाः श्रियां तस्मोः
पियामेवाभिलाषुकः कालेस्मिन्नपि लो
कानां बाधायो देशिनिर्भयः धर्मध्वनिप्रव

© Dharmartha Trust J&K. Digitized by eGangotri

रतां सम्प्रदायप्रकाशनात् सतां पुस्तकमं
भारभारमोदः कृतो मया तत्रादौ मंगलं
श्रेष्ठमभीष्टप्रतिपत्तये श्रीमहानवमीसंप्र
दायपत्रप्रकाश्यते इह हि मार्कण्डेयः
शरत्काले महापूजा क्रियते या च वार्षिकी
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः
इत्यादिना श्रीदुर्गामहापूजायाः सिद्धिदा
याः शुद्धकालमाश्विनशुक्लप्रतिपदादिन
वम्यांतं चैत्रेपि तथैवोपदिश्य चतुर्वर्गफल
प्रदत्वं प्रोक्तवान् श्रीदुर्गामहापूजायाः स
र्वार्थसिद्धिदायाः शुद्धमाश्विनं चैत्रं वा शुक्ल
प्रतिपदादिनवम्यंतं कालमुपदिष्टवान्
ब्रह्मपुराणादावपि तथैव प्रतिवर्षं समस्त
विघ्नशमनाय चतुर्वर्गप्राप्तये चाष्टम्युपवा
सादिपूर्वं नवमीबलिदानपर्यन्तं सर्वेषामे

© Dharmartha Trust J&K. Digitized by eGangotri

मं
प्र दी
२

बवर्णाश्रमाणांयथाविभवंश्रवणपकर्ते
व्यतयामुनयश्चादिशन्ति तत्रत्वाधुनिका :
केचनाहष्टस्तयोस्पष्टशिष्टाचाराःपूर्वा
परवेधरहितायामष्टम्यार्थेनतायांनवम्या :
मास्येवाधिकेनवाह्नैर्विशल्पामष्टमीत्य
क्त्वापूर्वस्यांनवम्यामुपोष्यपरस्यांसूर्योदय
व्यापिन्यांदशमीविहायांबलिदानेनक
र्मरागोस्यानिष्टफलत्वाद्भयलोकविरुद्ध
मेवकृतवन्तः तथाचमनुः श्रुतिस्मृत्युदि
तंकर्मद्ध्यनुतिष्ठन्मानवः इहकीर्तिमवा
प्नोतिप्रेत्यचानुत्तमांगतिम् याज्ञवल्क्यः
विहितस्याननुष्ठानान्निन्दितस्यनिषेवणात्
अनिग्रहाच्चेन्द्रियाणांनरःपतनमृच्छति
व्यासः विहिताकरणंयच्चनिषिद्धाचरणं
तथा नानानरकदंशांसाहीनयोनौचजन्मदं

2

© Dharmartha Trust J&K. Digitized by eGangotri

एवमेव बृहद्यमातातपः अदृष्ट्वाधर्मशास्त्रंयः
प्रायश्चित्तंव्रतंवदेत् प्रायश्चित्तीभवेत्स तस्
मात्पापंपार्षदंव्रजेत् पर्षत् व्रतोपदेष्टा नदि
क्रमेतावद्वेते पृष्टव्याः किमिदमष्टमीप्राधा
न्येनव्रतमुतनवमीप्राधान्येन अथवोभयप्रा
धान्येनेति तत्रभयद्यष्टमीप्राधान्येनतत्सर्वं
स्मृतिवाक्यानुगमासावात्मसमारणमेव नचा
न्यत्रकस्यचिद्विप्रतिपत्तिः इदंत्ववशिष्यते
विशाल्यामष्टमीत्यस्मान्नवम्यामुपवास इति
यत्कौशलंनकिमवलम्बनंनहिदृष्टमित्यं
क्वचित् कस्यांचित्स्मृतौ विस्पष्टमपिवाक्यम
ष्टमीभेदनिर्णये यदिकोपिविविषपालिखि
ष्यत् तदन्योपस्तवयिष्यत् नचतन्नथा
प्यविष्यमाणस्यापिपृथगष्टमीभेदनिर्ण
यमस्तावेतुपलब्धेः अथनवमीप्राधान्येने
ति तत्किंनवमीप्राधान्यमुपोष्यतयाकिंवोप

© Dharmartha Trust J&K. Digitized by eGangotri

वामाङ्कबलिदानकालतया तत्रप्रथमस्त्वन
प्रतिवर्षमत्यभेदेष्वपिभवतो नवम्युपवासस्यै
वकर्तव्यतापत्तेः नेष्टंचैतच्छिष्टानाम् अष्टम्या
मुपोष्यनवम्यांबलिर्देय इतिसर्वप्रबन्धेषुद
र्शनात् तथाच हेमाद्रिसारे अश्वयुक्शुक्ल
पक्षेयाहष्टमीअष्टमीमूलसंयुतः सामहान
वमीप्रोक्तात्रैलोक्येपिसुदुर्लभेत्यादिनाष्टम्या
एवयोगविशेषवशान्महानवमीत्वमुक्त्वाष्ट
म्यामुपवास इत्याद्युक्तं नचनवमीकाच
नष्टम्युपोष्येति कालनिर्णयेच चैत्रस्य
शुक्लाष्टम्यांभवान्याउत्पत्तिस्तस्यांपरविद्धाया
मुपोष्यनवम्यांबलिरिति तथाचात्रैव श्रा
श्विनशुक्लपक्षप्रतिपदमारभ्यनवरात्रा·
रम्भ इतिप्रसङ्गः ।
अष्टम्यांचनवम्यांचजगन्मातरमम्बिकां
पूजयित्वाश्विनेमासिविशोकोजायतेनरः

3

इतिनवमीविद्धाष्टमीस्त्वेवप्रधानम्
इतरत्सर्वमङ्गमित्यतोऽष्टमीप्राधान्यमेवप्र
तिपादितम् कालमाधवीयेच पक्षद्वये
प्युक्तेरेवशिवशक्तिमहोत्सवे इत्यादिनैतदे
वसूचित् अनन्तभट्टीयेप्येवमेव निर्णया
श्रुतेच महाष्टमीनिर्णयप्रस्तावे पक्षेपदेष्
ष्यापवोपोष्यतयाप्राधान्यं नवम्यास्त्वप्रयो
गस्तदङ्गबलिदानीयतयैव नत्वपरःकोऽपि
पृथक्प्रकारः कृत्यकल्पतरौचाश्वयुजे दु
र्गामहोत्सवप्रस्तावे ब्रह्मपुराणेनिष्कृ
न्येपि तत्राष्टम्याभद्रकालीदक्षयज्ञविनाशि
नी प्रादुर्भूता महाघोरायोगिनीकोटिभिः
सह अतोऽर्थंपूजनीयासातस्मिन्नहनिमा
नवैः उपोषितैर्वस्त्रधूपैर्गन्धमाल्यादि
भिर्द्विज दीपैरन्नैस्तथाभक्ष्यैः फलैर्मूलै
स्तथोत्तमैः आमिषैर्विविधैःशाकैर्वक्ति

उपोषितैर्वस्त्रधूपैरित्यादिनायमेवाभिप्रायः नीलमतेच तत्राष्टम्यांभद्रकालीपूज
नीयायथाविधि ॥

२

© Dharmartha Trust J&K. Digitized by eGangotri

सं ब्राह्मणतर्पणैः बिल्वपत्रेण च तथा
प्र चन्दनेन घृतेन च पानकैर्विविधाकारैः
४ सौम्यैः शिल्पजनैस्तथा भ्रूशोभाभिर्नर्त
गीतैः रात्रिजागरणेन च दुर्गागृहे पुस्तका
नां पूजा कार्या तथा द्विज स्वकानां शिल्पभा
ण्डानां कार्या शिल्पजनेन च वाद्यभाण्डानि वा
द्यानि कवचानि तथैव च आयुधानि च सर्
वाणि राज्ञो दुर्गागृहे तथा स्नात्वा प्रभाते सं
5 पूज्य सर्वाण्युक्तानि कार्यपप भुक्त्वा तु शां
तिः कर्तव्या किंचिद् दृष्टे दिवाकरे नीराज
नाख्या माङ्गल्या शान्तिर्हि आचविचतरैः ज्योति
षां पालकाद्याश्च कल्पे प्राथर्वणे पुच प्रत
पंचं पूजनीया जनायेष्टु जीविनः इति इत्थं
सर्वेषु प्रबन्धेषु सर्वेष्वेव विशेषपत्रिसूत्नतया
ष्टमीमुपोष्य प्रातर्बलिदानमिति पर्यवसि
तं न तु नवमीमुपोष्य प्रातर्दशम्यामित्याग

© Dharmartha Trust J&K. Digitized by eGangotri

ष्यद्भीष्टं तत्रास्तिनवम्याःस्वातन्त्र्येणोपो
ष्यतयानप्रधान्यमितिसिद्धं अथबलिदा
नोपयुक्तकालतयानवम्याःप्राधान्यमिति
चेत् अस्त्वेतत् तत्राप्यष्टम्यापवोपोष्यत
याकालेविवेश्यः नतुतदङ्गस्यबलिदानी
यायानवम्याः तदुक्तं कालमाधवेन अत्या
ङ्गस्यैकभक्तस्यकालस्त्वङ्ग्यनुसारतइति मी
मांसकाश्च प्रधानसचिवान्यङ्गानिभवन्ती
ति अथचेत्यसिद्धस्फातिस्मरस्तुदितमुल्लङ्घ्य
स्वकपोलकल्पनयैवनवमीवृद्धिमाश्रित्या
ष्टम्यापिन्यामस्याबलिदानात्पूर्वकाली
नायांयस्याकस्याचितिथावुपवास इति
तदागरगडस्योपरिगरगडोयमितिन्यायः य
दष्टम्युपवासाङ्गःतामुपेक्ष्यनिजरुचिभिरे
वबलिदानीयायानवम्याःस्वातन्त्र्येणप्रा
धान्यंतत्रापिच उदितार्कादिनकालेश्या

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प्र
१

द्विजशाकाशावलम्बनेनवेतालषष्ठीगणे
शचतुर्दशीश्रीपंचम्यादियत्किंचनलौकिकं
दृष्टान्तीकृत्यसमाधानंइति एतावतापि
नायुष्मतामाशङ्कितव्यंततः समरागना
भिवागापजलमध्यपतितानांशुक्लरुन्मज
तांनिमज्जतांचाभीप्सितसिद्धिः तथाहि
स्मृतेः श्रुतिविरोधेनपरित्यागोयथाभवे
त्. तथैवलौकिकंवाक्यंस्मृतेर्बाधेपरित्य
ज्येत्. इतिचतुर्विंशतिमताद्यनुमतेः
लौकिकदृष्टान्तमत्यन्तस्मृतिप्रसिद्धेनप
थाप्रचरणीयम् श्रुतिचस्मृतीनांपन्थाः
युग्माग्नियुगभूतेत्यादिसामान्यतोयुग्मवा
क्यंपरमृत्वीविद्ध तथातिथीनांशुक्लतामादि
शति तथैववर्धमानस्मृतौदयाभूत्यतेति
थिः यदापदः स्वयंयाति तदास्यादापरा
ह्णिकीत्यादिबौधायनादिवाक्यानितुसा

© Dharmartha Trust J&K. Digitized by eGangotri

मान्यतस्तिथीनां द्वैहितयाभ्यामेवानुष्ठेय
तां विदधते तदित्थं स्मृतीनामन्योन्यविरोधः
परिहृत एव विषयविभागेन धर्मशास्त्राश
यत्तैः तथा च निर्णीयास्ते द्वितीयादिक
युग्मानां पूज्यतानियमादिषु एकोद्दिष्ट
वृद्ध्यादौ द्विक्रमादि चोदनेति व्रतश्राद्ध
विभागेन विज्ञातव्योऽव्यवस्थितानिति निगमो
क्तः व्रतेष्वेव वर्त्तेवाक्याभ्यां द्वितीयादिषु युग्म
तयैव याप्यास्तु तिथिषु व्रतं कार्यम् तथा
द्विभ्यां तु पूज्यास्त्वेकोद्दिष्टादिश्राद्धमिति युग्म
वाक्यद्विकामवाक्ययोर्व्यवस्थास्त्स्येति
अपरार्के व्रतोपवासस्नानादौ घटिकैका
पिया भवेत् उदये सा तिथिर्ग्राह्या विपरीता
तु पैतृकीति भविष्यत्पुराणम् मार्कण्डे
यश्च शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो
रविः कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमि

© Dharmartha Trust J&K. Digitized by eGangotri

सं
ग्र
६

तोरविरिति शुक्लपक्षशाद्वेनदेवकार्यमुच्यते
तस्मात्तायशाल्लस्य शुक्लपक्षे विधानात् कृष्ण
पक्षशाद्वेनतुपितृकार्यम् देवकार्यंचयदुद
यव्यापिन्यांतिथौविधीयते तत्रातिपद्वतिथि
वेधानतिक्रमेणग्राह्यमिति अस्तिचास्यान
वम्यादशमीवेधोनिषद्धः यदुक्तं अष्टम्यान
वमीविद्धाकर्तव्याफलकांक्षिभिः नकुर्यान्न
वमींतातदशम्याहिकदाचनेति सामान्यवा
क्यम् तथैव श्रावणीदुर्गानवमीदूर्वाचैव
हुताशनीपूर्वविद्धाप्रकर्तव्या शिवरात्रिर्ब
लेर्दिनमिति विशेषवचनंच एतदभि
प्रायेणैवानन्तभट्टो हे माद्रिहरिस्मुग्मादि
वाक्यप्रवृत्तेविषयतांखर्वदर्पोपरोधेनाहिं
सास्यात्पौर्वकालिकीति खर्वःसाम्यंदर्पःपूर्वा
हिंसात्ययः इतिखर्वादिवाक्यस्याद्वतिथिवि
षयतांप्रतिपाद्यपुनरुभयोरपिपक्षयोरपवादान्तार

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मणो पस्थय: कालस्तत्कालव्यापिनीति
थि तयाकर्माणि कुर्वीतह्रासवृद्धी नकार
णमिति अस्यार्थः कर्मकालव्यापिन्यां ति
थौ लभ्यमानायां ह्रासवृद्ध्योस्तिथीनां सर्वत
परत्वे प्रतिकारणत्वनिवारणाश्चेति अत्री
हापि प्रस्तुता भवतो नवमी अष्टम्युपवासोत्त
रकालं परिपूर्णैर्वस्तुकर्मणि बलिदाने लभ्य
मानात्तद्वृद्ध्यर्थमस्या हृद्धिशृङ्खणम् तदित्थं
सर्वप्रकारेहृद्यायां नवम्या उदयव्यापिन्याद
ष्टमी विहायाश्चत्यागात्सर्वस्यापवर्हणीया
नवम्या बलिदानीयत्वे प्राप्ते सातास्मिहुपव
विशाल्यायामष्टम्यामुपवासः इत्यात्मीय
पवशारो देवानां प्रियं प्रहरति तदलमाया
सेनेति अथो भयप्राधान्येनेति रटनीयः
पक्षः तर्हि सोपि विचार्यमाणः प्रसिद्धो भ
यद्वादशी व्रतवदसदभिमतमेव साधयती

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प्र
१०

त्यलमतिप्रसंगेन हृद्गतार्थेनेदमुक्तं भवति । तिथी-
नां निर्णयं वक्ष्ये प्रायश्चित्तमतः परम् । तथा शुद्ध-
धर्मः सर्वकर्माणि सिद्धिहेतुर्न जायते श्रौतस्मा-
र्त्तव्रतं दानं च यच्चान्यत्कर्म वैदिकं अनिर्णीता
सु तिथिषु न किंचित्फलति द्विजाः एषा चाष्ट-
मी वेधरहिता शुद्धा त्रिधा षष्टिघटिका अभ्यधि
काष्टिघटिका समा न्यूना वा षष्टिघटिकाभ्योधि-
का वा सापि पुनस्त्रिधा प्रत्येकं नवम्या न्यूनता
समताधिक्यवशेन एवं भेदाः ९ तथैव सप्त-
मीविद्धाया अष्टम्या नव भेदाः ९ तदेवमष्टा-
दशभेदभिन्ना नवमी तथा च संग्र-
हः शुद्धा त्रेधा तथा विद्धा भेदैर्न्यूनसम-
माधिकैः प्रत्येकं च पुनस्त्रेधा नवम्या न्यून-
समाधिकैः नवम्यन समाधिका द्व-
र्वां शुद्धाष्टमी तथा समाधिका
नवम्यूनाः

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वा पंचपराः पराः २ समापिकाष्टमीविद्धा
नवमी साम्यहूहितः पराश्चतर्षभेदेषु पूर्वान्य
स्मिन्स्तु पंचके: वेधंच पैठीनसिः पत्तद्वयेपि
तिथयः तिथिं पूर्वामथोत्तराम् त्रिभिर्मुहूर्तै
र्विध्यन्ति सामान्योयं विधिः स्मृतः अयं वेधस्तै
मुहूर्तिकः अर्धरात्रादर्वाज्योतिषे प्रसिद्ध इति
सामान्यग्रहणम् स्मृतेतु सूर्योदयास्तमय
विषयत्वेन विशेषः तथानन्तभट्टः स्कान्दे
प्रतिपत्प्रभृतिः सर्वाः उदयास्तमयाद्रवेः संप्र
र्णाइति विख्याता हरिवासरवर्जिताः हरिवा
सरवर्जितेति वेधश्रवानुसारेणाहरणेदयवि
द्धाया एकादश्यास्त्यागात् बृहन्नारदीये आ
दित्योदयवेलाया आरभ्य षष्टिनालिका याति
थिः सा तु शुद्धा स्यात्सर्ववेदेषुयं विधिः सूर्य
सिद्धान्तेच सर्वा एताश्च तिथयः उदयादुद
यं गताः शुद्ध इति विनिश्चेयाः षष्टिनाडि हि

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प्र
८

वैतिथिरिति षष्टिनाडिरित्युपलत्तणमात्रं
लत्तणं तु उदयाउदयमित्येव नो वा षष्टि
डिरुषा साम्यहानिवृद्धिषु कर्कमकरदिनाति
थ्योरव्याप्स्यति व्याप्तिदोषस्यात् तस्मात्षष्टि
नाडिरिति विद्धयोरेव सार्थकम् अनयैवद
शपाकलावेनापि विद्धा स्यादित्यादि परं विद्ध
मूर्ते वेधस्तु विशेषपरः सूर्योदयादारभ्य सूर्या
स्तपर्यन्तं शुद्धा दिवसस्यादावन्ते चान्यतिथि
युक्ता विद्धेत्यर्थः माधवेपि उदये सूर्ययाति
थ्या विध्यते त्रिमुहूर्तकैः सायं तत्र न यात हस्र
नया तन्न विद्यते वेधापि त्रिमुहूर्तैव न्यूना नो वेध
मर्हति तस्मात्सूर्योदयादारभ्य सूर्यास्तपर्यन्तः
कालो दिनमुच्यते यस्मिन्दिने सूर्ययाति थ्यासम
मीसंज्ञयाद्रीनाष्टमीसा शुद्धा यद्यते कदाचित्सम
म्या संयुक्ता भवति कदाचिन्नवम्या संयुज्यते नाग
ष्टमी विद्धेत्युच्यते तदनेन प्रकारेण ष्टयकरणगष्टा
दशभेदा निर्णीयन्ते।

8

© Dharmartha Trust J&K. Digitized by eGangotri

तत्राष्टमी यस्मिंदह्नि शुद्धा सती षष्टिघटिका
त्मोन्यूनानवम्यान्यूनसमाधिकतावशेन त्रि
धाभिन्ना तत्र शुद्धायामष्टम्यामुपोष्य नवम्यां
वलिरिति तथाच माधवः शुद्धायांनास्ति स
न्देहो दैवेपित्र्ये च कर्माणि उपवासस्यैकभक्तं
नक्तंच याचितंतथा दानंच षड्विधंचैव क्रमाद
शविधिं स्मरेदिति अत्रच नवम्याः समाधिका
भ्यां हि द्वौ भेदद्वये पूर्वविरणाया शंकासा उपक्र
मपवाष्टमी प्राधान्येन निरस्ता तथाचासांन्यास

ऊनोना	ऊनसमा	ऊनाधिका
सशे ८	सशे ८	सशे ९
अशे ६	अशे ६	अशे ६
नशे ४	नशे ३	नवशे २
दशे १	नदि ०	नदि १

यदात्वष्टम्याषष्टिघटिकासत्तयासम्मतायां

© Dharmartha Trust J&K. Digitized by eGangotri

सं प्र ८२

नवम्याः समाधिकतावशेन भेदद्वयं तथैवा
ष्टम्या यदा एकषष्टिघटिका षष्टिघटिकामन्नयापि
केन नवम्याः समाधिकभावेन तया भेदद्वयं चे
ति प्रकारचतुष्टये ऽष्टमी द्विधा तिथिः सशल्याप
रिवर्जनीया धर्मार्थकाममभीप्सुभिः मनुष्यैः
विद्धा न शल्यापि विवर्जनीया यथयत्रतोह्नि
ष्वैति यतः इत्यनन्तभट्टोक्तैकादशीविषयत्व
त्वाद्विशल्यामपि सर्वाष्टमीत्यस्का परविद्धाया
मुदयव्यापिन्यामुपवासः अत्र मतं चैतदपरार्क
कृता अतोपवासस्नानादौ घटिकैकेति प्रस्ता
वे देवकार्यं च यदुदयव्यापिन्यां विधीयते तत्र
तिथिविद्धा तिथि वेदः वत्सरान्तयोरिति पुत्रवा·
केसप्तमीविद्धासम्भवेपवाष्टमीस्तति

निषेधात् नवमीविद्धाया
स्तु ग्रह्यतेव ।

9

© Dharmartha Trust J&K. Digitized by eGangotri

तथाचविशेषसंग्रहे अष्टम्यांचनवम्यांच
जगन्मातरमम्बिकाम् पूजयित्वाश्विनेमासि
विशोकोजायतेनरः चकारद्वयमेककाल
द्योतनाय नवमीविद्धायामष्टम्यामित्यर्थः
तथाच हेमाद्रौभविष्येच अस्यैवश्लोकस्य
व्याख्यार्थे अष्टमीनवमीरूपदिनद्वययुग्म
पूजैवप्रधानमितिप्रकाशित माधवीयेपि
व्रतमात्रेष्टमीकृष्णापूर्वाशुक्लाष्टमीपरा ह्
वाष्टमीतुशुक्लापिपूर्वविद्धाविधीयते परा
परविद्धेत्यर्थः अनन्तभट्टस्तु एकादश्यष्ट
मीषष्ठीपरविद्धा पौर्णमासीचतुर्दशीत्यादि
तुर्दशीत्यत्र शुक्लाष्टमीपरेति नवमीयुक्तायाः
अष्टम्याःप्राशस्त्यमाह देवीपुराणे सन्त
र्जयन्तीहुङ्कारैः खड्गैर्मातपरापरान् नव
म्यांपूजितादेवीददात्यानन्दजंफलम् साप्र
रण्यासापिविद्याचसाधर्म्यासुखदायिनी त

© Dharmartha Trust J&K. Digitized by eGangotri

सं.
प्र.
१०

स्यांसंपूजनीयातच्चास्तुराज्ञःपुराणेमालिनीम
दिवाकैः स्फुटपवक्रमः अत्रनवम्यांबलि-
दानीयायाव्यवस्थानिर्णयामृते देवीपुराणं
सूर्योदयेपरंरिक्तापूर्णास्याद्दपरायदि ब
लिदानंप्रकुर्वीततत्रदेशः सुखावहः बलिदा
नेकृतेष्टम्यांपुत्रभंगोभवेन्नृपेति अस्यार्थः
यत्रसूर्योदयमात्रेणनवमीततः परंदशमीतत्र
दशमीविद्धायामपिनवम्यांवाक्यविशेषव
लाद्बलिर्देयः नपुनःपूर्वस्यामष्टमीविद्धायां
नवम्यामुदयादस्तमयंयावत्सर्वाह्नव्यापिन्यां
बलिदानस्यैवाष्टम्यांनिषेधात् तथाच

10

न्यासः

समसमा		समाधिका		अधिकसमा		अधिकाधिका	
स शे	३६	स शे	५	स शे	२६।	स शे	३ ६।
अ शे	१६।	अ शे	२	अ शे	१	अ शे	१ ६।
अ दि	०	अ दि	१	अ दि	१	अ दि	१
न दि	१	न दि	३	न दि	०	न दि	२

© Dharmartha Trust J&K. Digitized by eGangotri

यदात्वष्टमीः साप्यमापिकं वानवम्यांस्तुनसंगा
तस्मिन्मेरह्वयेसर्वोविशाल्यामष्टमीमुपोष्यशा
तरष्टमीविद्धायामपि नवम्यांवचनबलादेवब
लिः तथाच विशेषस्मृः यदासूर्योदयेनस्यान्न
वमीचपरेहनि तदाष्टमीप्रजुर्वीतसप्तमीसहि
तांनृपेति अस्यार्थः यदासूर्योदयमात्रेष्टमी
ततःपरंषष्टिघटिकाभ्योन्यूनतयाद्वितीयेह्नि
नवमीसूर्योदयंनस्पृशति तदानवम्यांबलि
दानकर्मकालालाभाद्वर्णोयुग्ममाणंप्रकारद्व
यंसप्तमीविद्धामुपोष्याष्टमीविद्धायांनवम्यां
बलिर्देयः किमुतविशाल्यापूर्णामष्टमीपूर्णे
मुपोष्यास्मिन्प्रकारद्वयेइतिकेमतिकेनसिद्ध
तथाच निर्णयामृतकृतापिअष्टमीनवमीवि
द्धायाउपोष्यात्रेबलिदानन्नवम्यापकाम्पस्
र्योदये पूर्वंतिकेतस्यवावारस्य पोषके अष्ट
म्यामुदितेसूर्येदिनान्तेनवमीभवेत् प्रभाते

© Dharmartha Trust J&K. Digitized by eGangotri

सं प्रं

बलिदानेनकियन्मात्रापिलभ्यते नवम्यांतत्र
संस्तृज्याद्दुर्गादुर्गतिनाशिनीति वाक्येप्रभाते
बलिदानेनेति पदद्वयंयदपिकंतेनैतदेवसू
चितम् तथाचार्थः बलिदानेनेति तृतीया
चतुर्थे यदाष्टमीविद्धाभूत्वानवमीद्वितीयदि
नेद्विप्रभाते बलिदानार्थंकियन्मात्रासं
स्यापिलभ्यते तदानवमीविद्धांस्तुल्यामप्यु
पोष्याष्टमींदशमीविद्धायामपिनवम्यांबलि
र्देयः यदातुद्वितीयेक्षिप्रभातेबलिदानाय
कियन्मात्रापिनवमीनलभ्यते तत्रव्यतिरेक
परिशिष्टार्थापत्त्यांपूर्वामष्टमीमुपोष्यपरस्यां
बलिदानमिति नैचेतदर्थयुक्तिकथनमपूर्वं
तयाशंकनीयं प्रमाणीकृताह्यर्थापत्तिः
स्मृतिनिबन्धकारैः तथाचानन्तभट्टीयेएका
दशीनिर्णये दशमीशेषसंयुक्तानोपोष्ये
कादशीतिथिः एकादश्यांपारात्रिशेषेद्वादशी

© Dharmartha Trust J&K. Digitized by eGangotri

चेन्नदृश्यते दृश्यते चेत्सैवोपोष्येत्यर्थादुक्तं
भवति एतद्वेदाशयेनैव कालनिर्णयसारे
नवरात्रारंभविवेके वृद्धौ समाप्तिरष्टम्यामि
त्याद्युक्तं युक्तमेव यदि नैवं प्रामाणिकपरिग
हीतं स्यात्तदा कथं श्रुतिसमकक्षमर्माणां कर्म
विपाकादीनां प्रवक्तॄणां कर्ताभट्टविशेषरत्नि
थिनिर्णयसारे यदा द्वितीये क्षिस्तोकापि नव
मीन दृश्यते तदाऽष्टमी विद्धापि महाष्टमी का
र्येत्यावतारशीकथाभिधेयमुक्त्वा यदा सूर्योद
येन स्यादित्याद्युदाहरिष्यत् तस्माद्वलिदानेवि
षयव्यवस्थाये नाष्टम्याएव भेदेषु सूर्योदये परं
विद्धेति यदा सूर्योदयेन स्यान्नवमी चेति वाक्य
द्वयं योजनीयं तथा च व्यासः श्रुतिस्मृतिपु
राणानां विरोधो यत्र दृश्यते तत्र श्रौतं प्रमाणं
स्यात्तयोर्द्वैधे स्मृतिर्वरेति तयोः स्मृतिपुराण
योः लोगातिः श्रुतिस्मृतिविरोधेतु श्रुतिः

शिष्टतानां विशिष्टा

© Dharmartha Trust J&K. Digitized by eGangotri

सं सैवैगरीयसीस्मृतिर्द्वयविरोधेतुगरीयसीम
प्र. नुस्मरेतिः बौधायनः यस्मिन्नंशोविरोधोस्ति
श्रयोति षोक्ता याम्योक्तयोः श्रोनिषोक्तंपरित्य
१४ ज्यधर्मशास्त्रंसमीचरेत्‌ स्मृतिद्वैधेतुविषया :
कल्पनीयाः पृथक्पृथक्‌ अत्रस्मृतिद्वैधंम
नुस्मृति व्यतिरिक्तानां तस्माद्यत्किंचनाचप
लपितंवावहूपकैः तद्रूपेत्तमेवविचक्षणैः
अस्मिन्नेवप्रकारेमहाजनाः शिवशक्तिमहो
त्सवाख्यंव्रतंपक्षद्वयेपिकुर्वन्ति तस्माडुगो
त्सवाद्भिन्नमेवपक्षद्वयेपिपरविद्धनिर्देशात्‌
तथामाधवः पक्षद्वयेपुनरेवशिवशक्ति
महोत्सवेतिनिर्णयामृतेच नवमीयुक्ताष्ट
म्या अर्धनारीश्वरव्रतपक्षाद्‌उमामहेश्वरपूजावि
षयेकृष्णाष्टम्यापिनवमीयुक्तैवग्राह्या अन्यत्रतुतेन
सामान्यतासप्तमीयुक्तैवेष्टाविरोधः तदुक्तं अष्ट
म्यानवमीविद्धानवम्याचाष्टमीतया अर्धनारीश्वर
माया उमामहेश्वरीतिथिः

12

© Dharmartha Trust J&K. Digitized by eGangotri

अष्टमीनवमीयोगे तु मामाहेश्वरपूजाभोजरा
जीये (प्युक्ता) यथा अष्टम्यामिज्यते रुद्रो नवम्यां शक्ति
रिज्यते द्वयोर्योगे तु संप्राप्ते पूजायां हि महत्फ
लम् अतस्त्वष्टम्यां नवमीयुक्तामेव कुस्माया
मष्टम्यां महेश्वरपूजा कार्येति तस्मादस्य व्रत
स्यष्टयङ्केनाष्टमीनवमीयुग्मे एवकृत्यत्वाद्दशि
मास्तान्तिहोदशम्यां पारणाविधि न तु दुर्गोत
सवस्य दुर्गोत्सवस्यात्र सर्वस्यां पूर्णायामष्टम्या
मुपोष्य प्रातरष्टमीलेशविद्धायां सर्वाहोरात्र
व्यापिन्यां नवम्यां बलिदानोत्सवपारणानीति
सिद्धम् तथा च व्यासः अथ सप्तमीविद्धाया
अष्टम्यार्थनतायां नवम्यापि केभेदत्रये सम
म्यामेव तयादष्टम्याहितीयाक्रिनवम्याबलिः
तथा चानन्तभट्टः एकादशीनलभ्येत सक
लाद्वादशीभवेदिति प्रस्तावे अविद्धानिषिद्धे
ध्वेनलभ्यन्ते दिनानि च मुहूर्तैः पंचभिर्विद्धा

© Dharmartha Trust J&K. Digitized by eGangotri

तदर्थविद्धान्यान्यानि

सं समोना अधिकोना ग्राह्यैवैकादशी यदि त
प्र स शे २ स शे १ द्वविद्धान्यव्यापिन्यानि
अ शे १ अ शे २ दिनान्युपवसेद्बुधः
१२ अदि ० अदि ० तथाच माधवोपि
द शे १ द शे ० परेह्निनास्तिचेत्सर्वावि

द्धाप्यास्तिन्यजनकमात् शिष्टवान् हेमाद्रि
सारेपि पितृकर्मव्यतिरिक्तव्रतोपवासादि
विषयं युग्मवाक्य स्वर्वादिवाक्यं तत्पितृवि
षयं कर्मणोयस्य यः काल इति ह्युभयोरप्य
पवादः इत्याद्वायमेवाशयः तथैव निर्णया
मृतेपि अहं भद्रां च भद्राह्नेनावयोरन्तरं क्वचि
त् सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिता ह्यहं
भद्रायां भद्रकालस्य समर्थे स्यादर्चनक्रिया
तस्माद्धै सप्तमी विद्धा कार्या दुर्गाष्टमी बुधैरिति
पूर्वविद्धावाक्यानां तद्विषयत्वं याष्टमी सप्तमी
विद्धा सती तिथित्रयवशाद्द्वितीयदिने नवमीं ते

13

इति तथाचन्यासः
इयंपूर्वैव प्रथयत
सप्तमीविद्धायामष्ट
म्यांसमन्तायामपि
कतायांच नवमी
न्युनत्वाद्देद्वयं न
आपिसप्तमीविद्धामेवाष्टमीमुपोष्यन्नव
म्यामष्टमीविद्धायांबलिदानादीनीति
प्रयुक्तनीत्याद्दुर्गोत्सवव्रतंपूर्वम् उमामहे
श्वरंतद्व्रतंपरमितिनव इति तथाच न्यासः

ऊनोना	ऊनसमा	ऊनाधिक
५९ सदि ०	सदि १	सदि २
५५ नघो ५	नघो ०	नघो १
रघो ८	नदि ०	नदि ०

इयमपि पूर्वैव प्रथस
प्तमीविद्धायाअष्टम्याः
षष्टिघटिकासत्तयास
मन्तायां अधिकतायांवा
नवम्याःसाम्याधिका
भावाद्यद्वेदचतत्कृतंतत्रसप्त

समोना	अधिकोना
सदि ३	सदि ३
अदि ०	अदि २
दघो ३	दघो १

© Dharmartha Trust J&K. Digitized by eGangotri

सं. प्र. ४८

मीवेधनिषेधात्स्वल्पस्यापिनवमीवेधस्यफ
लातिशयश्रवणात्तरमेवाष्टमीमुपोष्योद
यमात्रव्यापिन्यांनवम्यांबलिः तथाहि नि
र्णयामृते मदनतिथिनिर्णयसारे च सदृशे
नैव वचनोपपत्तिः यथासप्तमीसंयुक्तानस
तिसंभवे सर्वथा वर्ज्या पुत्रान्हन्ति पशून्हन्ति
राज्यं सराष्ट्रकम् हन्ति जातानजातांश्च स
प्तमीसहिताष्टमी तस्मात्सर्वप्रयत्नेन सप्तमी
वेधसंयुता वर्जनीयाष्टमी चाप्यभवेराज्यपर
भीप्सुभिः सप्तमीशल्यसंयुक्ता वर्जनीया स
दाष्टमी स्तोकापिस्यात्तिथिः पूर्णायस्यां
सूर्योदये भवेत् इति भोजराजीये समयप्र
दीपे अथ देवीव्रतानि मासि चाश्वयुजे शु
क्लानवमीसमुपोषिता सप्तम्यांकृतसंकल्प
स्थित्वाष्टम्यांनिरोदनः नवम्यांप्राशयेत्पिष्ट
मित्यादि नवमीसमुपोषितेति नवमीव्रतत्व

15

© Dharmartha Trust J&K. Digitized by eGangotri

ख्यापनार्थम् अन्यथापि शुस्यात्यन्तविधिविशे
षात् एवमन्यत्राप्येकावस्तुपवासपूर्वकद्वा
दशीव्रतकालीनविष्णुपूजात्मकं द्वादशीव्र
तेद्वादशीमुपोषितेति बहुशोभिधाने
वराहपुराणे अत्रैव द्वादशीव्रतेतु द्वादशी
तयेमतिदशमीविद्धेवादात्तु मर्हतीति व्यक्त
मेव अनेनैव समानन्यायत्वान्नवमीतयेसम
मीविद्धेवाष्टमीसमुपादातु मर्हतीति सुस्पष्ट
मेव याशुक्लनवमीमासि भवेदाश्वयुजेश्विये
तस्यां तु ग्रहणे तत्र वेलाकालोनगण्यते एत
देकादशं पर्व कुलसिद्धिमहोदयम् सर्वत्रैव
पर्वदिने कुर्यादनुचक्रयागमतिशयितः
शुभाशुभविधानादिचर्याक्रमेण संपूर्णम्
अनुयागः किल मुख्यः सर्वास्मिन्नेव कर्मवि
विनियोगे अनुयागकाललाभेन समाप्यते
तत्परमः सुख इति आदियागो हि पूजोपक

© Dharmartha Trust J&K. Digitized by eGangotri

सं रणभूतद्व्योपद्दहरगादित्तृपत्वादेतदंगमि
प्र॰ मितिभावः तेनपर्ववेलायामनुयामनुयाग
१५ प्रवभरः कादः इतितार्थम् ननुकस्मादत्राय
पुजेमासिभयग्रहादियोगेनोक्त इत्याशंकाह
भयग्रहसमयविशेषोनास्य पुजेकोपितेनतद्द
र्जेम् वेलाभयग्रहकलनाकथितैकादशसमा
सेषु यथा मासस्यमार्गस्य यातिथिर्नवमी
भवेत् हृक्षपदेस्सर्वयुक्ताऽनराफाल्गुणी
15 युता तस्यांविशेषसम्पूजाकर्तव्यासाथकोत्तमै
रित्यादि नंत्रालोकेप्पविंशोत्राह्निके ॥

© Dharmartha Trust J&K. Digitized by eGangotri

शुक्लपक्षाष्टमीचैव शुक्लपक्षेचतुर्दशी पक्षाः
परयुताः पूज्याः पराश्चैरा संयुता नाष्टमीस
प्तमीयुक्ता सप्तमीनाष्टमीयुता उपवासेस
प्तमीयंचेपेद्दृश्यमानांतिथिमिति सिद्धम्
तथाच व्यासः इयंयत्रैव तिथिवृद्धौतिथि

समसमा	समाधिका	अधिकसमा	अधिकाधिका
स दि १	स दि १	स दि ०	स दि ०
अ दि १	अ दि ०	अ दि २	अ दि २
न दि ०	न दि ०	न दि २	न दि २

क्षयेनवरात्रमपार्थकम् अष्टारात्रेनदोषो
यं नवरात्रिपरिक्षये दशरात्रेनदोषोयंति
थिवृद्धौव्रतेयुतः नवरात्रिपर्यन्तेनवरात्रस
तोऽथवान् वृद्धौसमाप्तिरष्टम्याक्षयेमाप्रति
पत्तिथि प्रारंभोनवचंडयास्तुनवरात्रमतोर्थ
वत् पतत्रिर्मूलंमत्वाशिष्टानाद्रियन्ते यथा
तिथिवृद्धावित्यादि जयन्तिजगतिरव्यातारा

© Dharmartha Trust J&K. Digitized by eGangotri

सं ज्ञानकपदान्वयात् अनादिविल्लसद्विद्यागुरु
प्र० वोगैगैन्नमानवाः सर्वैर्ज्ञातेत्यतः हं शोभुहे विह्
१८ क्रुरेमरिणः सुकात्मा सर्वविद्यासुभक्तोभूद्
त्सवाभिधः तस्यात्मजः श्रियाः पुत्रः सत्क्रिया
रणंप्रवर्तकः आदित्यनन्दितोलोके कलिकाल
तमोपहः हिन्नीश्वरोप्यकभरोयमेकं वेदद्
पिरगम् भूदेवदेवसामान्यमान्यत्वेनाऽनुमन्य
त निधाने सर्वविद्यानां प्रधाने यशमा श्रिया
तस्यात्मजोल्लसगुणोरवः सश्रीकोहृ षलक्षणः
वेशाक्रमानवच्छिन्नविद्यस्तस्याद्यनन्दनः
संजयाहेतदानन्दः सज्जनानन्दहृद्ये ॥

16

इति श्री महानवमी सम्प्रदायः
प्रथमः प्रकाशः १ ॥

अथैकादशी संप्रदायः

प्रणम्य शारदां सद्यो वै शारयप्रदां सताम्
एकादशी संप्रदायं दर्शये हर्म हृद्ये ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तथा दैशे शुद्धायाः पूर्वापरवेधरहितायाः एका
दश्याः षष्टिघटिकाभ्योर्थनतया हीनाया द्वा
दशीहीन द्वादश्यान् समाधिकतया भेदत्रये
शुद्धैकादश्यामुपवासः इतिस्मृतिपदैर्निर्वि
वादमेवसर्वेषांप्रतिपद्यभावमेवैस्मवपक्ष
स्वत्राग्रेदर्श्यते तथाचन्यासः

शुद्धोना			शुद्धोनसमा			शुद्धोनाधिका		
द	शे	८	द	शे	८	द	शे	८
ए	शे	६	ए	शे	६	ए	शे	२
द्वा	शे	४	द्वा	शे	३	द्वा	शे	२
त्र	शे	१	द्वा	दि	१	द्वा	दि	१

इत्यत्रनिर्विवादत्वात्स्मृतिवचनानिग्रन्थवि
स्तरभीयतेनदर्शितानीतिशुभम् यदातेका
दश्याषष्टिनाडिकावच्छेदेनतदाधिकेनवा
साम्येद्वादश्यस्यनसमाधिकतयाभेदषट्कंत
त्रपूर्वांविशल्यामध्येकादशीत्यष्टकापरस्यास

सं
प्र
१८

स्यामपि द्वादशी विद्धायां परस्यामेकादश्या
मुपवासः तथाच युग्मवाक्यं रुद्रेणद्वादशी
युक्तेति अपरार्कैचव्रतोपवासस्नानादी
टिकैकापियाभवेत् उदयेसातिथिर्ग्रा...
भविष्यत्पुराणे कौयद्देवकार्यव्रतादि...
दयव्यापिन्यां तिथौविधीयते तत्रतिथि
द्वितिथिवेदाननिक्रमेणग्राह्यमित्ययमेवा
भिप्रायः अनन्तभट्टीये तिथिमशल्यापि
विवर्जनीयाधर्मार्थकामेषुबुधैर्मनुष्यैः
विहीनशल्यापिविवर्जनीयायद्यग्रतोहृद्धि
रुपैतिपत्तः यथा मलिम्लुचोपूर्वो देवोमा
समस्तथोत्तरः त्याज्यातिथिस्तथापूर्वाहृद्धौ
ग्राह्यासदोत्तरा इतिवचनमेकादशीपरमि
ति पुत्रराज्यसमृद्ध्यर्थंद्वादश्यामुपवासये
त् तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणं
सर्वत्रैकादशीग्राह्याद्वादशीमिश्रितानरैः

17

© Dharmartha Trust J&K. Digitized by eGangotri

प्रातःभवात्तुवामावायतोनित्यमुपोषणम्
द्वादशीमिश्रिताग्राह्यासर्वत्रैकादशीतिथिः
द्वादशीचत्रयोदश्यांविद्यतेयदिवानवा
[illegible]दः द्वादशैकादशीयत्रसंगतात्रिदशाधि
[illegible]तामुपोष्यततःकुर्यात्त्रयोदश्यांतुपारणं
बौधायनोपिकलाप्येकादशीयत्रद्वादश्यान
गताभवेत् तामुपोष्यततःकुर्यात्त्रयोदश्यांतु
पारणम् नचेमानिवचनानियतिविषया
णिपुत्रराज्यसमृद्ध्यर्थमितिकामनयागृहि
णः स्मार्तादुक्तेः नापिएकादशीद्वादशीचत्र
त्रिस्पृशेत्रयोदशीत्रितिथिस्पृगहोरात्रंनोपोष्यं
तत्तुतार्थिभिरित्यत्रयतिमात्रनिषेधः सार्थः
तस्यापिपुत्रराज्यसमृद्ध्यर्थमित्यनेनैवनिराकृ
ते अत्रैव हेमाद्रिरुपवासद्वयमाह स्कान्दे
संपूर्णैकादशीयत्रप्रभातेपुनरेवसा त्रयोद
श्यप्युषःकालेऽपोष्यातत्रकाभवेदिति प्रश्ने

© Dharmartha Trust J&K. Digitized by eGangotri

सं उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परा न
प्र ग्नेपोष्या द्वितीया तु परतो द्वादशी यदि सम्पू
१८ र्णैकादशी यत्र प्रभाते पुनरेव सा सर्वैरेवोत्त
रा कार्या परतो द्वादशी यदि एकादशी दिन
नाशे द्वादशी विद्धेत्यर्थः सद्भार्थेवत्तृतीया ए
कादशी भवेत्सर्वा परतो द्वादशी यदि एका
दशीं परित्यज्य द्वादशीं समुपोषयेत् अत्र
द्वादशीं द्वादशीविद्धामेकादशीमित्यर्थः
गारुडे नारदस्य संपूर्णैकादशी यत्र प्रभा
ते पुनरेव सा तत्रोपोष्या परा पुण्या पर
तो द्वादशी यति सम्पूर्णैकादशी यत्र प्र
भाते पुनरेव सा तत्रोपोष्या
द्वितीया तु पुत्रपौत्र
विवर्धिनी ॥
समाप्त
म्

संपूर्णैकादशीयत्रप्रभातेपुनरेव सा वैष्णवी
चत्रयोदश्यांनाडिकैकापिहृश्यते गृहस्थैः
पिपरांकुर्यात्पूर्वानोपवसेत्तदा कलाकाष्ठा:
पिद्वादश्यांयदिस्यात्परेहनि द्वादशीद्वादशी
हन्तिपूर्वस्यांपारणेकृते तथाचन्यासः

शुद्धसमोना		समसमा		समाधिका		अधिकोना	
दशे	२	दशे	३	दशे	५	दशे	२
पशे	१	पशे	१	पशे	०	पशे	१
पदि	०	पदि	०	पदि	०	पदि	१
त्रशे	१	द्वादि	१	द्वादि	२	त्रशे	१

अधिकसमा		अधिकाधिका	
दशे	२	दशे	३
पशे	१	पशे	१
पदि	१	पदि	१
द्वादि	०	द्वादि	३

अथदशमीविद्धैकादशी
भेदनिर्णयः तत्रविद्धो
नायाएकादश्याद्वादशभे
नसमाधिकानयाभेदत्र
ये यत्रदशमीदिनपवर्त
यः तत्रमहारिणांपूर्वीय

© Dharmartha Trust J&K. Digitized by eGangotri

सं तिनां पशेति व्यवस्था तथा च पुराणसमुच्चये
प्र दशमी मिश्रि ऊनोना ऊनसमा ऊनाधिका
१९ ता सर्वा द्वाद दि १ दि १ त्र्यहः दि २
श्यां च विलु द्वाशे १ द्वशे १ त्रिस्पृक् द्वाशे १
प्यते पकार त्र शे २ द्वादि ० द्वादि १
षीति तदा ब्रह्मत्त्रुपवासः कथं भवेत् इति प्रश्ने
शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः
सकामैरपि हरिभिः पूर्वा विद्धा पीति विनिश्चयः
न चैवं व्यवस्था वक्ष्यमाण विद्धैकादशाः समाया
द्वादशीं स्पृशन्त्ता दौकैश्चिदुक्ता संभवति
अत्र स्य पुंवाक्यार्थः यत्र दशम्यां विद्धा मती
एकादशी पूर्वा होरात्र एव समाप्तिता यस्
योदयमेषा मात्रेणापि न स्पृष्टा ता तत्रैका
दशी व्याप्ति रहितायां शुद्धायामपि द्वाद
श्यां यतीनां वचनबलादुपवासः यद्यपि
णां तु दशमी विद्धायामप्येकादश्यामिति

19

© Dharmartha Trust J&K. Digitized by eGangotri

विद्धासमैकादश्या दशीन्यूनतादौतनायमर्थः
तत्रहेकादशीद्वादशीसूर्योदयव्याप्तिः द्वाद
श्यास्त्रयोव्याप्तिरत्येवस्पष्टम् तथाच स्म
त्यन्तरम् एकादशीनलभ्येतसकलाद्वादशी
भवेत् उपोष्यांदशमीविद्धामृषिरुद्दालकोब्र
वीत् ऋष्यशृंगःसर्वैरेकादशीकार्यादशमीमि
श्रितानरैः प्रातर्भवतद्वामावातस्मान्नित्यमपो
षणम् वायुपुराणे एकादशीदशाविद्धा
द्वादश्यांचत्रयंगता दशमीमिश्रितातत्रैवो
पोष्याश्रुनिसत्तम नारदः दशमीशेषसं
युक्तानोपोष्यैकादशीतिथिः एकादशीरात्रि
शेषेद्वादशीचेन्नदृश्यते दृश्यतेचेद्दशमीयु
क्तैवोपोष्येत्यर्थः पुनरत्रैवनारदः यदिदेवा
त्रसंसिद्धेदेकादश्यांतिथित्रयम् तत्रगतदशा
तंपुण्यंद्वादशीपारणेभवेत् तत्रैव एका
दशीदशायुक्तांवर्धमानेविवर्जयेत् तयमा

© Dharmartha Trust J&K. Digitized by eGangotri

सं गेस्थितेसोमेऽजुवीतदशमीयुताम् एकादशी
प्र॰ दशायुक्तापरतोपिनवर्धते तदानींदशमीवि
२॰ द्धासैवोपोष्या सदातिथिः बृहन्नारदः द्वादशी
तुकलावापियदिनस्यात्तुपारणे तदासादश
मीविद्धाप्युपोष्यैकादशीतिथिः एकादशीभ
वेत्कापिदशम्याद्दूषितातिथिः वृद्धिपक्षेभ
वेद्दोषः क्षयपक्षेतुशोभना यदातुविद्धैकाद
शीसमावाधिकावाद्वादश्याहीनतादितत्रभे
दषट्के सर्वेषांगृहिणांयतीनांचपरैव नचकां
चनव्यवस्था तस्मानन्तभट्टेनवै कलाप्येका
दशीयत्रद्वादश्यानुगताभवेत् दिनत्रयेपि
साग्राह्यायतीनामुत्तरातिथिरिति यतिग्रह
णमुपलक्षणं नेतरव्यावृत्त्यर्थमितिविरक्त
त्वात् तथाचन्यासः

20

	ऊनोना	ऊनसमा	ऊनाधिका
अत्रवेदशमीवेधनि	दशि १	दशि १	दशि १
षेधवचनानिसार्थ	[illegible]शे १	द्वाशे १	द्वाशे १
	[illegible]शी १	द्वादि १	[illegible]दि १

© Dharmartha Trust J&K. Digitized by eGangotri

समोना	समसमा	समाधिका	अधिकोना	अधिकसमा	अधिकाधिका
ददि ३	ददि ०	ददि १	ददि ३	ददि २	ददि ०
पदि ०	पदि १	पदि ०	पदि २	पदि २	पदि २
अशे ३	द्वादि ०	द्वादि १	अशे १	द्वादि २	द्वादि ३

कानि नारदः दशम्यनुगतायत्रतिथिरेका
दशीभवेत् तत्रापत्यविनाशःस्यात्परेत्यनर
कंव्रजेत् विष्णुरहस्ये दशमीशेषसंयुक्ता
मुपोष्यैकादशींकिल संवत्सरकृतेनेह न
रोधर्मेणयुज्यते दशमीशेषसंयुक्तागाः
र्भार्यासमुपोषिता तस्याःपुत्रशतंनष्टंत
स्मात्तांपरिवर्जयेत् ब्रह्मवैवर्ते दशमी
शेषसंयुक्तांयः करोतिविमूढधीः एका
दशीफलंतस्यनस्याद्द्वादशवर्षकम् यैः
कृतादशमीविद्धाविद्यामोहेनमानवैः
तेयान्तिनरकंघोरंयुगान्येकोनयुगान्येको

© Dharmartha Trust J&K. Digitized by eGangotri

सं. विंशतिम्. ननु एकादश्यामुपोष्यैव द्वादश्यां
प्र. पारणं स्मृतम्. त्रयोदश्यां न तत्कुर्याद्द्वादशा
द्वादशीलयादिति कूर्मपुराणेन पारणं त
२१ न कर्तव्यमुपोष्यैकादशीमिह त्रयोदश्यां न
दैः जातु नित्यं धर्ममभीप्सुभिरिति विष्णुरह
स्यं च त्रयोदश्यां पारणं निषेधयति तत्कथं
मत्स्यद्वादश्यां त्रयोदश्यां पारणमिति चेत्. उच्य
ते त्रयोदशीपारणनिषेधवचनानि सामा
न्यशास्त्राणि त्रयोदशीपारणाविधिवचनैः
विशेषशास्त्रैर्बाध्यन्ते अग्नीषोमीयपशुहिं
साविधिवचनेनैव सामान्यहिंसानिषेधशास्त्रं
तथाहि यदा पारणाहे द्वादशी विद्यते तदा
तस्यामेवैकादश्युपवासिनां पारणं तदतिक्र
मे तु दोषः तथा च स्मर्यते यदि किंचित्त्रयोद
श्यां द्वादशी चोपलभ्यते द्वादश्यां पारयेत्तत्र

© Dharmartha Trust J&K. Digitized by eGangotri

वर्जयित्वा त्रयोदशीं महाहानिकरी ह्येषा
द्वादशीलंघिनैरः करोति धर्महरणमस्ना
तीव सरस्वती अस्यार्थः अन्यासु गंगाद्यासु
सरित्सु तीर्थपरस्मिन्तीरे स्नातव्यम् सरस्व
त्यां प्रथमे स्नात्वा पारे गतव्यम् अस्नात्वाकृते
स्नाने यस्यां सा स्नाताज्ञो धिकरणेन स्नात्वा स
रस्वती लंघ्यमाना धर्महरणं यथा करोतीति
तथा द्वादशीलंघनं धर्महरणायेत्यर्थः
तत्र स्नानं विना लंघ्यमाना सरस्वती यथा ध
र्महरते तथा द्वादशीं विना पारणमिति य
दा त्वेकादशीमेवात्र द्वादश्याः क्षयः त्रयोदश्यां
त्वेन संभवः तदा शुद्धायामेव त्रयोदश्यां विशे
षवचनबलात्पारणा इत्यमेवोक्तं निर्णया
मृतेपि उक्तैकादशीविधायकवाक्यबला
त्रयोदश्यां पारणे पत्तिं किंचित्कष्टम् यद्वा तितिन ८
त्रयोदशीपारणनिषेधवाक्यानि पारणपर्य

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प्र॰
२२

त्वद्वादशीसंभवेत्तामतिक्रम्य त्रयोदश्यांपा
रणंनकार्यमित्येवंपरत्वेनवर्णनीयानीय
यदात्रयोदश्यांकलामात्राघटिकामात्रा
द्विघटिकामात्रावाद्वादशी तदारात्रिशेषे
सर्वमाह्निकंकृत्वाद्वादशीमध्येपारयेत् य
दुक्तं एतस्मात्कारणाद्विप्रः प्रत्यूषेस्नान
माचरेत् पितृतर्पणसंयुक्तमल्पाचेद्द्वाद
शीभवेत् अल्पायामपिविप्रेन्द्रद्वादश्या
मरुणोदये स्नानदानक्रियाकार्याजपहो
मादिसंयुतेति शुद्धायांत्रयोदश्यांपारणे
पृथिवीफलं सर्वयज्ञादिकंवापिनरःप्राप्नोत्य
संशयम् एतस्मात्कारणाद्विप्रप्रत्यूषेस्नान
माचरेत् पितृतर्पणसंयुक्तमल्पाहेपिचद्वाद
शी अन्यत्रापिदिनकर्मदिनेसर्वंकर्तव्यंयद्वि
तद्दिने नैवसिद्धिंभवाप्नोतितदारात्रौविधीय
ते गरुडे यथाल्पत्वाद्द्वादशीस्यादपकर्षेभु

22

© Dharmartha Trust J&K. Digitized by eGangotri

ञ्जिभवेत् विधेर्मध्याह्निकस्यापि तत्र स्यादप-
कर्षणम् स्कन्दे यदा भवेदतीवाल्पा द्वादशी
पारणादिने उषःकाले द्वयं कुर्यात्प्रातर्मध्या
ह्निकं सदेति अथाल्पायां द्वादश्यामद्भिः पारयि
त्वास्तु काले नित्यकर्मानुष्ठानानन्तरं भोजनं
कुर्यात् तथा च कात्यायनः सन्ध्यादिकं भवे
न्नित्यं पारणं तु निमित्ततः अद्भिस्तु पारयित्वा
थ नैत्तिकान्ते भुञ्जिभवेत् तथा च देवलः
संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम् अ
द्भिस्तु पारणं कृत्वा पुनः भुक्त्वा न दोषभाक्
यत्तु द्वादश्याः प्रथमः पादो हरिवासर संज्ञि
तः तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः
इति विष्णुधर्मोत्तरे द्वादश्याः पंचदशनाडिका
हरिवासराख्याः तमतिक्रम्य पारणं कुर्यात् इति
तत्तु द्वायाः प्रथमे भेदत्रयोविषयम् अथवा
विहायापकादश्याततनतायां द्वादश्यनतारि

सं भेदत्रयपरं चेति सर्वं समञ्जसं तथा च विद्धैका
प्र· दश्याः सम्याधिकयो द्वादश्यन्तादिभेदषट्के स
२२ वैर्गृहिभिर्यतिभिः पत्नीवैकादशी कार्येति प्रामा·
ण्यमुपपादकानां वचसां विशेषादुच्यते अनन्त
भट्टः याविद्धैकादशी भूत्वा द्वादश्यां कियत्यपि
दृश्यते सा द्वादशीयुतैवोपोष्या नित्या काम्या
च द्वादशी त्रयोदश्यामस्तु वा मास्तु वा तथो
क्तं द्वादशी पिच्छिन्ना कार्या सर्वैरैकादशीति
थिः द्वादशी च त्रयोदश्यां विद्यते यदि वा न वा ना
रदः द्वादश्येकादशी यत्र संगताचिद्दशापि प ता
मुपोष्य ततः कुर्यात्त्रयोदश्यां तु पारणं वौधाय
नोपि कलाप्येकादशी यत्र द्वादश्यां तु गता भवे
त् तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं वृद्ध
नारदः यदि चैवा च संसिद्धे देकादश्यां तिथित्रयं
तत्र क्रतुशतं पुण्यं द्वादशीपारणं भवेत् एकाद
शी द्वादशी त्रयोदशी च तिथित्रयं यथेकादश्यां तं स
भवति

© Dharmartha Trust J&K. Digitized by eGangotri

तदा दशमीं विहायामेकादश्यामुपोष्य द्वा
दश्यां पारणम् यदा त्वेकादश्यां तिथित्रयं सं
भवति तदा द्वादशीं विहायैकादशीमुपोष्य
त्रयोदश्यां पारणमित्यर्थात्सिद्धमेव तथा च
कूर्मे एकादशी द्वादशी च रात्रिशेषे त्रयोदशी
त्रिभिर्मिश्रा तिथिः प्रोक्ता सर्वपापहरा तु या
उपवासव्रतं तस्यां महापातकनाशनम् स्कन्दे
द्वादशी संगता यत्र भवेदेकादशी तिथिः
दिनद्वयेपि साधुस्यान्न दशम्यां कदाचन स्क
न्धपुराणे पारणं येन लभ्येत द्वादशी कलया
पि चेत् तदानीं दशमीविद्धा सेव्या पापघ्नी सदा
तिथिः विष्णुरहस्ये दशमीशेषसंयुक्ता ह्युपोष्यै
कादशी तदा यदा न स्यात्त्रयोदश्यां पारणं तु हि द्वाद
शी तिथिः द्वादशी स्वल्पमल्पापि यदि न स्यात्प
रेऽहनि दशम्या मिश्रिता कार्या महापातकना
शिनी यदार्कोदयमात्रापि द्वादशी नापरेऽहनि

© Dharmartha Trust J&K. Digitized by eGangotri

सं त्रयोदश्यां तदा कार्या दशमीमिश्रितान्नरैः क
ल्पार्थेनापि विद्धा स्याद्दशम्यैकादशी तिथिः
प्र॰ तदा ह्येकादशीं मुक्त्वा दशमीं समुपोषयेत् ३
२५ त्येतैर्वचनैर्यदि त्रयोदश्यां किंचन्मात्रापि द्वा
दशी पारणाय लभ्यते तदा दशमीविद्धामे
कादशीं त्यक्त्वा द्वादशीविद्धामुपोष्य यथायथं
प्रागुक्तपारणा युक्तिः त्रयोदश्यां सिद्धेति शिव
मत्स्यपाद्माग्नेय निर्णयामृतेऽपि विद्धसमोनायां
विद्धापि कोनायां च एकादशी द्वादशी च रा
त्रिशेषे त्रयोदशी त्रितिथिस्पृगहोरात्रे नोपोष्यं
तत्त्वार्थिभिः एकादशी द्वादशी च रात्रिशेषे
त्रयोदशी उपवासेन कुर्वीत पुत्रपौत्रसमन्विता ३
तिथ्वहरिणं तत्रोपवासनिषेधात् उपवासस्य चरी
यतत्वेनावश्यकत्वात् गदहरिणं पूर्वस्मै वोपवासस्य
तीयते यतिभिस्तु वाकाम्बलाभ्यैवेति व्यवस्था ह्यता
सावित्र्यां गदहरिणं पूर्वविद्धां विहाय कस्यवा कस्य सा
तादलभ्यमानत्वात्

© Dharmartha Trust J&K. Digitized by eGangotri

नचाग्रोपवासस्यानिष्टफलश्रवणादस्यन्तं:
त्यागः अनिष्टफलश्रवणसामान्यवाक्यस्य
शुद्धासमोनाधिकोनाभेदेपरविद्धाविधायके
नपुत्रराज्यसमृद्ध्यर्थंद्वादश्यांसमुपोषयेत्
तत्रकृतत्वधातेपुरणंपत्रयोदश्यांतपारणम् इति
शुद्धसमोनाधिकोनाभेदेपरविद्धांविधायके
नपुत्रराज्यसमृद्ध्यर्थंवाक्द्वयस्यैकविषयेण
पुरस्तात् नचैवंएकादशीद्वादशीचेत्यादि
पूर्ववाक्यस्यनिर्विषयत्वात् प्रसिद्धस्यस्मृति
निवृत्तिभिर्दर्शितोविषयः तथाचानन्तभट्ट
यस्तुपुत्रवतोव्रतनिषेधः ससंक्रान्त्यादिनिमि
त्तस्योपवासस्यनतुशुक्लैकादशीव्रतोक्तस्यो
पवासस्य तदुक्तंजैमिनिना तन्निमित्तोपवास
स्यनिषेधोयमुदाहृतः नान्वयक्रमतोयासो
यतोनित्यमुपोषणमिति तन्निमित्तस्यसंक्रा
न्त्यादिनिमित्तस्येत्यर्थः सचसंवर्तकेनोक्तः

© Dharmartha Trust J&K. Digitized by eGangotri

सं अमावास्याद्वादशीच संक्रान्तिश्च विशेष
प्र तः एताः प्रशस्तास्तिथयो भानुवारस्तथै
२५ व च अत्र स्नानं जपो होमो देवतानां च पूज
नं उपवासस्तथा दानमेकैकं पावनं स्मृत
मिति तथा च विष्णुधर्मेषु त्र्यहस्पृशेऽपि दि
वसे उपवासो महाफलः केशवाद्यर्चनेरा
मदानजप्यादिकेषु च इति शंकरगीता
सु दशमेऽध्याये पृथगेव त्र्यहस्पृगुपवासो
यः स एव वदहिलो निषिद्धः न तु सा तादे
कादश्युपवास इति संक्रान्त्यादेरनुषङ्गे
ण संयोगन हन्तो निषेधः नित्यैकादशीवि
षयो न भवतीत्यर्थः यद्यात्रैकादशी कला
मात्रा द्वादशी च तत्र गतः एकादशी दशा
विद्धा द्वादशी च तत्रयं गता त्रिदिनं तद्धि वि
ज्ञेयं तत्र पुण्यं निरर्थकम् तत्र नैकैव भो
क्तं वा यद्वा कुर्याद्यथोचितम् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

इतिद्वादशीत्रयेनक्तादिविहितंतद्दशाक्तिः
विषय इतिनिर्णयामृतेस्पष्टमेवकात्याय
नः संक्रान्तौरविवारेवायद्यप्येकादशीभवे
त् उपोष्यासामहापुण्यासर्वपापहराति
थिः नारदः भानुवारसमोपेतातथासंक्रांति
संयुता एकादशीसदोपोष्यापुत्रपौत्रविव
र्धिनी परमापदमापन्नोहर्षेवासमुपस्थिते
सूतकेमृतकेचैवनत्याज्यंद्वादशीव्रतम्
हेमाद्रिसारहृदपि हृत्स्वैकादशीव्रतवि
वेके एतदेवाभिप्रेत्याह गृहस्थमात्रस्यकृ
ष्णायांनिषेधः शुचिरागस्तुशायिनीबोधिनीम
ध्यवर्तिन्यामपीतिनिर्णीतम् सचायंनिषे
धोनित्यप्रयोगविषयः काम्यप्रयोगेतुभ
वत्येव तथाचस्मर्यते पुत्रवांश्चसभार्यश्चव
म्पुत्रकस्तथैवच उभयोः पक्षयोः काम्यव्र
तंकुर्यात्तवैष्णवम् वैष्णवव्रतलक्षणांचमा

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प्र·
२६
26

त्स्ये एकादश्यां निराहारो यो भुंक्ते द्वादशी
दिने क्रमेवा यदि वा भुङ्क्ते तद्व्रतं वैष्णवं स्मृ
तं इति तथैव निर्णयसारे अविद्वानाम
लाभेन पयो दधि फलानि तु सकृदेवाल्प
मश्नीयाद्द्युपवासस्ततो भवेत् इत्यादि व
चनैः लीराधिप्राधानमेकादशीव्यतिरि
क्तविषयमवगन्तव्यं तथाचैतद्देवमाधवे
न संगृहीतं जयन्तीव्रतवन्नित्यकाम्यं चै
कादशीव्रतं अरुणोदयवेधेत्र वेधः सूर्यो
दयेतथा उभौ द्वादशमी वेधौ वैष्णवस्मार्त
योः क्रमात् कलाकाष्ठादिवेधोपि त्याज्यो
न विमुहूर्तवत् वैखानसाद्यागमोक्तदी
क्षाप्राप्तो वैष्णवः विद्वान्याज्यो वैष्णवेन श
ह्याप्यादिकसंभवे एकादशी द्वादशी वाधि
थिकास्वैस्यजेद्दिनं सूर्वग्राह्यं तत्परं स्यादि
ति वैष्णवनिर्णयः एकादशी द्वादशी चे

© Dharmartha Trust J&K. Digitized by eGangotri

घुभयंवर्धनेयदा तदापूर्वदिनंत्याज्यंस्मा
र्तैर्याह्यंपरंदिनं द्वयोरपृवृद्धौपूर्वैवशुद्धावि
द्धाचस्मायदि एकादशीमात्रवृद्धौगृहिय
तिव्यवस्थितिः उपोष्यागृहिभिःपूर्वाय
तिभिस्तूत्तरातिथिः द्वादशीमात्रवृद्धौतुशु
द्धाविद्धव्यवस्थिते शुद्धापूर्वैन्नराविद्धास्मा
र्तैर्निर्णयईदृशः श्रावणेनश्रुताचेत्स्याद्द्वा
दशीसाहिवैष्णवैः स्मार्तैरुपोषणीयास्मा
त्यजेदेकादशींतदेति इतिस्मार्तैकादशी
निर्णयप्रकाशः अथवैष्णवसम्मतयः
सदीक्षाविधिसंन्यासंसमयन्द्वादशान्तरम्
अष्टान्तरमथाम्नेवायेमन्त्रंसमुपासते ज्ञेया
स्तेवैष्णवालोकेविष्वक्सेनरतास्तथा तेषा
मप्येकादशीशुद्धाविद्धाचेति तत्रापिपूर्वा
परवेधरहिताशुद्धा विद्धान्तदशम्याद्वाद
श्यावासंयुक्ता तत्रदशमीवेधोनिषिद्धः

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प्र॰
२२

द्वादशीवेधो ग्राह्या सवेधोर्धरात्रीवेधोरुणो
दयवेधः सूर्योदयवेधश्चेति त्रिधा अर्ध-
रात्रवेधस्यैव कपालवेधेति संज्ञान्तरम्
प्रसिद्धस्त्वरुणोदयवेधः सूर्योदयवेधश्चे
ति द्विधैव दशमीवेधो वैष्णवैस्त्यज्यते स्मा
र्तैस्तु सूर्योदयमात्रवेधः तत्रारुणोदयमा
नं स्कान्दे उदयात्प्राक्चतस्रस्तु घटिका अरु
णोदयः तस्मिन्नरुणोदये वेधा बहुविधा :

27

प्रश्नोत्तराभ्यां ब्रह्मवैवर्ते दर्शिताः कथा
कीदृशस्तु भवेद्वेधो योगो विप्रेन्द्र कीदृशः
योगवेधो सो माचक्ष्व द्वाभ्यां तु सूर्यपोषिणं
चतस्रो घटिकाः प्रातररुणोदयनिर्णयः
चतुष्टयविभागोत्र वेधानां चकिलोदितः
अरुणोदयवेधस्तु सार्धं हि घटिकात्रयम् अ
तिवेधो हि घटिका प्रभासंदर्शनाद्रवेः म
हावेधोपि तत्रैव दृश्यते तुरीयस्तत्र विद्धि

© Dharmartha Trust J&K. Digitized by eGangotri

तोयोगः सूर्योदये सति सार्धः वेधातिवेध
महावेधयोगा इति चतुर्धारुणोदयः तत्र
भासंदशनात्पूर्वं सार्धघटिकात्रयमेकादशपाख्या
मं ततः प्राचीने घटिकार्थे रुणोदयसम्बन्धिनि
दशमी सङ्गा वै वेधे प्रयुज्यते यदिघटिद्वयमुपरि
ततमेकादशपाख्यामंत्सर्वं तद्घटीद्वयं दशमीव्या
मं तदानीमतिवेधेति यदा तर्कदर्शनसन्देहका
लपकादशीव्याप्ता ततः पूर्वं सूर्यास्तो रुणोदय
कालः दशमीव्याप्तः तदा महावेधः यदा सूर्यो
दये दृष्टे सति पश्चादेकादशी प्रदृष्टा ततः प्राक्
सर्वो रुणोदयो दशम्या विध्यते तदा तुरीयो
योगा[illegible]दोषो भवति अत्रोत्तरोत्तरं वेधाद्दोषा
धिक्यमिति भावः तथा चात्र दशमीनिषेधवेध
वाक्यानि दशमीशेषसंयुक्तो यदि स्यादरुणो
दयः नैवोपोष्यं वैष्णवेन तद्दिनैकादशीभवे
त् व्रतं दशम्याः प्रान्तमादाय यदोदेति दिवा

© Dharmartha Trust J&K. Digitized by eGangotri

स कारः तेनस्पृष्टंहरिदिनंदशंजन्मास्त्रुतायवे ऽ
दयोपरिविज्ञातदशम्येकादशीयदा दानवे
प भ्यःप्रीणनार्थं दत्तवान्पाकशासनः तववेथेऽपि
२८ राजेन्द्रदशम्येकादशींत्यजेत् सुरायाविन्दु
नास्पृष्टंगंगाम्भइवनिर्मलम् अरुणोदयका
लेतुदशमीयदिदृश्यते साविद्धैकादशीतत्र
पापमूलमुपोषणम् अरुणोदयवेलायां
दशागन्धोभवेद्यदि इष्टंतत्प्रयत्नेनवर्जनी
28 यंनराधिप दशमीशेषसंयुक्तामुपोष्यैका
दशींकिल संवत्सरकृतंतेनेहनरोयथमैराप्नुया
त् अरुणोदयवेलायांदशमीयदिसंगता
संयुक्तैकादशींतांतुमोहितैर्दत्तवान्प्रभुः ब
ऊवाक्यविरोधेनसन्देहोजायतेयदा उपो-
ष्याद्वादशीतत्रत्रयोदश्यांतुपारणं विवादे
युवसर्वेषुद्वादश्यांस्यादुपोषणम् पारणंच
त्रयोदश्यामात्रेयंमाधवकौस्तुभे उदयाकालै

मुहूर्त्तेनव्यापिन्येकादशीयदा संयुक्तैका
दशीनामवर्जयेद्धर्मसंग्रहे अत्रैपोत्रसमस्तबाधे
द्वादश्यामुपवासयेत् तत्रकृतशांतपुराणंयत्र
योदश्यांतुपारणं तस्मात्सर्वप्रयत्नेनसंकी
र्णैकादशींत्यजेत् द्वादश्यामुपवासोयत्रत्रयो
दश्यांतुपारणं ऽउदयमरुणोदयवेधोवै
ष्णवमतोपयोगीपूर्वंनिर्णीतास्वष्टस्वप्येका
दशीषुनिश्चीयते तत्रशुद्धायाएकादश्याह्य
रुणनत्वयामरुणोदयवेधस्यासंभवात्स्मार्त्तै
कासाम्येनैकादश्यामुपवासः यदितुकदा
चिदस्मिन्नेवभेदेशुद्धानाख्येद्वादशीत्रयोदशी
चतुर्दशीसमाप्तवभवंति अथामावास्पूर्णावा
द्वितीयदिनेपिवर्धते तदापत्त्वपिमीलनतरा
संभवाःशुद्धायामप्येकादशींत्यक्त्वाद्वादश्या
मुपवासस्त्रयोदश्यापारणेतिक्रमादेकोप
वासोवैकादश्यांद्वादश्यांचेत्तुमासद्वयंवाय

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰ थासम्प्रदायम् तथाचैतन्मतत्रयंपाद्मे अ
प॰ मावायदिवापूर्णाहक्षपतेयदा भूत्वातुष
२९ ष्टिघटकाहक्षपनेप्रतिपद्दिने अश्वमेधा
युतैस्तुल्यासाभवेत्पक्षवर्धिनी त्यक्त्वैका
दशींविद्धाद्वादशींसमुपोषयेत् विशल्या
पिनकर्तव्यापक्षवृद्धिर्यदाभवेत् पक्षवृद्धे
विशेषेणसन्देहेसमुपस्थिते समाख्यायाप्र
कर्तव्यावल्लभापक्षवर्धिनी ब्रह्मवैवर्ते
जह्नुराकेयदावृद्धिंप्रयातेपक्षवर्धिनी वि
हायैकादशींतत्रद्वादशींसमुपोषयेत्
अमावापूर्णावाषष्टिघटिकाभूत्वापरस्मि
न्दिनेकियन्मात्रावर्धतेसापक्षवर्धिनी व
पत्र १० हदाम १२ अवोशो ९ ग्राचंशो ५ ग्राप्र
शो १ चंशदि॰ अत्रायमभिसन्धिः यद्यपिद
शमीवेधोनास्ति तथापि पक्षवेधस्यवर्धमा
नत्वादेकादशीत्याज्या यद्वावाचनिकत्वा

29

© Dharmartha Trust J&K. Digitized by eGangotri

वस्यानपुत्रपौत्रिणी यथाचात्रैवदशमी
कपालवेधपरीताप्ययोगिनी । शुद्धोनस
मा शुद्धोनाधिकयोस्तु सत्यप्यरुणोदयवे
धाभावेवंजुलीलक्षणासंभवाद्धिशल्पामेका
दशींत्यक्त्वाद्वादश्यामुपवासः तथाचपाद्मे
संपूर्णैकादशीयत्रद्वादशीच तथाभवेत्
त्रयोदश्यांमुहूर्तोवावंजुलीसाहरिप्रिया
शुक्लेपक्षेथवाकृष्णेयदाभवतिवंजुली प
कादशीदिनेभुक्त्वाद्वादश्यांकारयेद्व्रतम्
पारणंद्वादशीमध्येत्रयोदश्यांनकारयेत्
तथाचात्रगणितानामेवातत्प्रकारेणभेदत्र
येरुणोदयसमा यथा दशो ६ पशो ४ द्वा
शो ३ त्रोशो १ दशो ५ पशो ३ द्वाशो २ द्वादि १
द्वादि २ दशो ४ पशो २ द्वाशो १ द्वादि २ अत्रै
वारुणोदयवेधानिवेधमहावेधसंभवात्रि
ष्वपिभेदेष्वेकादशींत्यक्त्वाद्वादश्यामुपवास :

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प
३०

यदिवाग्राग्रिमभेदहृये द्वादशीवृद्दिर्भवेन्तन्मुन्मीलती
तत्रणसंभवोपि तथाचब्रह्मवैवर्ते द्वादशपे
वविवर्धतनचैवैकादशीतदा वंजुलीतिश्र
गुश्रेष्टकथितापापनाशिनी ३ इतिद्वादशभ
कारत्रयम् अथशुद्धसमोनादिभेदषट्कैरणो
दयवेधस्यसंभवादृशमीविद्धतयासर्वामेकाद
शीम्यक्त्वाद्वादशीविद्धायांसत्यामप्येकाद
शीपरस्यामेवस्मार्तवडुपवासः अथशुद्धस
मोनशुद्धाधिकोनयोर्भेदयोरुन्मीलिनीतत्त
रणसंभवोपि तथाचपाद्मे एकादशीतुसंपू
र्णावर्धतेपुनरेवसा उन्मीलिनीभृगुश्रेष्टक
थितापापनाशिनी ब्रह्मवैवर्ते एकादशी
तुसंपूर्णावर्धतेपुनरेवसा द्वादशीचनवर्धे
तकथितोन्मीलिनीतिसा ६ इतिशुद्धभेदन
वकम् अथविद्धभेदनवकम् तत्रविद्धोनना
दिभेदत्रयेयोगाख्यस्यदोषस्यसंभवादृशमी

30

© Dharmartha Trust J&K. Digitized by eGangotri

विद्धामेकादशीं त्यक्त्वाप्युद्धायां द्वादश्यामुपवा

सः त्रयोदश्यां पारणं अत्रैव हत्तीयस्तृतीय

योर्भेदयोर्व्यज्जुलीतम् अपि तथाच ब्रह्मवैव

र्ते द्वादश्येव विवर्थैतनचैवैकादशी यदा विं

ज्जुलीति भगवच्छ्रेष्ठ कथिता पापनाशिनी त

था विद्धसमोनादि भेदषट्के दशमी सूर्योदय

विद्धत्वात्सर्व एकादशीं उष्टत्वाऽन्तरत्र द्वादशी

विद्धायां सत्यामप्येकादश्यामुपवासः

वैसव स्यन्तयोः तुल्य एव अस्तिवात्र विद्धस

मोनायां विद्धाधिकोनायां च त्रिस्पृशात्वम् ए

कादशी द्वादशी च रात्रिशेषे त्रयोदशी त्रिस्पृ

शा सा तु विज्ञेया ब्रह्महत्यां व्यपोहति पाद्मे

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी त्रि

स्पृशा सा तु विज्ञेया दशमीसहिता नहि अरु

णोदयादाद्यास्याद्द्वितीया सकलं दिन अ

न्ते त्रयोदशी प्रातस्त्रिस्पृशा सा हरेः प्रिया।

© Dharmartha Trust J&K. Digitized by eGangotri

सं एकादशीद्वादशीचरात्रिशेषेत्रयोदशी त
प त्रकृत्स्नशान्तेशुरणंत्रयोदशपांतुपारणम् दर्शि
३१ तानीत्युन्मूलिनीवंजुलिनीत्रिस्पृशापक्ष
वर्धिनीलक्षणेनाहरणानि यथासंभवम
न्यत्रापिपरीक्षाणि एताद्वादशएतानित्यंवैष्ण
वानां पापं नकरिष्यन्तियेलोकेद्वादशपापिष्ठे
ममाज्ञया तेषांयमपुरेवासोयावदाभूतसं
प्लवम् ब्रह्मवैवर्तेपि उन्मूलिनीवंजुलि
नी त्रिस्पृशापक्षवर्धिनी जयाचविजया
चैवजयन्तीपापनाशिनी द्वादश्योमहापु
ण्याःसर्वपापहराद्विज तत्रतिथियोगा
दुन्मूलिन्याद्याःचतस्रः उक्ताःतिथिनक्ष
त्रयोगजास्तुजयादयःकथ्यन्ते तथाहि
शुक्लद्वादशीपुनर्वसुयोगेजयाभवति
श्रावणयोगेविजया रोहिणीयोगेजयंती
पुष्ययोगेपापनाशिनी तदुक्तं ब्रह्मवैवर्ते

© Dharmartha Trust J&K. Digitized by eGangotri

द्वादश्यां तु सिते पक्षे यदा ऋक्षं पुनर्वसुः
नाम्ना सा तु जया ख्याता तिथीनामुत्तमा तिथि
यदा तु शुक्ला द्वादश्यां नक्षत्रं श्रवणं भवेत्
विजया सा तिथि प्रोक्ता तिथीनामुत्तमा तिथि
यदा शुक्लद्वादश्यां प्राजापत्यं प्रजायते
जयन्ती नाम सा ज्ञेया सर्वदोषहरा तिथिः
यदैव शुक्लद्वादश्यां पुष्यो भवति कर्हिचित्
तदा सा तु महापुण्या कथिता पापनाशि
नी तथा चानन्तभट्टः तेच द्वादश्युपवा
साहिता एके मार्कंडेयेनेन्दुपुत्रं प्रति उप
दिष्टास्ते यावज्जीविकाः अपरे श्रवणाद्वाद
श्युन्मीलिन्यादिषु विहितास्ते एकाब्दिका
एते हि द्विविधा अपि यद्येकादशीयुतायां द्वाद
श्यां प्राप्ताः तदैकेनोपवासेनैकादश्युपवा
सो द्वादश्युपवासश्च सिध्यति यदा त्वेकाद
श्याः संस्पर्शो न तेनोपवासः पृथक् द्वादश्य

© Dharmartha Trust J&K. Digitized by eGangotri

सं स्य संसर्गित्वेन शुध्युपवासः तदोपवासद्वयं
प यदुक्तं एकादशीमुपोष्यैव द्वादशीमुपो
षयेत् न चात्र विधिलोपः स्यादुभयोर्दैवतं ह
३२ रिः इत्युपवासद्वयविधानाच्चासमाप्तेव्रते
पूर्वेद्युर्यान्नैव व्रतान्तरम् इति समाप्तिस्वरूपा
रणेन न तु तदभावे उपवासद्वये क्रियमाणे
32 पूर्वव्रतस्यासमाप्तेर्विधिलोपः प्राप्नोति सो
प्येकदेवतात्वेन परिहृतो वचनेनैव एवं चै
कादशीभक्ताद्वादश्यासमुपोषणात्
पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम्
इत्येतदुपवासद्वयासामर्थ्ये प्रसज्यते ए
कादश्युपवासस्य नित्यत्वे न तत्रैकस्मि
न्नुपवासे एकभक्तादिकं विहितसमर्थ
स्य तदुपवासद्वयासामर्थ्ये किमुत वक्तव्यम्
यामायनः याः काश्चित्तिथयः प्रोक्ताः पुण्यान
न्त्रयोगतः तास्वेव तद्व्रतं कुर्याच्छ्रावणद्वादशीं विना

© Dharmartha Trust J&K. Digitized by eGangotri

याः काश्चित्तिथयः येन केन चिन्नक्षत्रयोगेन
प्रशस्ताः प्रोक्ताः तास्तु यद्विहितं तत्तास्वेव कु
र्यात् न तिथ्यन्तरे तन्न तद्युक्ते यथा फाल्गु
णद्वादशी पुष्यनक्षत्रेण युक्ता गोविन्दद्वा
दशी तस्यामेव पोषं कुर्यात् तद्व्रतं तस्यामेव
कुर्यात् न पुष्यान्वितायामेकादश्यामुपवा
स तथा चायं नियमः श्रवणद्वादशीं विना
श्रवणद्वादशी व्रतं तु श्रवणैकादश्याम
पि भवतीति तात्पर्यम् इत्थमेव भविष्यो
त्तरे कृष्णः द्वादश्यास्तु विधिः प्रोक्ता श्रवणे
न युधिष्ठिर सर्वपापप्रशमनः सर्वसौख्य
प्रदायका एकादशी यदा च स्याः श्रवणेन
समन्विता विजया सा तिथिः प्रोक्ता नं विज
यप्रदा इयांस्तु विशेषः श्रवणद्वादश्यां ज
नार्दनाख्यो विष्णुः पूज्यते श्रवणैकादश्यां
वामननामेति इदमत्र तात्पर्यम् शुद्धैका

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प
२२

दश्याः श्रवणयोगे पुण्यकालत्वतया विजया
त्वे एकादशीविद्धाया द्वादश्याः श्रवणयोगे
विष्णुशृंखलत्वम् शुद्धद्वादश्याः श्रवणयोगे श्र
वणद्वादशीत्वमिति श्रवणस्य त्रयः प्रकाराः
तथा च शुद्धाया एकादश्या अपि श्रवण
योगे भाशास्य माह नारदः यदा न प्राप्यते ऋक्षं
द्वादश्यां वैष्णवं क्वचित् एकादशी तदोपो
ष्या पापघ्नी श्रवणान्विता तत्राद्ये प्रकारद्व
ये एकेनैवैकादश्युपवासेन व्रतसिद्धिः तृ
तीये तूपवासद्वयेनेति विशेषः सिद्धम् एका
दशी पञ्चदशीमध्ये पतिते पुष्यादीनां तु शुद्ध
या द्वादश्या योगे व्रतत्वम् न त्वेकादशीवि
द्धायाः हित्वा वैष्णवमस्तस्त्वेमितरेषु तेषु
भद्रा तिथेविति पुष्यादित्रययोगे द्वादश्या अ
स्तमयं यावत् स्थितत्व एव देशेनैकादशीवेधनि
षेधस्य सत्तः सिद्धम् तस्माद्योगत्रयेऽपवास

33

© Dharmartha Trust J&K. Digitized by eGangotri

द्वयेनैवसिद्धिः असाधारणंचेदंयोगत्रयंवैष्ण
वानामेव श्रवणेनयुताचेत्साद्वादशीसद्भि
र्वैष्णवैः स्मार्तैश्चोपोषणीयास्यादिति श्रव·
णद्वादशीमात्रस्यस्थानवैष्णवसाधारणपेनो
ज्ञयात् एतेचद्वादशीश्रवणयोगाः शुद्धायां
द्वादश्यामेकादशीविद्धायांवानतुत्रयोदशी
विद्धायांशुद्धेनसमानयांशुद्धोनाधिकायांवि
द्धोनसमायांविद्धोनाधिकायांवा यदाहरत्न
मालाटीकायां संपूर्णाद्वादशीयत्रप्रभातेपु
नरेवसा वंजुलीनाममासाक्षेति वंजुलीनाम
लक्षणे महादेवः नकार्यातिथिवृद्धौतुपक्ष
वृद्धौतुपार्वति श्रवणेनापिसंयुक्तानोपोष्यै
कादशीतदा तथाचनिर्णयामृतेपि ॥
द्वादशीनिर्णये रुद्रेणद्वादशीयुक्तेति द्वा
दश्यामेकादशीवेधप्रशस्य कामविद्धेष्व
वेविष्णुर्नग्राह्यानेतवासरा इतित्रयोदशीवे

© Dharmartha Trust J&K. Digitized by eGangotri

से
प
प्र
३८

34

पः निषिद्धः एकादशीवेयस्तुसीकृतोपथा
भाद्रशुक्लद्वादशीश्रवणयुक्ताश्रवणद्वाद
शीसायद्येकादश्यामेव तदाविष्णुशृंखला
ख्योयोगः तथैकेनोपवासेनैकादशीव्रतंद्वा
दशीव्रतंचकृतंभवति तदुक्तंमात्स्ये द्वाद
शीश्रवणास्पर्शेचस्पृशेदेकादशीयदि सएष
वैष्णवोयोगोविष्णुशृंखलसंज्ञकः तस्मिन्नु
पोष्यविधिवत्संक्षीणकल्मषः प्राप्नोत्य
नुत्तमांसिद्धिंपुनरावृत्तिदुर्लभा संस्पृश्यै
कादशी राजन्द्वादशीयदिसंस्पृशेत् श्रव
णंज्योतिषंश्रेष्ठंब्रह्महत्यांव्यपोहति यदा
श्रवणद्वादशीयुक्तायामेकादश्यामुपोषि
तायांद्वितीयदिनेद्वादश्यांश्रवणंवर्धते
द्वादशीचन्यूनाभवति तदातिथ्यन्तेनपार
णीयः तदुक्तं तिथिनक्षत्रसंयुक्तो ऽपवा
सोयदाभवेत् तावदेवनभोक्तव्यंयावन्नैक

© Dharmartha Trust J&K. Digitized by eGangotri

स्यसंतयः विशेषेणमहीपालश्रवणंवर्धते
यदि तिथित्रयेनभोक्तव्यंद्वादशीनैवलंघयेत्
अस्यार्थः तिथित्रयेणोत्यपवर्गेत्तृतीया तिथि
त्रयेसंपन्नेनभोक्तव्यम् अन्नदेवभाद्र द्वादशी
नैवलंघयेत् इति श्रवणस्याशेषोत्तयेभविष्य
ति तत्रपारणानिषेधात्रयोदशीविद्धाद्वादशी
त्येवंतेथामंत त्रिषिद्धमित्यर्थः तथाच निर्ण
यते एवजन्माष्टम्याम् याउनर्विद्धाधिको
भयत्रेरोहिणीसहितां ताउपोष्यपूर्वांतिथ्य
न्तेपारणं तत्रतिथिभान्तेचपारणमिति भा
न्तेपारणविधानस्य रोहिणीश्रवणव्यतिरि
पूर्वाह्णो देवानां मध्यन्दिनो मनुष्याणां अपरा
ह्णः पितॄणामिति त्रिधा विभक्ते तु दिवसस्य तृ
तीयो भागोऽस्तमयान्तः सर्व एव पराह्णः त
था चोक्तमनन्ते यत्त्रिधा विभक्तस्याह्नस्तृ
तीयो भागस्तस्य कृतो पिण्डपितृयज्ञार्थे त्व
नैतत्य करणे पाठात् यद्यपि पूर्वाह्णो देवा
नां मध्यन्दिनो मनुष्याणाम् अपराह्णः
पितॄणामेतस्माद पराह्णो ददातीत्यस्य वा
क्यस्य त्रिधा विभागपरत्वमभ्युपगम्यते

© Dharmartha Trust J&K. Digitized by eGangotri

सं तथापि तत्पिंडपितृयज्ञार्थमेव भविष्यतीति
ग्रं तथाच मनुपरिशिष्टेपीत्थमेव पितृयज्ञंति
६९ ति श्लोके द्विजातिर्विप्र उच्यते अग्न्याहितो धी
मान्कालोमावस्याः शशिनः क्षयः यस्यां चेन्द्र
न दृश्यते तिथ्यालीनाः तपात्तये अमावस्या
त्तु सा भुरवा खविकायांतद्दृश्यते दृश्यमा
नेचतर्दशम्यां खविकायांकृते भवेत् दर्शाङ्गः
पितृयज्ञः स्यादेवं लौगाक्षिरब्रवीत् पूर्वेद्यु
पितरो विन्दन्देवास्तु परेहनि कृतं शातपथ
श्रुतयोगमतोप्ययं पिंडान्वाहार्यकं श्राद्ध
मिति द्वे कर्मनामानी पिण्डामनुविशारणा
माहरन्नप्रभोजनं निर्वपन्ह्नि श्राद्धकाला
पद्योक्तः पैतृयज्ञिकः अपराह्णस्तृतीया
शो दिवसंस्यात्तमः स्मृतः पिण्डयोगः पितृ
णां तु तस्मिन्काले विधीयते पूर्वाह्ने देवता
नांनृणां मध्यन्दिने शतं अपराह्णे पितृणां स्या
दिति शातपथी श्रुतिः तथाच लौगाक्षिगृह्य

पंचिका

69

© Dharmartha Trust J&K. Digitized by eGangotri

यदहस्त्वन्द्रस्तये भवति तस्मिन्नहनि पिंडपितृय
ज्ञः यदहनीति यस्यांचतुर्दश्यामित्यभिप्रेतव
न्तः ततश्चायंसूत्रवाक्यार्थः अपराह्णे वेला
यांचतुर्दशीमध्येतीणः चन्द्रोभवति तस्मिन्
कालेपितृयज्ञःकृते अमावस्यायाः प्रवेश
वेतिवाक्यार्थः तदनन्तरेचतुर्दश्यन्तेवातत्र
तीणचन्द्रमसो निर्वपेति पिंडपितृयज्ञपिंडा
निति शेषः अल्पमयममावास्यायामपिचतुर्द
श्यांपिंडान्वाहार्यकं श्राद्धं विधीयते यदि द्वि
तीयदिने मावस्यायाः तयो भवति यदुक्तं अ
मावस्याक्षीयमाणा तदैव श्राद्धमिष्यते यदा
चतुर्दशीयामं तुरीयमनुप्रपूरयेत् यदेवेति
चतुर्दश्यामेववा समस्ततुरीये प्रहरे चन्द्रम
सः तीणत्वात् अमावस्यादृष्टौ तु चतुर्दश्यां
किंतुपरदिने इतिवाक्यार्थः तथाचापस्तम्बा
सः श्रा चं दि ३० चं अ दि २८ अग्नतिपितृये पूर्वे

© Dharmartha Trust J&K. Digitized by eGangotri

सं
अ
८

ष्ठः आहं आवंटि १ चंश्रेश २ अत्र तिथिद्वैधेप
रेद्युः तथा चापराह्णे पीत्यमेव अमावस्याकृ
ष्णपक्षस्य पंचदशी तिथिः सा च सिनीवाली कु
हूश्चेति द्विधा दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा
कुहूः तत्र साग्निकैः सिनीवाल्यां आहं कार्यमि
तरैः कुहाम् व्यासः दृष्टचन्द्रा सिनीवाली
कार्या विशेषतः साग्निकैः नष्टचन्द्रा कुहूः कार्या
शूद्रैः विशेषैर्निरग्निकैः यत्तु पचेतसोक्तं सिनी
वालीकुहूश्चैव अक्षतेके पितृकर्मणि स्याता
चेतेतमध्याह्ने श्राद्धादि स्यात्कथं तदा तिथि

70

तये सिनीवाली तिथिद्वैधे कुहूर्मता सायं
पि च कुहूस्तेयावेद वेदाङ्ग वेदिभिरिति तत्र
तये सिनीवाली तिथिद्वैधे कुहूर्मता साम्य
पि च कुहूस्तेयावेद वेदाङ्ग वेदिभिरिति तत्र
तये सिनीवाल्यां पितृयज्ञो भवति तद्धयं श्रा
द्धे यदा कुहूकां पितृयज्ञस्तदा साग्निकैरपि से

© Dharmartha Trust J&K. Digitized by eGangotri

वथाहस्तापितृयज्ञानन्तरं हि श्राद्धं विहितं यदा
हमनुः पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमा
न् पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासि
कं तथा च श्रा॰चं॰प॰चं॰प्र॰दि॰ २५ तदेतदेवमा
थर्वोऽपि संजगाद द्वितीयादिमुहूर्तांशेष्वतिप
घपराह्णिकी अन्वाधानं चतुर्दश्यां दर्शोऽस्त्वसे
पि वर्तयेत् दर्शश्राद्धं तदा कार्यमिति बौधाय
नोदितं अस्यार्थः प्रतिपद्दिने द्वितीयात्मम
यादर्वाक् त्रिमुहूर्ता यदि स्यात्तदा प्रतिपद्दिष्टयो
ग्यान भवति अतः पूर्वेद्युरिष्टिस्ततो पूर्वेद्युः श्राद्ध
मुत्थाने तथा चाग्न्यासः श्रा॰चं॰दि॰ ३॰ चं॰प्र॰दि॰ १९
भौमदि २५ आदित्यवारे स्वल्पेऽपि दर्शे श्राद्धा
न्वथाने चन्द्रवारे प्रतिपद्यागः तथा पारिजा
तेऽपीदृशमेव अन्वाधानं दर्शे श्राद्धं पिण्डपितृ
यज्ञमेतिवाजसनीयिव्यतिरिक्तानामेकस्मिन् दि
ने कार्यमिति तथा चैव तिथिविभागेन दिन

© Dharmartha Trust J&K. Digitized by eGangotri

सं स्यापराह्णगत्वे सिद्धेमावस्यांश्राद्धतिथेरपरा
ग्रं ह्णव्यापित्वे विशेषंतिथिन्यासेन स्पष्टतिवाको
७१ पन्यासंदर्शयंते तत्रपूर्वेद्युरेवपराह्णेमावस्यां
स्पृशतिनपरेद्युः तदापूर्वेद्युरेवग्राह्या अ
त्रायांनास्तिसन्देहोदैवेपैत्र्येचकर्माणि इत्युक्तेः
यथा माघशे ग्रंशे अथवा आवंग्र चवग्र आ
व ग्रंम चग्रंदि २८ अत्रैवपारिजातेनामेकस्मिंदि
नेद्वयंकर्तव्यमिति यदातुपूर्वेद्युरेवापराह्ण
स्पर्शोनपरेद्युस्तदापूर्वैव अपराह्णःपितृणां
तितिहारीतोक्तेः यथा आवंदि ३० चेमदि २९
अपिच अपराह्णस्य पूर्वेद्युरेवस्वल्पेमहति
वास्पर्शे उत्तरेद्युरथिकेपिस्पर्शेतयेसास्येवा
गादिदलात्मभेदे फलेपविष्टेदिवागतेमिश्रा
दितिगणितदृष्ट्यादिवागतत्वेसिद्धेसर्वत्रपूर्वैव
यथा माचंदि ३० चेंग्रदि २८ आवंदि ३० चेग्रदि ३०
तथाच अक्षोभ्यसमयवेलायांकलामात्रापिया

71

© Dharmartha Trust J&K. Digitized by eGangotri

तिथिः सैवप्रत्याह्निके कार्या नापराह्णव्यापिनि
ता व्रतोपवासस्नानादौ दैविके कथा भवेत्
उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके उदि
ते दैवते भानौ पित्र्ये चास्तङ्गते रवौ उदिता को
दिनकृते ह्यस्तमिता कोपि पित्र्यनिशाकार्ये इत
रान्यतराभावे पर्वैस्तु ग्राह्या तिथिर्नान्या मनुः
यस्यामस्तं रविर्याति पितरस्तामुपासते सपि
तृभ्यो यतो दत्तो ह्यपराह्णः स्वयंभुवा याज्ञ
वल्क्यः देवकार्ये तिथिर्ज्ञेया यस्यामभ्युदितो
रविः पितृकार्ये तिथिर्ज्ञेया यस्यामस्तमितो र
विः नारदः जननमरणे चैव तिथिस्तात्का
लिकी मता पित्र्ये स्तमयवेलायां स्पृष्टा सं
पूर्णा निगद्यते तदेतादृशानि वाक्यानि दिवा
गतभेदेषु योज्यानि यदा तु पूर्वेद्युरस्तमयव्या
पिनी भूत्वा तिथिः परेद्युर्द्दिवशाद्धाविगा
मिनी प्रविष्टसंज्ञा जाता तदा परेद्युरेवेति के

© Dharmartha Trust J&K. Digitized by eGangotri

सं
ग्र
७२ वित् तथाच दर्शितंप्राक् अमावास्यादीयमा
रणान्तैदेव श्राद्धमिष्यते शुक्लगं सम्प्रदायस्त
श्रागामिनीतिथिंत्यक्त्वा यः कुर्याद् परेहनि स
समिद्धार्चिषं त्यक्त्वा भस्मनि तद्धुतं भवेत् शुचे
नाश्नन्ति पितरः अप्यस्तमयवेलायां कलामा
त्रापि यातिथिः
दार्शे च पौर्णमासे च पित्र्ये सांवत्सरे दिनम्
पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते इति पू
र्ववेधस्य प्राशस्त्यात् पूर्वैवास्तमयकलामात्र
व्यापिन्यपि श्राद्धे न परेति यथैकादशी पूर्वे
द्युः सम्पूर्णापि भूत्वा परेद्युरुदये कलामात्र
व्यापिन्यपि परवेधप्राशस्त्यात् परैवोपोष्यते
न पूर्वा सम्पूर्णेति प्रमाणयन्ति च दर्शयति
चापरार्कविचार सा चेत्सायाह्नमात्रव्यापिनी
स्यात्तदा सायाह्न एव दार्शे च पौर्णमासे चे
ति व्याघ्रपद वचनबलेन न पुनरुदयास्त

72

© Dharmartha Trust J&K. Digitized by eGangotri

मयपर्यन्तायामिति अपराह्णव्यापिन्याममाया
ह्णपर इति श्राद्धप्रकरणे ननु मुहूर्तेष्वित
यंशात्तत्त्वावानेव च संगवः मध्याह्नस्त्विष्ट
तः स्यादपराह्णोपि तादृशः सायाह्नस्त्रिमु
हूर्तः स्यात् श्राद्धं तत्र न कारयेत् राक्षसी नाम
सा वेला गर्हिता श्राद्धकर्मसु इत्यादिव्यासादि
वचनबलात् सायाह्नव्यापिनी तिथिः श्राद्धे ति
थिर्हा दिनस्य पंचधा विभक्तस्य चतुर्थभाग
वाचकमपराह्णं याप्नोति सैव श्राद्धे वि
हिता तत्कथं कुतपादिसर्वेत्रगासस्पृहाप्र
स्याः सप्तमय पर्यन्तस्यापिनी हि द्विमती
पर्यंतिथिंस्पृक्तादिनस्य त्रिधा विभागेनाप
राह्णसंज्ञामाश्रित्य ह्यद्वैधुरनमये पिक
ला मात्रव्यापिन्यां तिथावादर इति चेत्
सत्यं अयं श्राद्धे सायाह्ननिषेधः कुतपा
दिमुहूर्तपंचकविधिश्च श्राद्धानुष्ठान

© Dharmartha Trust J&K. Digitized by eGangotri

सं. श्र. ७३

वेलामेवनिषेधयतिबोधयतिच नतुमाया
ह्नव्यापिनीतिथेः श्राद्धेयाह्त्वाभावः नवाऽ
तपादिमुहूर्तपंचकतिथेर्ग्राह्यतावा तथाहि
यथा सन्ध्यारात्र्योरत्रकर्तव्यं श्राद्धं खलुविच
क्षणैः तयोरपिच कर्तव्यं यदिस्याद्राहुदर्श
नमित्येषनिषेधः सन्ध्यासमयेरात्रिसमयेच
श्राद्धंनकरणीयमित्येतमर्थमवबोधयति
नतुसन्ध्याव्यापिन्यांतिथौरात्रिव्यापिन्यांवा
तिथौइति तथैवमुख्यकालेयदावश्यंकर्म
कर्तुंनशक्यते गौणकालेपिकर्तव्यंगौणा
प्यत्रेदृशोभवेदिति दिवोदितानिकर्माणि॰
प्रमादादकृतानिचेत् यामिन्याःप्रहरेया
वत्तानिसर्वाणिकारयेत् इति कदाचिन्मु॰
ख्यकालालाभेगौणकालानुष्ठेयतयाश्राद्धं
सायाह्नसमयेकर्तव्यतयाप्राप्तंसत्तदेवनि
षेधयति श्राद्धंकदाचिदपिसायाह्नेकर्तव्यं

73

© Dharmartha Trust J&K. Digitized by eGangotri

नेति तथैव ऊर्ध्वं मुहूर्तात्कुतपायन्मुहूर्तच
तुष्टयं मुहूर्तपंचकं ह्येतत्स्वधावाचनमिष्यते
कुतपाद्यान्मुहूर्तांस्त्रीन्यदा चरति भास्करः
स कालः कुतपस्तत्र पितृणां दत्तमक्षयमिति
पार्वणश्राद्धे प्रारभ्य कुतपे श्राद्धं कुर्याद्रौहि
णं तु यः विधिज्ञो विधिमास्थाय रौहिणं न तु लं
घयेदित्येकोद्दिष्टश्राद्धे श्राद्धकरणवेलामेव
गणयति न तु कुतपादिव्यापिन्याः श्राद्धतिथे
र्ग्राह्यतामिति सिद्धम् तथा च ग्रन्थान्तरेपि
एकोद्दिष्टश्राद्धकरणकालमाह व्यासः
कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् आ
वर्तनसमीपे वा तत्रैव नियतात्मवान् शंखः
पूर्वाह्णे दैविकं कर्म अपराह्णे पितृक्रिया
ग्रहणे निशि वा कुर्यान्न रात्रौ पैतृकं पुनरिति
सायाह्नकालोपि यमेन प्रतिषिद्धः सायाह्न
स्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत् राक्षसी

© Dharmartha Trust J&K. Digitized by eGangotri

सं नामसावेलागर्हिता सर्वकर्मसु ननु अपरा
श्र ह्णेपि यदा कदाचित्सत्त्वहस्तदा श्राद्धस्य किं
७४ लोपएव किं वा साधुंराद्यावपिकर्तुं शक्यते
तत्र लोपएवेति तावत्सामं मुख्यकालाला
भे गौणकालस्य निषेधात् प्रतिषेधति मनुः
रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा
सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते त
स्माच्छ्राद्धकरणे कुतपएव प्रारंभः तत्स्वरूपं
75 भविष्यत्पुराणे प्रविश्य भानुः साच्छायांशो
ऽवघ्यतिष्ठति सकालः कुतपो नाम मन्त्रीथ्
तस्य संज्ञयेति आपस्तम्बो विशेषमाह सप्त
मासरतोयस्तु नवमात्सर्वतः स्थितः उभयो
रपि मध्यस्थः सकालः कुतपः स्मृतः दिवसस्या
ष्टमे भागे मन्दीभवति भास्करः सकालः कुतपो
नाम पितॄणां दत्तमक्षयमिति कुतपे प्रक्रान्तस्य
सायाह्नादर्वाचीनः सर्वोपि श्राद्धानुष्ठानकालः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ऊर्ध्वंमुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयम् मुहू
र्तपंचकंह्येतत्स्वधावाचनमिष्यते इति
तथाचापरार्केपि प्रश्नः षट्सुमुहूर्तेषुगतेषु
वणतान्द्विजान् प्रत्येकंप्रेषयेत्प्रेष्यंस्नानार्थं
चामलोदकम् स्नातःस्नातान्स्वागतेनतान्द्वि
जानर्चयेत्पृथक् स्थितान्देशेविविक्तेतुप्रकी
र्णतिलबर्हिषि अपराह्णेसमभ्यर्च्यस्वागते
नागतान्द्विजान् पवित्रपाणिराचान्तानास
नेषूपवेशयेत् युग्मान्दैवेयथाशक्तिपित्र्ये
युग्मांस्तथैवचेति मार्कण्डेयवाक्ये अपरा
ह्णेसमभ्यर्च्येत्यत्रसन्देहः किंद्विविभक्त
स्याह्नउत्तरोभागोपराह्णः किंवापंचधा
विभक्तस्यचतुर्थइति तत्रकेचिदाहुः पंच
धाविभक्तस्याह्नश्चतुर्थोभागोपराह्णइति
तथाचश्रुतिः आदित्योवैसर्वेऋतवःस
यदैवोदेत्यथवसन्तोयदासंगवोथग्रीष्मः

© Dharmartha Trust J&K. Digitized by eGangotri

सं यदा मध्यन्दिनोर्ध्ववर्षाः यदा पराह्णेणाथ श्र
प्र रद्यदास्तमेत्यथ हेमन्त इति श्रौतादिप्रयोगा
७५ त्पं च यथा विभक्तस्याह्नस्तुर्यो भागो पराह्ण
शाह्ववाच्य इति तदन्येनानुमन्यन्ते तेहिम
न्यन्ते नैवाः सात्मयोगाल्लौकिको वाच्यनियमो
वधारयितुं

75

इत्यादौ श्राद्धकरणवेलाविचार एव न तु श्रा
द्धतिथेर्ग्राह्यताविचारः अनेनैव प्रकारेणात
याह्नतिथिरपि विचार्या तथा च तयाह्नलन
रं मासपतन्तिथिस्पृष्टेयो यास्मिन्द्रियतेहनि
प्रत्यहं च तथा भूतं तयाहं तस्य तं विदुः मासो
ग्रचान्द्रः सौरो मासो विवाहादौ सावनो यज्ञ
कर्माणि श्राद्धिके पितृकृत्ये च चान्द्रो मासो
विधीयते स चान्द्रोपि मासो द्विधा पूर्णि
मान्तो दर्शान्तश्च ॥

© Dharmartha Trust J&K. Digitized by eGangotri

विम्बस्थोन्तरे पूर्णिमान्तः विम्बस्यदर्शितेगे
दर्शान्तः गर्गः पूर्णिमाघवमानः स्यान्मा
सोदैवकृतस्तथा दर्शान्तोमानुषोह्यतो
विम्बाडन्तरयाम्यगो यतः शुक्लः कृस्णोवा
तिथिश्चान्द्रावहोरात्रः ब्रह्मसिद्धान्ते सावनः
स्यादहोरात्रउदयाडुदयं रवेः सौरस्त्रिंशता
राश्यन्तस्तिथिः संभोगमैन्दवम् स्कान्दे
प्रमादिपौर्णमास्यन्तायापवशशिनः कला
तिथयस्ताः समाख्याताः षोडशैववरानने
तत्रादित्यसन्तोपलक्षितः पंचदशमुहूर्तः
कालोदिनं तस्यद्विधात्रिधापंचधापंचद
शधाचेति पद्मभोगकल्पनायथोपयोगम्
तत्रद्विधाविभागः स्कान्दे आवर्तनात्तुपू
र्वाह्णोह्यपराह्णस्ततःपरं त्रिधाविभागेपा
तातपः पूर्वाह्णोदेवानांमध्याह्णोमनुष्या
णामपराह्णः पितॄणामिति पंचधाविभा

© Dharmartha Trust J&K. Digitized by eGangotri

सं
ग्रं
७६

गंव्यासः मुहूर्तत्रितयं प्रातस्तावानेव च सं
गवः मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोपि
तादृशः सायाह्नस्त्रिमुहूर्तः स्यात्सर्वक
र्मसु गर्हितः पराशरोपि उदयात्प्रादितो·
यावत्त्रिमुहूर्तं गतो रविः प्रातः कालः स वि
ज्ञेयो दिनभागस्य पंचमः तस्मात्प्रातस्तना
त्कालात्त्रिमुहूर्तस्तु संगवः त्रिमुहूर्तस्तु म
ध्याह्नस्तस्मात्संगवकालतः तस्मान्मध्या
ह्निकाकालादपराह्णस्तथाविधः ॥
अपराह्णात्त्रिमुहूर्तः कालः सायाह्न उच्य
ते इति पंचधा पंचदशधा व्यासः
रौद्रश्चैत्रश्च मैत्रश्च तथा चारभटः स्मृतः
सावित्रश्च जयन्तश्च गान्धर्वः कुतपः तथा
रौहिणश्च विरिंचश्च विज्ञेयो नैर्ऋतस्त
था माहेन्द्रो वरुणश्चैव भागाः पंचदशः
स्मृतः इति पंचदशधा विभागः ॥

76

© Dharmartha Trust J&K. Digitized by eGangotri

अथाह्नोष्टद्धो प्रातरादिकालस्यापि त्रिमुहूर्ती
यिकत्वं कल्पनीयं ह्रासे तु त्रिमुहूर्तत्वस्यानवम्
अथवा दिनस्य यः पंचदशो विभागो रात्रेस्त
स्यात्तद्द्विमुहूर्तमानमिति रत्नमालोक्तेः दिन
मानस्याष्टधा ह्रासे वा पंचदशो भागो मुहूर्त इ
त्येवंप्रकारेण गणनीयम् अपि च बौधायनः
प्रातः संध्या त्रिनाडी स्यात्सायं संध्या च ताद
शी महानिशा तु विज्ञेया चतस्रो घटिका हि
याः सार्धघटिका दिनस्य सार्धघटिका रात्रेरि
ति नाडीत्रयं संध्या अथैषां विभागानामुपयो
गो यथायथं व्याख्यातो व्याख्यास्यते च तथा
च निर्णयास्तु ते श्राद्धप्रकरणे श्राद्धस्वरूपे
मरीचिः प्रेतान्पितॄंश्च समुद्दिश्य भोज्यादि प्रि
यमात्मनः श्रद्धया दीयते यत्तु तच्छ्राद्धं परि
कीर्तितं तच्छ्राद्धं द्विविधमेकोद्दिष्टं पार्वणं
चेति कण्वः एकमुद्दिश्य यच्छ्राद्धमेकोद्दि

© Dharmartha Trust J&K. Digitized by eGangotri

से

ग्रं

११

ष्टं तदुच्यते चीत्रहिश्रपतयन्नह्नि पार्वणं सङ्ग
दीरितं तच्चनित्यनैमित्तिककाम्यभेदेन
त्रिविधं कात्यायनः मृताहेहरहर्दर्शश्राद्धं
यश्चमहालये तन्नित्यमुदितं सद्भिर्निव्यवर्त
द्वितीयते नैमित्तिकं गालवः प्रेतश्राद्धं सपि
ण्डनं संक्रान्तिग्रहणेषु च संवत्सरादूर्ध्वं
चवृद्धिश्राद्धं निमित्ततः काम्यं च तेनैवोक्तम्
दिव्यादिषु च यच्छ्राद्धं मन्वादिषु युगादिषु
फलभ्येषु च योगेषु तत्काम्यं समुदाहृतम्
यदुक्तं नित्यं श्राद्धं मृताहेहरहरहरित्यादि
तत्र मृताहस्य पूर्वोद्दिष्टत्वेन पूर्वं निर्णीय
त्वेपि तन्निर्णयस्य प्रत्याब्दिकेप्येवमेवेत्य
मावस्यातुल्यत्वादमावस्यानन्तरमे
ववक्ष्यते तत्र त्रिधाविभक्तस्या
ह्नस्तृतीयो भागोप
राह्णः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथ कोद्दिष्टानां षोडशश्राद्धानां कालः संप्र
दीयते तत्रैकोद्दिष्टं तु मध्याह्ने इत्यादिवच
नैः मध्याह्नकालव्यापिनी तिथिर्ग्राह्या म
ध्याह्नश्च पंचधा विभक्तस्याह्नस्तृतीयो भागः
ननु पितृकर्मण्यपराह्णस्य विहितत्वात्कथ
मत्र तत्परित्यागे मध्याह्नकालव्यापिनी तिथि
र्ग्राह्येति सत्यं अत्र त्वपि आवर्तनात्पूर्वाह्णो
ह्यपराह्णस्ततः परमिति द्विधा विभागाद
पराह्णव्याप्तिः अत एव येऽह्नो मध्यमावर्तना
संतं कालमेकोद्दिष्टतिथिव्यापकं वदन्ति
स्वकपोलकल्पितं तेषां तन्त्रा एव तत्रापराह्ण
स्याव्याप्तेः नदस्य मध्याह्नस्य मायवसंग्रह्णी
त्वभेदनिदर्शनानुमात्रेण न तु कालव्याप्तिं
तस्य प्रतिपादकाः स्मृतीश्च दर्शयामः प्रातः
संगव मध्याह्नाः पराह्णः सायमित्यसौ
अत्राह्नः पंचधा भागो मुख्यो द्विधादि भागतः

© Dharmartha Trust J&K. Digitized by eGangotri

सं अस्यार्थः द्विधा त्रिधा पंचधा पंचदशधेति
प्र॰ भागश्च तत्प्रत्यान्तरात्पंचधाविभागः स्मार्त
१८ कर्मानुष्ठाने ग्राह्यः एवं मध्याह्नं निर्णीयत
तद्व्याप्तिमेकोद्दिष्टे निश्चिनोति एकोद्दिष्ट
तु मध्याह्नयुक्तः स्यादेकभक्तवत् एकदेश
समव्याप्तौ तयोः पूर्वान्ययोत्तरा एकभक्ते तु
गृहीतव्या त्वेकभक्ते मध्याह्नव्याप्तिरित्युक्ता
परेद्युरेव पूर्वेद्युरेव व्याप्तिर्दिनद्वये उभयत्रो
भयव्यांशे साम्ये वैषम्यमित्यमी षट्वृतंस्ते
ष्वैकैकव्याप्तौ सैवाभ्यस्यताम् द्विनं द्वये
पि तद्व्याप्तावव्याप्तौ चैकदेशतः समव्याप्तौ च
पूर्वैव वैषम्ये त्वधिकेष्यताम् इति
अस्यार्थः मध्याह्नं कृत्स्नं व्याप्नोति एकः
एतः मध्याह्नं कृत्स्नं न स्पृशतीति द्वितीयः
मध्याह्नैकदेशं व्याप्नोतीति तृतीयः तत्र कृ
त्स्नव्याप्तिस्त्रिधा भिद्यते अपरेद्युः कृत्स्नं व्याप्नोति

78

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वेद्युः कृत्स्नं व्याप्नोति उभयत्र कृत्स्नं व्याप्नो
तीति एकदेशव्याप्तिर्द्विधा समव्याप्तिर्विषम
व्याप्तिश्च पूर्वेद्युर्मध्याह्नस्यापरभागं प्राप्नो
ति परेद्युर्मध्याह्नस्य पूर्वभागमिति समव्या
प्तिः तयोर्भागयोर्न्यूनाधिकव्याप्तौ विषम
व्याप्तिरित्युच्यते तत्र कृत्स्नव्याप्तिपक्षास्त्र
यः अंशसंस्पर्शिपक्षश्चतुर्थः अंशव्याप्तिः प
क्षौ द्वौ एवं षट्पक्षाः सम्पद्यन्ते तत्र पूर्वेद्यु
रेव कृत्स्नव्याप्तिरिति प्रथमे पक्षे परातिथि
रेव ग्राह्या पूर्वेद्युरेव कृत्स्नव्याप्तिरिति द्विती
ये पक्षे दिनद्वये कृत्स्नव्याप्तिरिति तृतीये
दिनद्वयेऽप्यव्याप्तिरिति चतुर्थे दिनद्वये
समव्याप्तिरित्यस्मिन्पञ्चमे पक्षे च पूर्वोक्तति
थिरेव ग्राह्या दिनद्वये विषमव्याप्तिरित्यस्मि
न्षष्ठे पक्षेऽधिकव्याप्तियुता ग्राह्या इत्येवमे
कभक्ते पक्षषट्के निर्णीतं तदेव दिनद्वयेऽप्येश

सं समव्याप्तिरित्येतं पंचमतं परिहृत्यैकोद्दिष्टे
प पि अवशिष्टेषु पक्षेषु पक्वभक्तन्यायेनति
७५ थिर्निर्णीतव्या पंचमेतु पक्षे ग्राह्यतिथेद्वै
तयसाम्ये निर्णयः तत्र परेद्युरेव कृत्स्नव्या
प्तिर्यथा श्राश्वे दि २० चप्रदि १८ अत्र कृत्स्न
समव्याप्तस्य घटिकाषट्कात्मकस्य कृत्स्नव्या
प्ततिथेः प्रतिपदि परेद्युस्त्वन्द्वावरव्याप्तिरि
79 तिविप्रतिपत्त्यभावात्पैतृवेषा १ पूर्वेद्युः
कृत्स्नस्य व्याप्तिर्यथा श्राश्वे दि १२ चंप्रदि ११
अत्र पूर्वेद्युरादित्यवारे पक्षग्राह्यतिथेः प्रति
पदि पूर्णाम्रव्याप्त्याप्तिर्न परेद्युरिति हि
सा स्यात्पौर्वकालिकीति वचनात्पैतृवेषा २
उभयत्र कृत्स्नव्याप्तिर्यथा श्राश्वे दि १२ चंप्रदि १८
अत्रादित्यवारे ग्राह्यतिथिः प्रतिपत्कृत्स्नष
ट्टिकात्मकं मध्याह्ने स्पृशति। चन्द्रेपित
थैव अत्रागामिनीतिथिरित्याम्नायः।

© Dharmartha Trust J&K. Digitized by eGangotri

कुर्यादपरेऽहनि स्वसमिद्धार्चिषं त्यक्त्वा तद्दस्त
निकृतं भवेत् कुरवेनाग्निपितरश्चत्यादिस्मृते
पूर्वैवैषा ३ उभयत्राव्याप्तिर्यथा श्राद्धे दि ९
वं प्रति १२ आदित्यवारे चन्द्रवारे च श्राद्धतिथिः
प्रतिपन्मध्याह्ने न स्पृशतीति पक्षोभयत्र मध्या
ह्ने स्पर्शाभावस्तत्र पूर्वैव देवपितृकार्येषु पूर्वैवा
ह्नायाः प्राशस्त्यादिति पारिजातादिस्मरणाद्
यमपि पूर्वैव ४ समैकदेशव्याप्तिर्यथा श्राद्धे
दि १५ चप्रदि १५ आदित्यवारे मध्याह्ने प्रथम
भागं नाडीत्रयं व्याप्नोति चन्द्रेप्येवं पश्चिमभा
गं नाडीत्रिकं व्याप्नोति अत्रैकदेशसमव्या
प्तौ तथैव पूर्वान्यथोत्तरेति माधवसंग्रहाद्यव
गन्तव्या तथा चोक्तं खर्वो दर्पस्तथा हिंसा त्रिवि
धं तिथिलक्षणं खर्वदर्पौ परौ पूज्यौ हिंसा स्या
त्पूर्वकालिकी खर्वो नाम तिथिः साम्यं दर्पो
वृद्धिः हिंसा क्षयः यथा श्राद्धे दि १५ चप्रदि १५

© Dharmartha Trust J&K. Digitized by eGangotri

सं
दी
८०

इयं षष्टिघटीस्थानात्साम्येन पञ्चैव खर्वत्वात्
आश्वदि १५ चशदि १६।४। अत्र पंक्तिषष्टिका
वस्थानेन वृद्धिमती प्रतिपदिति दर्पनादि
यमपि पञ्चैव आश्वदि १५ चशदि १४ अत्रैकोन
षष्टिघटिकावस्थानात्क्षीणात्प्रतिपद्धीनत्वा
त्पञ्चैव ५ अथ षष्ठः पक्षः तयोर्भागयोरून्ना
धिकत्वाभ्यां विषमत्वाभिर्यथा आश्वदि १४
चशदि १५ अत्र प्रतिपत्सर्वेद्युर्मध्यात्प्रथम
भागेनाडीचतुष्कावस्थानादधिकं परेद्युस्तु
चरमभागेनाडीत्रयावस्थानान्न्यूनं गृह्णाती
त्येषाधिकेन न्यूनेवत्र न्यूनैव आश्वदि १६ चश
दि १५ अत्र सर्वेद्युर्मध्यात्प्रथमभागेनाडी
द्वयावस्थानात्प्रतिपन्न्यूनं गृह्णाति परेद्यु
स्तु पश्चिमभागेनाडीत्रयावस्थानादधिकमि
त्यत्र पञ्चैवाधिकात् तथा चासिद्धं वैषम्येत्व
धिकेष्यतामिति ॥

80

© Dharmartha Trust J&K. Digitized by eGangotri

एतदेवानन्तोपि ग्रन्थैकस्मिन्कर्मतिथिर्भूय
सी एकस्मिन्नल्पा तदा विप्रतिषेधसमवाये
भूयसां स्यात्सधर्मत्वमिति न्यायेन भूयसी ग्रा
ह्येति एतान्येकोद्दिष्टश्राद्धानि एकादश:
मासिकानि आद्यमौर्ध्वदैहिकं द्विपाक्षिकं ष
च पाक्षिके ऊनषाण्मासिकमूनसांवत्सरिकं
चेति तत्राद्यस्यौर्ध्वदैहिकस्योनाब्दयस्य च नि
यप्राधान्येन पृथक्कालो न विचार्यः तथा
द्याद्यौर्ध्वदैहिकस्यैकादशाह एव कार्यत्वात्
गतार्थत्वं ऊनाब्दयस्य तु षाण्मासिकादूर्ध्व
नेस्यात्तां पूर्वेद्युरेवेति षाण्मासिकादि
कपूर्वकालतयानत्पूर्वेद्युरेव नियमः तत्पृथ
क्त्वप्राधान्येन निर्णीतं चैतत्प्रधानसविवा
दंगामीत्यत्र मीमांसकैः तथैव देवमाधवो
पि प्रत्याब्दमेकभक्तादेः कालस्त्वस्यानुसा
रतः प्रथमाह्निकस्य च षोडशातिरेकेन तत्पृ

© Dharmartha Trust J&K. Digitized by eGangotri

सं द्धिर्देशात्मार्वण्णतयाकर्तव्यत्वे सिद्धे दार्शे
चपौर्णमासंचपिंडो: सेवनस्य रंदिनमितिव
८१ चनात्सर्वैवेथ श्रा द्धस्यानस्यायंकालव्याप्येव
विचारोनतुमध्याह्नव्याप्येतिसिद्धिः अथ
पारिजातमाधवयोर्मतेनदर्शतयाहतिथि
निर्णयः तत्रतावत्पारिजातेद्वेधाविभागे
योयमपराह्णःसस्मृताहश्राद्धादौ यथा
81 मासपक्षतिथिस्पृष्टेइतित्तयाहविचारे
माघदाघ्रुघ्ना तदानविचारः यदातुविद्धा
तदायत्रसायाह्केत्रिमुहूर्तव्यापिनीस्यात्ति
थिःसाग्राह्येत्यादि पंचधापंचदशधायोयं
विभागः सदर्शश्राद्धादौ ग्राह्येति पृथक्पृथ
गेवतयाहदर्शतिथिविचारः माधवस्तुपंच
धाविभागपक्षापराह्णेणाहृयोर्दर्शतयोस्तुल्य
इति सिद्धान्तितवान् तथाचोक्तं श्रुत्राह्नः
पंचधाप्यत्रयोभागोह्निप्रादिभागतः तथाव

© Dharmartha Trust J&K. Digitized by eGangotri

दिनस्य पंचधा विभक्तस्य चतुर्थभागापराह्ण
बलम्बेनतया हविचारोत्र उतपाद्यपराह्णग
तव्याप्तिराधिकउक्तम तदभावेपराह्णास
व्यापिकागृह्यतोतिथिः तथेपूर्वेद्युकर्तव्याह
ह्नैकार्यातथामरा तिथ्यादौचभवेद्यावाह्ण
सोवृद्धिःपरेहनि तावान्त्राह्यःसर्वेषुरदृष्टो
पिस्वकर्मणि तिथ्यादीत्यादिशब्देनयत्रयोगो
नगृह्यते तथाह्यतिथियोगोवृद्धितयोऊर्ध्वति
थेस्तुतो साम्येऊर्ध्वतिथेर्ग्राह्यापरहृद्दैवह
ह्निवत् नस्पृशत्यपराह्णेवापूर्वास्यात्काल
तयोर्वृथा ययास्तंसवितायातिपितरस्ताम
पासते वैषम्येनैकदेशस्यव्याप्याग्राह्यामह
त्वतः साम्येनचेत्तयेपूर्वापरास्यावृद्धिसाम्य
योः वृद्धिसाम्यतयाग्राह्यतिथिर्गोनार्धगार
ह एवर्वदर्पोपरोपूज्योहिंसास्यात्योचकालि
की एवर्वसाम्यमत्यन्ततयोवा दर्पोवृद्धिः हिं

© Dharmartha Trust J&K. Digitized by eGangotri

सं सान्तपिकस्तपः अस्यार्थः अन्त्योष्ठमोष्ठस्तनः
प कुतपः द्वादशोनापराह्णः समाप्यते तथा सति
८२ कुतपादिमुहूर्तपंचव्यापिनी तिथिः प्रत्याब्दि
केप्रशस्ता आश्वंदि १४ चप्रदि १४ अत्रपूर्वेद्यु
रेवग्राह्यतिथिः प्रतिपत् कुतपादिमुहूर्तपंचकेव्या
चकव्याप्तिरिति परेवः तदभावे कुतपादिमु
हूर्तपंचकव्याप्त्यसंभवे त्वपराह्णव्याप्तिरि
त्यनयोः पक्षयोर्निर्णयः स्पष्टः यथा आश्वं
दि १९ चंप्रदि १४ अत्रपूर्वेद्युरेव व्याप्तिरित्यन
योः प्रतिपद्ग्राह्यतिथिः १ आश्वंदि २५ चंप्रदि २४
अत्रपरेद्युरेव उभयत्रव्याप्तिरित्यस्मिंस्तृतीये
पक्षे ग्राह्यतिथ्येर्वृद्धितिथिगताद्वृद्धिसाम्यत
याग्राह्याः तत्त्रये सति ग्राह्यतिथिः पूर्वविद्धा
ग्राह्या वृद्धिसाम्ययोस्तु परविद्धा यथा आश्वं
दि १८ चप्रदि २४ सौहिदि २८ इयमूर्ध्वति
थेर्द्वितीयाया वृद्धेः परविद्धा प्रतिपत् आश्वंदि १८

[प्रोति पूर्वैव आश्वंदि २४ चंप्रदि २५ अत्रपूर्वेद्युरेव कुतपादिमुहूर्तपं]

© Dharmartha Trust J&K. Digitized by eGangotri

चंप्रदि २४ भौद्विदि २४ इत्येवोर्ध्वतिथेः द्वितीया
याः साम्येन परैव प्रतिपत् श्रांप्रदि १४ चप्रदि [illegible]
भौद्विदि २२ इत्यपूर्वतिथेः द्वितीयायाः त्रयेण
पूर्वैव प्रतिपत् इत्युभयत्र व्याप्त्या तृतीयः पक्षः
यदा दिनद्वयेण पराह्णस्पर्शो नास्ति तदा यद्यपि
परेद्युः कुतपव्याप्तिः स्यात्तथापि साम्याज्या पूर्व
विद्धैव ग्राह्या यथा श्रांप्रदि २४ चंप्रदि १४ इयं
पूर्वैव अत्र हेतुमयमेवाह कुतपोह्रस्या यया
स्तस्य वितायाति पितरस्तामुपासते इति ॥ सा
म्येनैकदेशो व्याप्तिरित्यस्मिन्नपि पक्षे तु याप्र
तिपद्विगतानुद्विसाम्यतयान्यरीत्यत्वये पू
र्वोद्वद्विसाम्ययोस्तत्र रेतिनिर्णयः यथा श्रां
प्रदि २। चंप्रदि २। अत्र पूर्वेद्युरपराह्णप्रथम
भागं नाडीद्वयं प्रतिपद्व्याप्नोति अपरेद्युरपराह्ण
चरमभागं नाडीद्वयं साम्येनैकदेशो व्याप्नोति
इयं षष्टित्रिघटिकावस्थानात्साम्या प्रतिपत्परैव

© Dharmartha Trust J&K. Digitized by eGangotri

सं प ८६

आश्वं दि ३१ चप्रदि २० चं ३० अत्रैकोनषष्टिघटि
कावस्थानात्तीणा प्रतिपत्सर्वा आश्वं दि ३१
चं प्रदि २२ प्रागवत्समैकदेशव्याप्ताप्रतिपदि
यमेकषष्टिघटिवस्थानाद्दहिमतीमती परा ५
अपराह्णैकदेशस्यैवषम्येण व्याप्तिरित्यष्टेप
ते मद्दत्वे निर्णयहेतुः तयोर्भागयोस्तनाधि
कव्याप्तौ विषमव्याप्तिर्यथा आश्वं दि २० चंप्र
दि ३१ अत्र प्रतिपत्सैवपूरपराह्णप्रथमभागं
नाडीचतुष्कं स्पृशति परेद्युर्नाडीत्रयमिति
पूर्वैवाधिकात्सर्वा आश्वं दि २२ चंप्रदि ३१
इयं पूर्वैवपूरपराह्णप्रथमभागे नाडीद्वयं स्पृ
शति परेद्युस्तु पश्चिमभागे त्रयमिति परत्रा
धिकात्परैव एवमेवान्यत्रापि न्यूनाधिकव्या
प्त्याविषमव्याप्तिः निर्णेया ॥ ॐ
अथामावास्याप्रसङ्गेन पिंडपितृयज्ञेष्टोः
पूर्वोत्तरदिनानियमात्यागकालोपि प्रायशः

83

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वविद्धायामेवप्रतिपत्तिथ्यौ इतिप्रकाश्यते
तथाचश्रुतिः पत्नान्तउपवस्तव्याः पत्नादयो
यष्टव्या इतिश्रुतिः अदर्शनेसमस्तपर्णताचेति
पत्नान्तलक्षणाम् सुजननेसूर्णत्वमिति
पत्नादिलक्षणं पर्वप्रतिपदोः सन्धिमभि
यज्ञेतेत्यभितः पटस्योभयत इत्यर्थः साचो
भयतः सन्धिरग्रेप्रकाश्यते तथाच निर्णी
तमेतदनन्तभट्टादिभिर्विस्तरेण तदेवंपिंड
पितृयज्ञेष्टयोः पूर्वोत्तरदिनयोर्नियमादेक
स्यकालेनिर्णीतेनियमेनेतरस्यापिकाल
निर्णयोर्थादवश्यंभावीति पूर्वेद्युःपितृभ्यो
यज्ञंनिष्क्रीणीयप्रातः देवेभ्यः प्रतनुते इ
त्यनयैवश्रुत्यैवोत्कर्षशंकानिरस्ता अकु
त्वपत्तेविविधेयान्तराभावात्क्रमपरैवश्रु
तिः तस्मादपिनोत्कर्षः पिंडपितृयज्ञस्यतदे
वंनियते पिंडपितृयज्ञेनोत्तरेद्युर्दर्शेष्टिरि

© Dharmartha Trust J&K. Digitized by eGangotri

सं त्यपिनिर्णीतं तदेवं पिंडपितृयज्ञेष्ट्योः पूर्वो
ग्रं त्तरदिनयोः नैयमादेकस्य कालस्य नियमे
८४ नैतस्यापि कालस्य निर्णयो ऽवश्यंभावी तथा
पि क्वचिद्विशेषार्थेषु कालनिरूप्यते इत्या
दि तस्मादमावस्यातीयमाणान्तदेव श्राद्ध
मिष्यते यदा चतुर्दशी यामं तुरीयमनुपूरये
त् इति न्यायेन प्रतिपत्क्षये पूर्वदिने यागः
द्वैहोतु परदिने इति संगतं लौगाक्षिसमुद्दि
ष्टया ऽदयात्समयं यावत्क्षीणा न याच पूर्णता
तद्भागेन वधा कृता यागं तत्र पवीतयेत् श्री
नेशानैः पवस्य यागस्य चतुरो विदुः द्वावे
शा वुत्सृजेदन्यो यागे च व्रतकर्मणीति या
गकालगणनयायमवार्थः समादिष्टः
व्याख्याने चैतदनन्ते यद्दिने पूर्णचन्द्रता भव
ति ततः पूर्णचन्द्रघटीमारभ्य हीनचन्द्रघटिको
यावत् सर्वाघटिकाः एकीकृत्य नवभिर्भागं कुर्यात्
नेषु नवस्वभागेषु

84

© Dharmartha Trust J&K. Digitized by eGangotri

अन्त्योद्वावंशौ पंचदशी प्रतिपत्सन्धावुभौ उ
त्सृजेत्सपरित्यजेत् अन्त्यमंशं पंचदश्याव्रत
कर्मणि यागे च प्रतिपत्स्वाद्यमंशमिति
यथा मार्गश्रुति शुक्ले च प ९ सूर्यं च गि २२ श
निवारे शुप्र ४ आदित्यवारे प्रदि २४ ही चं
गि १५ दिनमानं २५ च अत्र सर्वे सूर्यगता द्दिही
नतापर्यन्तं घटीत्रयोदशाधिकं शतमेकं त
स्य नवधा भागकरणे प्रतिभागं सार्धघटि
का द्वादशकं संभवति तत्र शुक्ले द्वाविंशद्घ
टिकोत्तरमेकस्मिन्पंचदशं शे घटिकासा
र्धद्वादशके न्यस्के वसिष्ठास्त्रयो भागाः सा
र्धसप्तत्रिंशद्घटिकापरिमिताः शनिवारे दि
नघटिकासार्धैकादशकं यावत्पर्यन्ते तत्सा
कुनिवागपर्वोपवस्त्र ततः शनिवारे घटि
कैकादशकाहर्ध्ययागस्य चत्वारो भागा घटी
पंचाशतिः प्रतिपदो न्त्ये भागे सार्धद्वादश

© Dharmartha Trust J&K. Digitized by eGangotri

सं घटिकाप्तके त्यक्ते वसिष्टः प्रथमोंशाः घटी
अं द्वादशकं चेति सर्वो यागकालो घटी द्वाषष्टिः
८५ आदित्यवारे दिननाडी द्वादकं तावत्पर्यन्ते त
स्मादत्रैवादित्यवारे यागकालः तथा चात्रैव
पौवतिचन्द्रे घटि २२ अं चं रा ३ भौ आदि २४उ
प्रथ । ३ चं गि १९ दिनमानं घटी २४ चं ५२ अ
नन्तपाउदयं यावत् सर्वोनवोत्रं घटिकाश
तमेकं भवति नवभागे प्रति भागं द्वादशांशा
भवंति तत्र चन्द्रे सप्तविंशति घटिकोर्धमेक
स्मिन्पंचदशं पंशे नाडी द्वादके त्यक्ते वसिष्टास्त
योंशाः घटी षड्विंशकं भौमे दिनघटी पंचदश
यावत्पर्यन्ते तस्मादत्र भौमवारे गे पव स्तमू
ततश्च यागस्य चत्वारो भागाः अष्टाचत्वारिंश
द्घटिका बुधवारे दिनघटिका यावत्पर्यन्ते
तस्मादत्रैव यागकालो बुधवारे ॥
तथा चैतत्पराः स्मृतयः   यज्ञपार्श्वः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पंचदश्याः परः पादः प्राक्तादः प्रथमस्य यः
कालः पार्वणयागे स्यादन्यथा तत्र विद्यते
इत्युक्तत्वात्तत्पक्ष प्रतिपत् तृतीयांशं यावद्या
गकालमाह पार्वणेयश्चतुर्थांशश्चाद्याः प्रति
पदस्त्रयः यागकालः स विज्ञेयः प्रातरुक्तो
मनीषिभिः प्रतिपच्चतुर्थांशे तु यागनिषेधः
न पष्टव्यश्चतुर्थांशे यागः प्रतिपदः क्वचित्
रत्नांसितहितुमन्ति श्रुतिशेषा सनातनीति
स्मृतिः ह्यत्रायं समुदायेनार्थः पर्व चतुर्थां
शादि प्रतिपदं शत्रयं यावत्प्रातर्यागकालः
प्रातः स्तु प्रतिपच्चतुर्थांशो यागकालो न त
थाचात्र पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समा
प्यते ऽपोष्यते तत्र पूर्वेद्युस्तदहर्याग इष्यते
अपराह्णेथवा रात्रौ यदि पर्व समाप्यते ऽ
पोष्यतस्मिन्नहनि स्थोभूते याग इष्यते इत्या
दीनि लौगाक्षि प्रभृतीनां वचांसि अष्टमेशे

© Dharmartha Trust J&K. Digitized by eGangotri

सं चतुर्दश्याः क्षीणी भवति चन्द्रमाः अमावस्या
अं ष्टमेंशेचपुनःकिलभवेददृश्यइत्येवेततया
८९ पतान्तानपवस्तव्याः पदादृयोः यष्टव्याः अ
दर्शनंसंपूर्णताचेति पतान्तलक्षणं पूर्ण
त्वंप्रजननंचेति पतादिलक्षणमित्यादिश्रु
तिदर्शनेनचचन्द्रमसः क्षीणतासूर्येणस
हैकत्रस्थितिरेवपर्व पर्वणस्तुषष्टिघटिका
यवास्थितेरुत्तरंचन्द्रमसः प्रजननंयत्तदेवप्र
86 तिपदिति तयोरेवयागकालविचारः सन्त्यो
नत्वमावस्याप्रतिपत्तिथ्योः सन्ध्याविति सिद्धा
न्ततत्त्वशास्त्रे अत्राष्टमेंशेचतुर्दश्या इति प्रा
यिकम् चन्द्रगतिवैचित्र्याच्चतुर्दश्यंपशाप
तीत्याकनवम्यांशेपितयदर्शनात् नतुय
दिकदाचिच्छावरणादौ श्रुत्यादि २४ चंदि २९
तिष्येकौगि २२ अंवंराष कामपःशापुदि २३अ
दि २१ कवंगि ८ छवं प्रातिदि २२ प्रदि २५

© Dharmartha Trust J&K. Digitized by eGangotri

उवंगि १५ श्रीवत्सः इत्येवंप्रकाराचन्द्रगति
र्भवति तत्रहीनेशानोथवस्तस्येत्यादिगण
नया तथापर्वसन्धेः शनिवाररात्रौ अमाया
अपि अपराह्णेथवा रात्रावित्युक्तं च निषे
धात् आदित्यवारे द्वितीया विद्धायां प्रतिप
द्यागप्राप्तिः प्रतिपद्विद्धायाममावस्याया
ममावस्यायामन्वाधानमिति कथंपि यद्यपि
त्यपक्षेष्टयोः पूर्वोत्तरदिननियमाद्यागकालो
पि दर्शविद्धायामेव प्रतिपद्यापराह्णिकी
अन्वाधानं चतुर्दश्यां दर्शे स्वल्पेपि वर्तयेदि
ति वचनबलादत्रापि पूर्वविद्धत्वमेव तथा
चेत्तुमेवानन्तेपि विचारितं आदित्येस्तमिते
चन्द्रः प्रक्षीण उदयाद्यदि प्रतिपद्यतिपत्तिः
स्यात्संचतुर्दश्यां यागोनतदा पर्वणोंशेतृतीये
तु कार्या तिथिर्द्विगुणो नेमिः द्वितीयासहिते
यस्माद्वृषयत्याश्वलायनः अर्वागस्तमया

© Dharmartha Trust J&K. Digitized by eGangotri

सं यत्र द्वितीयात्र वह्निप्रपते तत्र यागं न कुर्वीत
स्मृ विश्वेदेवाः पराङ्मुखा इति तथा च निर्णया
८० मृतं द्वितीया त्रिमुहूर्ता चेत्पतति पद्यापराह्णि
की अन्वाधानं च तद्दर्शपापरतस्सोमदर्शना
त् सोमदर्शनदिने यागनिषेधो वृद्धवसिष्ठे
नोक्तः इन्द्रो निरूमेह हविषि पुरस्तादुदिने वि
धौ यद्देवगुणं प्रजते तस्मिन्नस्माद्यपि हि तद्देव
त् एवमेव यदि कदाचिद्दैशागवादौ भौव
दि १८ पंचगि २० बुधदि २२ वृहद्दि २७ शुद्दि
दि ३० ही चेषो १ इत्यादिषु चीनं ग्रानेपवस्त्व
सेति यागकालगणनया पर्वसन्धेश्चापरा
ह्णगामेवर्ह्न स्याति वारे द्वितीया विद्धायां प्रति
पद्यागे प्राप्तेपि वाचनिकान्निषेधात्सर्वं वि
द्धायामेव प्रतिपदि यागः सिद्ध इति शुभम् ॥

87

© Dharmartha Trust J&K. Digitized by eGangotri

पकाश्च ते स्रगाङ्गाकैर्जुहूः कार्या द्विजातिभिः
समसप्तमचन्द्रार्कौ राकाकार्याग्निहोतृभिः
अत्तानेभार्गवं गोत्रं न तत्त्वाराणां च रोहिणी अ
मावस्यान्त्र श्राद्धार्थं यस्य नक्ता यते तिथिः

ॐ मुनीन्द्राणामथ मन्त्राच्छिष्टादिष्टेन वर्त्मना
सूर्यव्रते संप्रदाये वक्ष्ये तद्धर्म हृद्वये तत्रादौ
मात्स्ये क्रियायोगप्रशंसायां ब्रह्मणा वाथ
सूर्येण विष्णुना वा शिवेन वा अभेदात्पूजि
तेन स्यात्पूजितं सचराचरम् ब्रह्मादीनां परं
धाम त्रयाणामपि संस्थितम् सूर्यमूर्तीवतः
पूषा पूजनीयः प्रयत्नतः तस्मादङ्गं हि मात्र
ख्यं कृत्वा सम्पूजयेदिमान् दानैः व्रतोपवासै
र्जपहोमादिना तथा अङ्गं सूर्यं प्रख्यं कृत्वा
प्रथमं सम्पूज्यान्यां ब्रह्मादीन्पूजयेदित्यर्थः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सं अस्तिचसदाचारस्मिहादौ सूर्यपूजैवसर्वत्र
सू तथाचभविष्यत्पुराणे यः श्रद्धयाङ्गवांलदं
८८ दोग्ध्रीगांवेदपारगे एकाहमर्चेत्सूर्यंतस्यपु
ण्यंततोधिकम् तथा यः सूर्यंपूजयेन्नित्यंप
रामेहापिभक्तितः तस्ययोगंचतेमंचश्रमस्तः
प्रयच्छति यजेदेकंसहस्रांशुमोतकामोनसं
शयः तस्मात्सर्वप्रयत्नेन शुभार्थीव्योममर्चये
त् तस्माद्योर्चयतिव्योमंतेनसर्वेर्चिताः सुराः
याज्ञवल्क्यः आदित्यस्यसदापूजांतिलकंसा
मिनस्तथा महागणपतेश्चैवकुर्वन्सिद्धिम
वाप्नुयात् मात्स्ये आरोग्यंभास्करादिच्छेद्धनमि
च्छेद्धुताशनात् ज्ञानेतुशंकरादिच्छेन्मोक्ष
मिच्छेज्जनार्दनात् ॥ इतियत्तदारोग्यादि
फलेषुशीघ्रदत्वंसूर्यादीनांसूचयति
नतुफलान्तरादातृत्वम् त
स्मात्सिद्धमेतत् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्रुतिस्मृतिसदाचारैरेकस्यैव सूर्यस्य पूजया
व्रतादिरूपया सर्वेषां ब्रह्मादीनां पूजा कृतेति त
या च यथाभिलषिता चतुर्वर्गफलप्राप्तिः
तत्र तावत्सूर्यव्रतानि आदित्यवारः सङ्क्रान्तिः
शुक्लसप्तमी चेति तेष्वादित्यवारं प्रक्रम्य मात्स्ये
नारदः सदारोग्यकरं शुभं सौम्यं यदनन्तफलप्रदं
यत्तन्तये च मर्त्यानां यदर्दीशान्तद्भुतम् नन्दी
यन्न हिंसात्मनो धाम परं ब्रह्म सनातनम् सू
र्याग्निचन्द्ररूपेण तत्त्रिधा जगति स्थितम् त
स्मादादित्यवारेण सदा नक्ताशनो भवेत् य
दा हस्तेन संयुक्त आदित्यस्य च वासरः तदाश
नि दिने कुर्यादेकभक्तं विमत्सरः नक्तमादित्य
वारेण भोजयित्वा द्विजन्मनः पात्रैः द्वादशभि
र्युक्तं रक्तचन्दनपङ्कजम् विलिख्य विन्यसेत्
सूर्यं नमस्कारेण पूर्वतः दिवाकरमथाग्नेय्यां
विवस्वन्तमतः परम् भगं चनैरृते तद्वरुणं

© Dharmartha Trust J&K. Digitized by eGangotri

पश्चिमेदले वायव्यां उत्तरेण
रविर्देवं कर्णिकायां च भास्करम् रक्तपुष्पो
७४ दकेनार्घ्यं सबिल्वारुणचन्दनम् तस्मिन्पश्चे
ततोथ्यादिमं मन्त्रमुदीरयेत् कालात्मावि
श्वभूतात्मा वेदात्मा विश्वतोमुखः अस्मान
ग्नीन्द्ररूपस्त्वमतः पाहि प्रभाकर अग्निमी
ळेन मस्तुभ्यमिषेत्वोर्जेय भास्कर अग्न आ
याहि वरदनमस्ते ज्योतिषांपते अर्घ्यं दत्त्वा
89 विसृज्याथ निशि तैलविवर्जितं भुंजीत वा
सरान्ते तु कांचनकमलोत्तमं पुरुषं च यथा
शक्त्या कारयेद्द्विभुजं तथा सुवर्णशृंगीक
पिलामथार्घ्यां राप्यां ड्रिकाम् कांस्यदोहा
सवत्साम् सुरौप्यखुरां पवितास्त्रपात्रेण निधा
य पद्मं पुरुषं च दद्यात् संसृज्य रम्याम्बरमा
ल्यधूपैः द्विजाय कैर (?) थवा
विष्णवे ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रव्यक्तःरूपायजितेन्द्रियायजुद्दम्बिनेदेयम
नुष्ठताय नमोनमःपापविनाशनायविश्वा
त्मनेसमस्तरङ्गःमाय सामर्ग्यजुस्थर्मनिधे
विधात्रेभवाब्धिपोतायजगत्सवित्रे इत्यने
नविधिनासमाचरेदहर्मेकमिहयस्तुमानवः
सोपिरोहतिविनष्टकल्मषःसूर्यधामधुत
चामरावलिभिः कर्मसंततयमवाप्यभूपतिःसो
कडःखभयैरावर्जितः द्वीपसप्तकपतिःध्रुव
पतिर्धर्ममूर्तिरमितौजसायुतः याचभर्तृगु
हदेवतत्परायोषिदेकदिननक्तमाचरेत् सा
चलोकममरेशपूजितायातिनारदभैवत्रसे
शयः यःपठेदपिशृणोतिवाश्रनः पशुपती
दमथवानुमोदते सोपिशाङ्गभवनेदिवौक
सैः पूज्यतेद्दुशतकोटिविस्तरम् नव्याभवि
स्तरोगोपि यस्त्वादित्यदिनेभक्त्याभानुंस
मृज्यशक्तितः नक्तंकरोतिपुरुषःसयात्यो

© Dharmartha Trust J&K. Digitized by eGangotri

सं स्तः ८.

मरलोकताम् श्रीदेवादित्यउवाच योह्यमे
कंभक्तवीतनक्तंममदिनेनरः ब्रह्मचारीजि
तक्रोधोममार्चनपरः खग संवत्सरान्तेच
मगान्ममभक्तोन्नमान्द्विजान् पूजयित्वा
ततोब्रूयात्प्रीयतांमेदिवाकरः एवभक्ति
समायुक्तोममलोकंचगच्छति नचमानु
ष्यकंलोकमभ्येवंप्राप्नुतेपुनः उपवासंप्र
कुर्वन्तियेत्वादित्यदिनेसदा जपन्तिचम
90 हाश्वेतांभजन्तेतेयथेप्सितं उपवासेति
गृहस्थानपरं गृहिणोह्योपवासप्रतिषे
धः महाश्वेताच ॐह्रांह्रींसःइतिभविष्य
पुराणे एवंसूर्यपूजायांव्यक्तम् तथा
चान्यैवयोगविशेषाणांनाह रविसंक्रमणे
भानोर्वारे यःस्यात्कृत्ताधिप सज्ञेयोहृ
दयोनाममादित्यहृदयप्रियः तत्र
नक्तंसमाश्रित्यदेवसंपूज्ययत्नतः

© Dharmartha Trust J&K. Digitized by eGangotri

गत्वा चायतनं भानोरादित्याभिमुखः स्थिरः जपे-
दादित्यहृदयं संख्ययाष्टशतं द्विजः अथवास्त-
मयं यावद्भास्करं चिन्तयेद्धृदि गदहमेत्य ततो
विप्रान्भोजयेद्भक्तितः खग भक्ष्यान्नपायसं
चैव ततो भूमौ स्वपेद्बुधः योऽत्र संपूजयेद्भानुं
भक्तिश्रद्धासमन्वितः सकामाँल्लभते दिव्या-
न्फलदान्हृदयेप्सितान् आदित्यहृदयं घृणिः
सूर्य इति मन्त्रः तथा च पुष्पोवारेपदाक्षर-
तं भवे है भगो देवतं सवारो रोगहा प्रोक्तः स-
र्वरोगभयापहः योऽत्र संपूजयेद्भानुं शुभगंध-
विलेपनैः सर्वरोगविनिर्मुक्तो याति संत्ताप-
तेः गदहं अर्कपत्रपुटे कृत्वा पश्यारण्यकसस्त-
व्रत देवस्य पुरतो रात्रौ भक्त्या समभ्यजयेद्बुधः
पूजयित्वार्कपुष्पैस्तमर्कमर्कप्रियैः सदा
प्राशयित्वार्कपुष्पं तद्दत्वा विप्राय दक्षिणां
भक्ष्यान्नपायसं वीर रात्रौ स्वपिति भूतले अने-

© Dharmartha Trust J&K. Digitized by eGangotri

सं नविधिनायस्तु पूजयेदत्र वै द्विजम् स मुक्तः सर्व
प्र पापेभ्यो गच्छेद्दिनकरालयं भगदैवतमुत्तरा
४१ फल्गुनी पूर्वाफल्गुनी उत्तरायां भगस्तथेति
भविष्येन तत्र दैवताभिधानात् ज्योतिषे तु भ
गदैवतं पूर्वाफल्गुनी प्रोक्ता पक्षस्य सप्तम्यां सू
र्यवारो भवेद्यदि विजया नाम सा प्रोक्ता तत्र द
त्तं महाफलं स्नानं दानं जपो होम उपवासस्त
थैव च सर्वं विजयसप्तम्यां महापातकनाश
नं पंचम्यामेकभक्तं तु षष्ठ्यां नक्तं प्रकीर्तितं
91 उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत्
उपवासः षष्ठ्यामत्र सप्तम्यां पूजयेद्धरिम् ग
न्धपुष्पोपहारैश्च भक्तिश्रद्धासमन्वितः
प्रकल्प्य पूजां भूमौ तु देवस्याग्रतः स्वपेत्
जपमानस्तु गायत्रीं सौरसूक्तमथापि वा अ
ष्टोत्तरां वा महाश्वेतां षडक्षरमथापि वा विड
हस्त्वथ सप्तम्यां स्नानं कृत्वा गणाधिप ॥

© Dharmartha Trust J&K. Digitized by eGangotri

गृहेशं पूजयित्वा च होमं कृत्वा विधानतः
ब्राह्मणान्भोजयेद्भक्त्याशक्त्या च गणनायकं
शाल्योदनमपूपांश्च खंडवेष्टश्च शाकितः
सघृतं पायसं दद्यात्तथा विप्रेषु भक्तितः द
त्वा तु दक्षिणां भक्त्या ततो विप्रान्विसर्जयेत्
इत्येषा कथिता वीर पुण्या विजयसप्तमी या
मुपोष्य नरो गच्छेत्स्वर्गं वै रोचने परम् गौरवी
गारिणाकुंकुमं च विलेपने विजयधूपं सप्तम्यां
भानोस्तुष्टिकरं परम् पञ्चाङ्गण्यापापह
रा महापातकनाशिनी श्वदनं जतं वापि
दीयते नगणाधिप घृतं ह्रां ह्रीं नमः सूर्या
येति मन्त्रः विषयधूपो भविष्ये प्रसिद्धः
दूषणं सिल्हकं बिल्वश्रीखंडमगुरुं तथा
कर्पूरमथ मुस्तां च शर्करा सत्वचं द्विज इत्ये
ष विजयो धूपः स्वयं देवेन निर्मितः इत्यादि
नाहृययोगेन उभयोगेन वा विजयसप्त·

© Dharmartha Trust J&K. Digitized by eGangotri

सं मीसूर्यव्रतस्नानादिष्वनन्तफलदाः अपि
सू चायनाले शुक्लपक्षेतु सप्तम्यां यदा संक्रम
८१ तेरविः महाजयातदा स्याद्धि सप्तम्यां भास्क
रप्रिया स्नानं दानं तपो होमः पितृदेवातिर्प
जनं सर्वकोटिगुणं प्रोक्तं ऽपनेन महौजसा
यत्नस्तां मानवो भक्त्याहृतेन स्नापयेद्रविं
सोऽश्वमेधफलं प्राप्य ततः सूर्यपदं व्रजेत् प
92 यसा स्नापयेद्यस्तु भास्करं भक्तिमान्नरः वि
मुक्तः सर्वपापेभ्यो याति सूर्यसलोकताम्
स्थित्वा तत्र चिरं कालं राजा भवति कञ्जग
तथा च महाजयैषा कथिता सप्तमीतिश
रान्तक यामुपोष्य नरो भक्त्या विपुलां मङ्ग
लं लभेत् नरो याति परं ब्रह्मपदं गत्वा न शो
चति तथा शुक्लपक्षस्य सप्तम्यां यदंतत्को
भवेत् तदा तस्यां महापुण्या सप्तमी पापना
शिनी तस्यां संपूज्य देवेशं चित्रभानुं विभावसुं
सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः

© Dharmartha Trust J&K. Digitized by eGangotri

यश्चोपवासंकुरुतेतस्यांनियतमानसः सर्व
पापविनिर्मुक्तः सूर्यलोकेमहीपते दानंय
द्दीयतेतत्रतत्फलंचाक्षयंभवेत् ऋग्वेदादेव
श्रुतोजप्याश्चाध्यायपरेणतु ऋग्वेदस्यसमस्त
स्ययच्छ्रुतेसाफलंभवेत् सामवेदफलंस
मयत्र अथर्वणोथर्वणस्य
यच्छ्रुतेविपुलंफलम् यतःपापमशेषतः
नाशयत्यत्रभास्करः कल्पसप्तमीदेवते
नोक्तापापनाशिनी अस्यामभ्यर्च्यचरविं
यातिसौमनसंपुरम् विमानवरमारुह्यक
हीरोद्भवपुरमं कान्त्याचैयसमः क्लसौर्ये
हरिसमःसदा मोदमेतत्रसविवेहृन्दारक
गणैःसह पुनरेत्यभुवंहृष्टभवेद्वैत्यापि·
पार्थिवः अन्यत्रापि पुनामधेयनत्वंसम
मीचरवेर्दिनं विजयानामसाप्रोक्ताब्रह्म
लोकप्रदायिनी इत्यादिनाद्दययोगेनत्र

© Dharmartha Trust J&K. Digitized by eGangotri

सं
मू
९३

93

यद्योगेनवाविजयसप्तमी सूर्यव्रतेषुमहापु
ण्या तथाचात्रैव अत्रादित्यवारेहस्तादिङ्गासा
दिविशेषाभावात्कालो निःसंशय एव तथा
चोक्तं माधवेन वारेषुसंशयाभावाद्गृहीत
व्यंयथास्थितं अथ संक्रान्तिप्रशंसा ब्राह्मे
नित्यंद्वयोरयनयोस्तथाविषुवतोर्द्वयोः चंद्रा
र्कयोः ग्रहणयोर्व्यतीपातेचपर्वसु अहोरा
त्रोषितःस्नात्वादानंस्नानंतथाजपम् यःक
रोतिप्रसन्नात्मातस्यस्यादक्षयंचतत् इह
वसिष्ठः अयनेकोटिपुण्यंस्याल्लक्षंस्याद्वि
षुवेफलम् षडशीत्यांसहस्रंतुफलंविष्णु
पदीषुच संक्रान्तौयानिदत्तानिहव्यकव्या
निदातृभिः तानिनित्यंददात्यर्कःपुनर्जन्म
निजन्मनि अयनादौतथादेयंद्रव्यमिष्टंगृ
हेषुयत् षडशीतिमुखेचैवविमोक्षेचन्द्रसू
र्ययोः रविसंक्रमणेपुण्येनस्नायाद्यदिमानवः

© Dharmartha Trust J&K. Digitized by eGangotri

सप्तजन्मान्यसौ रोगी दरिद्रश्चोपजायते संवर्त
अमावस्याद्वादशी च संक्रान्तिश्च विशेषतः प
ताः प्रशस्तास्तिथयो भानुवारस्तथैव च अ
त्रस्नानं जपो होमो देवतानां च पूजनं ऽपवा
सस्तथा दानमेकैकं पावनं स्मृतं देवीपुराणे
द्वादशैव समाख्याताः समाः संक्रान्तिकल्प
ना इत्यादि प्रक्रमस्य अतीतानागतो भोगो ना
ड्याः पंचदश स्मृताः सान्निध्यं तु भवेत्तत्र यदा
ऽयं संक्रमे रवेः व्यवहारो भवेल्लोके चन्द्रसूर्यो
पलक्षितः काले विकलितं सर्वं ब्रह्माद्यं सच
राचरम् पुण्यपापविभागेन फलं देवी प्रय
च्छति देवी संक्रान्तिरूपा एकथापि कृतं तस्मि
न्कोटिकोटिगुणं भवेत् धर्माद्विवर्धते ह्यायुरा
न्पुत्रस्वर्गादयः अयमोद्यापिषोकादिविषु
वायनसन्निधौ विषुवेषु यद्दत्तं जप्तं भवति
वातयम् एवं विष्णुपदे चैव षडशीतिमुखेषु

© Dharmartha Trust J&K. Digitized by eGangotri

सं च अयनेषु विकल्पो यस्तन्मे निगदितः शृणु
स्. यावद्विंशत्कला भुक्तास्तावत्पुण्यं चोत्तरायणे
स्थ निरंशे भास्करे दृष्टे दिनान्ते दक्षिणायने अ
अस्यार्थः विषुवादिसंक्रमे यस्तु पुण्यकालस्ततो
पि कं विंशतिगुणितं पुण्यमुत्तरायणे मकर
संक्रमे एवं देवदिनान्तरूपे दक्षिणायने कर्क
टसंक्रमे निरंशे राशेः प्रथमभागस्य प्रवेशका
लीने विषुवादिफलाद्विंशतिगुणितं फलमि
95 त्यर्थो नन्तभद्रे मत्स्यपुराणे च अथान्यदपि
वक्ष्यामि संक्रान्त्युद्यापने फलम् यद्दत्त्वा परं पार
लोके सर्वकामफल म् विषुवे सायने वा
पि संक्रान्तिव्रतमारभेत् पूर्वेद्युरेकभक्तेन दन्त
धावनपूर्वकं संक्रान्तिवासरे प्रातस्तिलैः
स्नानं विधीयते रविसंक्रमणे भूमौ चन्दने
नाष्टपत्त्रकम् पद्मं सकर्णिकं कुर्यात्तस्मिन्ना
वाहयेद्रविम् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कार्त्तिकायांत्यसेत्सूर्यमादित्यंपूर्ववत्ततः न
मःसामविधेयाम्येनमकरन्द्रंडलायच ततः
मविज्ञेवरुणंवारुणोत्तपुनःपुनः मार्त्तंडमु
त्तेविष्णुमीशानेवित्यसेत्सदा गन्धैःमाल्यैः
फलैःभक्ष्यैःस्थाण्डिल्येवित्यसेत्ततः द्विजाय
मोदकंभक्तंघृतपात्रंहिरण्मयं कमलंचयथा
शक्त्याकारयित्वानिवेदयेत् चन्दनोदकपुष्पै
श्चदेवायार्घ्यंन्यसेद्भुवि विश्वायविश्वरूपाय
विश्वधाम्नेस्वयंभुवे नमोनन्तनमोधात्रेऋक्
सामयजुषांपते अनेनविधिनासर्वंमासिमा
सिसमाचरेत् संवत्सरान्तेथवाकुर्यात्सर्वंद्वा
दशधानरः संवत्सरान्तेघृतपात्रसेनसन्त
र्प्यवह्निंद्विजपुङ्गवांश्च कुंभेपुनर्द्वादशधेनु
कांसवत्सहैरण्यपपसमुक्तं पयस्विनीःशी
लवतीश्चदद्याद्धेमशृङ्गैःसखुरैःसवत्सैः
गाश्चाथवासमस्तकांस्यदोहमाल्याम्बरावा

© Dharmartha Trust J&K. Digitized by eGangotri

सं चत्वरोप्यशक्ताः दौर्गत्ययुक्ताः कपिलामथैवे
स्म कांनिवेदयेद्ब्राह्मणाङ्गवाय हैमीं च वद्धात्पृ
९५ थिवीमशेषां साकाररौप्यामथ च ताम्राम्
पैष्टीमशक्तो प्रतिमां विधाय सौवर्णसूर्ये
ण समं प्रदद्यात् न वित्तशाठ्यं पुरुषोत्र कु
र्यात्कुर्वन्नधो याति तथा सभार्यः यावन्महे
न्द्रप्रमुखाश्च लेन्द्राः पृथ्वीह सर्वाब्धियुताश्च ति
ष्ठेत् तावत्सगत्वा नरकं च घोरैः सन्तप्यते ना
रदनाकष्टे ततस्तु कर्मक्षयमाप्य लोके
द्वीपाधिपः स्यात्कुलशीलयुक्तः सप्यस्तु खो
अङ्गसुखः सभार्यः प्रभूतभृत्यालयमन्दिराप्य :
इति पठति शृणोति वापि भक्त्या विधिमखिलं
रविसंक्रमणेषु पुण्यं मतिमपि च ददाति
सोपि देवैरमरपतेर्भवनं गतोपि पूज्यः तथा
तथा चाप्येवमात्स्ये नारदः उपवासेष्वशक्तस्य
तदेव फलमिच्छतः विनाशायेह रोगाणां

95

© Dharmartha Trust J&K. Digitized by eGangotri

किमिष्टं फलमुच्यतां श्रीभगवान् उपवा
सेष्वशक्तानां नक्तभोजनमिष्यते अस्मिन्व्रते
तथाप्यनसूयतां तद्धितं व्रतं आदित्यशयनं
नाम यथावच्छङ्कराचनं येषु नक्षत्रयोगेषु
पुराणज्ञाः प्रचक्षते यदा हस्ते सप्तम्यामा
दित्यस्य दिनं भवेत् सूर्यस्याथ संक्रान्तिस्ति
थिः सा सार्वकामिकी उमामहेश्वरस्यार्चा
मर्चयेत्सूर्यनामभिः सूर्यार्चा शिवलिंगं च
नार्कहीपूजयेत्ततः उमापते रवेश्चापि न भेदः
क्वचिदिष्यते यस्मात्तस्मान्मुनिश्रेष्ठ गृहे शं
करमर्चयेत् हस्तेन सूर्याय नमोस्तु पादौ अर्का
य चित्रासु च गुल्फदेशं स्वातीषु जंघे पुरुषोत्त
माय धात्रे विशाखासु च जानुदेशम् तथा
नुराधासु नमोभिपूज्य ऊरुद्वयं देवसहस्रभा
नो ज्येष्ठास्वनंगाय नमोस्तु गुह्यमिन्द्राय सो
माय कटिं च मूले पूर्वोत्तराषाढयुगे च ना

© Dharmartha Trust J&K. Digitized by eGangotri

सं भिन्नाष्टेनमः समस्तुरङ्गमाय नीलांशवेचग्र
स्तु वर्णेनकृतिंकतौथनिष्ठास्तुविकर्तनाय
९९ वतःस्थलंध्वान्तविनाशनायपथनाथिपते
परिस्पृजनीयम् पूर्वोत्तराभाद्रपदद्वयेचवा
ह्वनमश्वराट्करायपृष्ठो साम्रामथीशाय
करद्वयंचसम्स्पृजनीयंद्विजरेवतीषु नखाङ्गि
स्पृग्याणितथाश्विनीषुनमोस्तुसमाश्वधुरन्ध
राय कठोरथाग्रेभरणीषुपृष्ठंदिवाकराये
त्यभिस्पृजनीयम् ग्रीवाग्निभस्तेवरमस्तुजेशं
सम्स्पृजयेन्नारदरोहिणीषुमृगोत्तमाङ्कः दश
माउरारेःसंस्पृजनीयाहरयेनमस्ते नमःस
वित्रेश्रतिशांकरेनरामाभिस्पृश्याहिज्ञनर्वसौ
च ललाटमंभोहवक्त्रभाय पुष्येलकंवेदशा
रीरथाशिरा सार्पेरामौलिंविवुधप्रियाय
मघास्तुकार्याविनियोगराशेषु पूर्वासुगो·
ब्राह्मणनन्दनाय ।

96

नैवारिणि संस्पृज्य उमानि शंभोः अथोत्तराफल्गु
णिके भुवौ च विश्वेश्वरायेति स्नपनीये नमोस्तु
पाशांकुशाभयपद्मशूलकपालसर्पेन्दुधनुर्धराय ग
जासुरानंगपुरान्तकादिविनाशशीलाय नम
शिवाय इत्यादि चत्वारि तु पूजयित्वा विश्वेश्वरा
येति शिरोभिपूज्यं भोक्तव्यमथेत्थमनेन शाक
ममांसमत्तारसभक्षशेषं इत्येवं द्विजरक्तानि
कृत्वाददघात्सुवर्णसौ शालेयतंडुलप्रस्थमौदुम्ब
रभाजनेहुतम् अस्यायपार्श्वेविशायसहिरण्यं नि
वेदयेत् सप्तमेवस्त्रयुग्मंच पारणे त्वधिके भवे
त् चतुर्दशेत्तु सम्प्राप्ते पारणे नारदाहिके
ब्राह्मणान्भोजयेद्भक्त्या गुडक्षीरघृतादिभिः
कृत्वाथ कांचने पद्ममष्टपत्रं सकर्णिकम् शु
द्धमष्टांगुलेनस्वपद्मरागदलान्वितं शय्यां
कृत्वा विरुद्धग्रन्थवर्जिताम् सोपधानां

सं व्यजनोपानहच्छत्रचामरासनदर्पणैः भूषणैर
स्मृ भिसंयुक्तां फलवस्त्रानुलेपनैः तस्यां निधायत
९७ त्समं मलं तु त्वग्गुणान्वितं कपिलां वत्ससंयु
क्तामति शीलां पयस्विनीं रौप्यखुरां स
वत्सां कांस्यदोहिनीं दद्यात्सर्वेण पूर्वाह्णे इती
वाचमुदाहरन् यथैवादित्यशयनमशून्यंत
वसर्वदा कान्त्या कीर्त्या श्रिया राज्ञ्या तथा मे सन्त
सिद्धयः यथा न देवाः श्रेयांसं त्वदन्यममरं विदुः
तथा मामुद्धराशेषाद्दुःखसंसारसागरात् ततः
प्रदक्षिणीकृत्य प्रणम्य च विसर्जयेत् शय्या
सनादि तत्सर्वं हि द्विजस्य तु गृहं नयेत् ततहिशी
लायनदासिकाय उत्तर्कपुत्राय चिकित्सकाय
प्रकाशनीयं व्रतमिन्दुमौलेर्यस्यापि नित्यम
थिकां विधत्ते
भक्त्या यशो
ताच.

97

ग्रह्मेतदाख्येयमानन्दकरं शिवस्य इदं महा
पातकघ्नं नराणामप्यतरं वेदविदो वदन्ति
नवं पुत्रेण वसैर्विमुक्ताः पत्नीभिरानन्द
कराः स्वराणां नाभ्येति रोगं न च शोकदुःख
मुवाप्य नारी कृतनेतिभक्त्या इदं वसिष्ठेन पु
राजुनेन कृतं कुबेरेण पुरन्दरेण संकीर्तना
दस्याखिलानि नाशमायान्ति पापानि न सं
शयोस्ति इति पठति शृणोति वाय इत्यरवि
शायने पुरुहूतवल्लभः स्यात् अपि नरकग
तान्पितृन शेषान भिनवमानयतीहयः करो
ति तदेवं संक्रान्तिव्रते कृते फलोदयश्रुतेर
कृते च प्रत्यवायश्रवणान्नित्यकाम्यत्वं सक
लमेव तत्र च व्रतस्योपवासन
नक्तायाचितभेदास्तस्यापि त्रिविधत्वेपि नक्तासे
व वकुवाक्ये पुश्रवणान्नहि रागमत्रोपवास
निषेधश्रमाचारविवारसंक्रान्तौ नक्तव्रतमेव

© Dharmartha Trust J&K. Digitized by eGangotri

सं नक्तभक्तिस्तु सूर्यवारके भोक्तुस्मरणीया उ
स्मृ पवासनिषेधे तु नारदः संक्रान्तावुपवासं च
५८ कृष्णैकादशवासरे चन्द्रसूर्यग्रहे चैव न कुर्या
त्पुत्रवान्गृही तथा दिनतये र्कसंक्रान्ता
वसितैकादशीदिने व्यतीपाते कृते श्राद्धे पु
त्रीनोपवसेद्गृही आदित्यवारे संक्रान्तौ ग्रह
णे चन्द्रसूर्ययोः उपवासं न कुर्वीत पुत्रपौ
त्रसमन्वितः तस्मादेतदादित्यवारे संक्र
मे च नक्तमेव गृहस्थानां न तूपवासः तस्य
98 च नक्तस्य कालमाह ज्ञानानन्ते आत्मनो द्विगुणां
छायां यदा सन्तिष्ठते रविः सौरं नक्तं विजा
नीयान्न नक्तं निशि भोजनं तथा चैतदेव मा
धवोप्यभिप्रेत्य प्रदोषव्यापिनी नक्ते तिथिः
व्याप्तिर्दिनद्वये इत्याद्युक्त्वा सौरे नक्ते तु सायाह्न
व्यापिनी न प्रदोषगेति सौरनक्तग्रहणे वोक्तवा
न् सौरव्रते तु रनक्ते तु न तत्र दर्शनाद्दर्शयत्र प्रदे
षेतिथिलयनक्तं ।

तथाच न तत्र दर्शनादन्नं केचिदिच्छन्ति मा
नवाः मुहूर्तो नं दिनं केचित्प्रवदन्ति मनीषि
णः न तत्र दर्शनादन्नमहं मन्ये गणाधिपे
ति अथाग्र भुंजीतातैललवणमिति पूर्व
वाक्येष्वश्रवणादतैललवणो हविष्यान्नभो
गः तथाच भविष्ये क्षमा सत्यं दयादानं
शौचमिन्द्रियनिग्रहः देवपूजाग्निहवनं स
न्तोषः स्तेयवर्जनं सर्वव्रतेष्वयं धर्मः सामा
न्यो विधिः स्मृतः इत्याद्युक्ता हविष्यभोजनं
स्नानं सत्यमाहारलाघवं अग्निकार्यमधःशा
य्यां नक्तभोजी षडाचरेत् हविष्यं यवाः तद
लाभे व्रीहयः तदलाभे माषकोद्रवचणकस
र्षपमसूरवीणाकजुल्लुत्थवर्जमन्यदप्यन्नम्
विष्णुधर्मेषु गुडोदनं गुडापूपाफलानि
गुडपायसं निवेदने हि सूर्याय मुनिभिः स
मुदाहृतम् तथाच स्मृतिसंग्रहे तैलं तक्रं

© Dharmartha Trust J&K. Digitized by eGangotri

सं चताम्लंश्रन्नंचनिमिभोजनम् नवोसमनि
म्र षिद्वानिचोसवारिरसोदकं रसोदकंलवणं
४४ ताश्वसंक्रान्तयोर्द्वादश हृद्दवासिष्टः श्रय
नेविषुवेद्देचचतस्तष्षडशीतयः चतस्त्रोवि
स्नुपघस्तुसंक्रान्त्योद्वादशास्मृताः मृगकर्क
संक्रान्तीद्वेउदग्दत्तिरणायने विषुवेद्वेतुला
मेषेगोलमध्येततःपराःज्योतिर्वसिष्टः वृ
षद्वाश्चिकक्कुंभेषुसिंहेचैवयदारविः एतद्वि
99 षाउपदंनामविषुवादधिकंफलम् कन्या
यांमिथुनेमीनेधन्वष्यपिरवेर्गतिः षड्शी
तिमुखाःप्रोक्ताःषडशीतिफलप्रदाः यत
गणकाः अयनादीनिसंक्रान्तीश्चएथाख्ति
रवन्ति उक्षयनादीनांगणितमात्रप्रयोहेश :
नज्ञावानम्सुनवव्रतादिविधिनिषेधपरत
या व्रतादिविधौतसूर्यस्यमेषादिगति
संज्ञानांसंक्रान्तीनांपवविधिः।

© Dharmartha Trust J&K. Digitized by eGangotri

सचसंक्रमकालोनिमेषादपिसूक्ष्मतरः क
ण्ठंदीवसार्थेश्राद्धदानव्रतादिकर्मसर्वंवं
भजते इत्येतच्छुक्लमपहरतिदेवीपुराणे
सूक्ष्मेणवेसरवासोनेयावत्स्पन्दतिलोचने त
स्यत्रिंशत्तमोभागस्तुटिरित्यभिधीयते त्रु
टेःसहस्रभागोयःसकालोरविसंक्रमे त
त्कालेनद्रवीभूतंत्रैलोक्यंसचराचरम् व्यती
पातेपिचैवंस्यात्तत्रपुण्यंततोधिकं अत्र
पिसन्दिग्धःस्नानाद्युनिसत्तम दानाध्य
यनजप्यादियद्दिष्टंवह्निहोमतः पुण्यका
लोत्रलभतेह्यन्यथानकथंचनेतिमत्स्यपु
राणमेवैव अतीतानागतोभोगोनाड्यःपं
चदशस्मृताः अस्यार्थः संक्रान्तोनिमित्ते
विहितस्यस्नानदानादेः निषिद्धस्यचरात्रि
भोजनादेः प्रतिमार्जनंभोगः अतीताःपं
चदशनाड्यः अनागताःपंचदशनाडिका :

© Dharmartha Trust J&K. Digitized by eGangotri

सं पुण्यकालइत्यर्थः अस्मिंस्त्रिंशद्घटिकात्मके
स्व संक्रान्तिभोगकाले क्रियमाणो योधर्मो धर्मयो
१०० र्महत्फलं देवी संक्रान्तिकालन्तु पाडुर्गाप्रयच्छ
ति तथा ज्योतिर्वसिष्ठोपि संक्रान्तिसमय
स्सूक्ष्मो ज्ञेयः पिशितैस्त्वणैः तद्योगाञ्चाप्य
धोश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रकाः जावालस्य सं
क्रान्तेः पुण्यकालस्तु षोडशोभयतः कलाः
चन्द्रसूर्योपरागेतु यावद्दर्शनगोचरः शा
तातपः अर्वाक् षोडशविज्ञेया नाड्यः पश्चा
च्च षोडश कालः पुण्योऽर्कसंक्रान्तेर्विद्वद्भिः
100 परिकीर्तितः तथा च सूर्यसिद्धान्ते ॥
षष्टिघ्ने बिम्बरविभुक्तिभक्ते संक्रान्तिनाडयो
ऽखिलधर्मकार्ये रवेः स्मृताः पुण्यतमा ग्रह
स्य संक्रान्तिगोभिन्नफलं विधत्ते बिम्ब
स्य मानार्कान्षष्टिगुणिताद्भुक्तिस्ततान्नालि
कादिलब्धेन रामपन्नात्यागादिः पश्चादन्तो

र्कसंक्रान्तेः संक्रान्तिपुण्यकालेयल्लब्धंना
डिकादितद्द्विगुणं स्नानजपहोमादिकोऽत्र
र्मो विशिष्टफलदः अस्यार्थः रविमानेघटी ३२
वं ५२ मानार्थं १९ चं २१ मानार्थषष्टिगुणितं
९८१ पुनरर्कस्फुटभुक्त्याह्रतंलब्धं १९।३९
एवमर्कसंक्रमनाडी स्थानद्वये संस्था
प्य पूर्वघटीषोडशके वियोज्य पुण्यारम्भः
परस्मिन्घटिकाषोडके संयोज्य पुण्यान्तः
तदेवं सकलः पुण्यकालः घटी ३२ च १२ अ
त्रान्तरे स्नानजपहोमदानादिको धर्मो विशि
ष्टफलदः नत्विदमेतत्र पूर्वापरीभूता द्वा
त्रिंशद्घटिकास्सामान्यतः सर्वासां संक्रान्ती
नां पुण्यकालः विशेषास्तु यत्र क्वचिदथ पवक्ष्य
ति ह्यर्धमेव क्वचिदुभयत्रापि तत्रापि पुण्यपु
ण्यतरपुण्यतमत्वेनैव विधेयं यायाः सन्निहि
तानाड्यः स्तास्ताः पुण्यतमास्मृता इतिवच

© Dharmartha Trust J&K. Digitized by eGangotri

सं नात् तथाच विशेषाभिप्रायेण वृद्धवसिष्ठः
स्र अतीतानागते पुण्ये द्वे उदग्दक्षिणायने त्रिं
१०१ शत्कर्कटके नाड्यो मकरे विंशतिः स्मृता
वर्तमाने तुलामेषे नाड्यस्तूभयने दश षड
शीत्यां व्यतीतायां षष्टिरुक्तास्तु नालिकाः
स्मरमन्तरमपि मध्ये विषुवति दानं विष्णुपदे
दक्षिणायने चादौ षडशीतिमुखे तीते तथो
दगयने च भूरिफलं श्रीपतिश्च याम्यायने
विष्णुपदे तदादौ दानाद्यनन्तं विषुवे च मध्ये
वदन्त्यतीते षडशीतिवक्त्रे महर्षयश्चाप्यय
ने च सौम्ये माधवोपि आसन्ननाड्यः संक्रान्तेः
पुण्याः स्नानादिकर्मसु चैवेष्टकर्कटे पूर्वा
मकरे विंशतिः परा वर्तमाने तुलामेषे ना
ड्यस्तूभयतो दश वृषभादौ स्थिते पुण्याः
प्राक्पश्चादपि षोडश मिथुनादौ द्विस्वभावे
ऽग्रतः षष्टिनाडिकाः ।

101

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वेष्वायं प्रकारोऽतीतानागतवर्तमानकाल
क्षणक्षणपतनक्षणपतनरूपः दिनविषयत्वे
नकल्पनीयः नतुरात्रिपरत्वेन क्वचित् तथा
चानन्तः संख्योपादनमेतत्कात्स्न्यं दिनक्षण
त्वोपलक्षणं नो वा यदि संख्या विवक्षिता·
स्यात्तर्हि कर्कटे चयस्त्रिंशद्घटिकात्मको दिव
सस्तत्रायं घटिकाद्वयमक्षणः स्यात् मकरे
षड्विंशतिघटिको दिवसस्तत्र विंशतेर्घटि
कायाः क्षणत्वे उपरितनाघटिकाषट्कक्षणा
स्युः विषुवति त्रिंशद्घटीरूपे दिने सर्वघटीप
चकस्य तत्रैवाक्षणप्राप्तिर्नान्याः तदा चार्क
संक्रमणे क्षणमहः कात्स्न्यं प्रकीर्तितमिति
निर्विषयत्वान्निरर्थकमेव स्यात् अतएव
माधवोऽपि यथोक्तसामान्यस्य क्वचिदपवा
दमाह अह्नः संक्रमणे रात्रावनुष्ठाननिषे
धनः ऽन्नो कालेऽव्यवस्थाप्येतन्नह्यत्रास्वप·

© Dharmartha Trust J&K. Digitized by eGangotri

सं
स्म
१२

श्चिमो ग्रन्थार्थः यदा कर्कटसंक्रान्तिरुदयान
न्तरं भवति तदा पूर्वासां विंशतीघटीनां पुण्य
कालत्वात्पूर्वोक्तन्यायेन रात्रावनुष्ठानं प्राप्तं तद
तः परित्यज्य पराविंशतिनालिका ग्रहीतव्याः
यदा तु संगवमध्याह्नकाले कर्कटसंक्रान्तिस्तदा
दिन एव पूर्वनाडीष्वनुष्ठानं शक्यत्वात्पूर्वनाडी
प्राशस्त्यं चरितार्थं अनेनैव न्यायेन सर्वेषु सं
क्रमेषु यथा दिवस एवानुष्ठानं भवति तथा पू
र्वोत्तरभावो व्यवस्थापनीयः तथा चाशानन्तः
यदा कर्कटसंक्रान्तिरुदयानन्तरं भवति तदा
पूर्वासां विंशति घटिकानां पूर्वोक्तन्यायेन पु
ण्यकालत्वादतीतरात्रावेव भोगः प्राप्नोति
न तु दिने तथा घटिकैकावशेष एव दिने
षडशीतिषु चतसृषु मकरे चागामिन्यामे
व निशि भोगः प्रा
प्नोति नैव दिने।

102

© Dharmartha Trust J&K. Digitized by eGangotri

एवंविषुवयोर्द्वयोः सन्ध्यायां रात्रौ वा वर्त्तमा
नेऽपि तत्रैव भोगापत्तिरिति तथा च सति इत्थ
ब्राह्मणसम्पत्तिर्विषुवत्सूर्यसंक्रम इत्यादि
याज्ञवल्क्यप्रभृतिवचनैरेवप्रकरणीयस्य म
हाफलस्य श्राद्धस्य संक्रान्तिरात्रेः प्राप्यत्वे
संध्यारात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैरि
त्यादिनिषेधवचनादसत्कालोऽथः प्रसज्येत
न च वाच्यं ग्रहणवत्संक्रान्तिश्राद्धमपि य
थाप्राप्तं सन्ध्यारात्र्योरेव कार्यमिति ग्रहण
योरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनमिति
प्रतिप्रसवस्य राहुदर्शनमात्रे चरितार्थस्य
यावद्वचनं वाचनिकमिति न्यायेन संक्रान्ति
श्राद्धेऽप्रवृत्तेः तथा च बौधायनोऽपि महानि
शायां विज्ञेया मध्यस्थप्रहरद्वयम् तस्यां स्ना
नं न कर्त्तव्यं स्वाध्यायः पितृतर्पणं मार्कण्डेय :
महानिशा द्वे घटिके मध्यं मध्यमयामयोः

© Dharmartha Trust J&K. Digitized by eGangotri

सं नैमित्तिकेतदाकार्यंनकुर्यात्त्वमनागपि
स्मृ: पराशरः मरुतोवसवश्चैवरुद्राश्चादित्याश्च
१०२ श्चदेवताः शार्वर्यामेवलीयन्ते तस्मात्तांपरि
वर्जयेत् स्नानेदानेजपोहोमः समर्थंराहु
दर्शने अन्यथाचासुरीरात्रिस्तस्मात्तांप
रिवर्जयेत् यम ॥ राहुदर्शनसंक्रान्ति
विवाहात्ययवृद्धिषु स्नानदानादिकंका
र्यंनिशिकाम्यव्रतेषुच तथैव रात्रौस्नानेन
कुर्वीतदानंचैवविशेषतः नैमित्तिकंतुकु
र्वीतस्नानंदानंचरात्रिषु यत्तेविवाहयात्रा
यांतथापुस्तकवाचने दानान्येतानिशस्ता
निरात्रौदेवालयेषुच ग्रहणोद्वाहसंक्रा
न्तियात्रार्तिप्रसवेषुच श्रवणेचेतिहासस्य
रात्रौदानेप्रशस्यते विष्णुः रात्रौस्नानं
नकुर्वीतदानंचैवविशेषतः नैमित्तिकानि
कुर्वीतनित्यान्नैवशुभकर्माणि विवाहव्रतसं

103

© Dharmartha Trust J&K. Digitized by eGangotri

क्रान्तौ प्रतिष्ठा पुत्रजन्मनि याम्योपरागपाताद्ये
स्नाने दाने निशा शुभा एतानि निशि कुर्याच्चेत्कु
शमूलकरो जपेत् रक्षोघ्नं चास्त्रमन्त्रं वा विशान्ते
रतसोन्यथा पापभाक: अपोराशेनगदहृणीया
स्वविश्यवरुणालयम् आवश्यकेतमन्त्रेण
याम्योथास्नुइति स्वयमित्यादि तदेतद्वचनजाते
कथञ्चित्प्रवासादिना दिवा स्नानादावकृते सं-
क्रान्तिस्नानस्यावश्यकत्वात् सूर्यसंक्रमणे
पुण्ये न स्नायाद्यदि मानवः सप्तजन्मानि कुष्ठी
स्यादिति श्रुतत्वाय प्रत्यवायहार्थं रात्रावपि
कर्तव्यतां प्रतिपादयति तथाहि पारिजाते प
राशरः महानिशा तु विज्ञेया मध्यमं प्रहरद्वयं
प्रदोषपश्चिमौ यामौ दिनवत्कार्यमाचरेदित्ये
तद्यत्तदाहिषयामिति तथाचाग्रेवयमीजाते
गौराणमुख्यकालविचारे काम्यवर्जं नित्यनैमि
त्तिकानि सर्वाण्यपि मुख्यकालातिक्रमे गौण

© Dharmartha Trust J&K. Digitized by eGangotri

सं कालेकर्तव्यानि तथाच मंडनमिश्रः मुख्य
स्त् कालेयदाविशेषंकर्मकर्तुंनशक्यते गौणका
१४ लेपिकर्तव्यंगौणोप्यत्रेदृशोभवेत् ईदृशोमु
ख्यकालसदृशः तथा स्वत्पन्तरमपि यथाक
थंचित्कर्तव्यंनित्यकर्मविजानता तथाप्यस्यावि
शेषोस्ति पैत्रकस्यविशेषतः दिवोदितानिक
र्माणिप्रमादादकृतानिच यामिन्याःप्रहरंया
वत्तानिसर्वाणिकारयेदिति श्राद्धेतुविशेषः
सन्ध्यारात्र्योर्नकर्तव्यंश्राद्धंखलुविचक्षणैरित्या
रभ्य संवत्सरर्तुमासतिथ्यादिकालविशे
षविहितानिकर्माणिस्वकालातिक्रमेजाते
104 कालान्तरेकर्तुंनयुज्यन्ते अपितुतदतिक्रमे
प्रायश्चित्तमेवकुर्यादिति गौणमुख्यकालनि
र्णयःस्पष्टएव तस्मात्स्थितमेतत् दिनगत
संक्रान्तेर्नकापिरात्रिःपुण्यकालः किन्तु
संक्रान्त्याश्लिष्टंदिनमेव ।

© Dharmartha Trust J&K. Digitized by eGangotri

तथैव रात्रिगतसंक्रान्तेर्व्यवस्थायाः पूर्वोत्तरौ प्र
हरौ पवव्यवहितेऽपि पुण्येन तु सन्निहितारा
त्रिः तथा च वृद्धवसिष्ठः अह्नः संक्रमणे पु
ण्यमहः कृत्स्नं प्रकीर्तितं रात्रौ संक्रमणे पुण्यं
दिनार्धं स्नानदानयोः अर्धरात्रादधस्तस्मिन्म
ध्याह्नस्योपरि क्रिया ऊर्ध्वसंक्रमणे चोर्ध्वमुद
यात्प्रहरद्वयम् पूर्णे चेदर्धरात्रे तु यदा संक्र
मते रविः प्राग्दिनद्वयं पुण्यं मुक्त्वा मकरक
र्कटौ अस्यार्थः अह्नि यदा संक्रान्तिस्तदा स
कलमेवाहः पुण्यपुण्यतरपुण्यतमयात्रा
ह्ने यदि रात्रौ संक्रान्तिस्तर्हि न सकलं दिनं किंतु
दिनार्धमेव पुण्यं तत्रापि अर्धरात्रात्पूर्वं
संक्रान्तिस्तदा पूर्वदिनस्यापराह्णकालीनं
प्रहरद्वयं पुण्यं यदि त्वर्धरात्रादूर्ध्वं तर्हि परदि
नस्य पूर्वाह्णप्रहरद्वयं न तत्र विकल्पश्चेन
सन्निहितापि रात्रिः पुण्या अर्धरात्रे तु तत्रांत

© Dharmartha Trust J&K. Digitized by eGangotri

सं मार्कंडेयः महानिशाद्वेघटिके मध्यं मध्यमया
सू मयोः तथाच पुण्यतरतमादित्यावस्थानन्तम
१०५ हीये यापुनः संक्रान्तिः दिनाबाघन्तगातस्मा
त्त्रिधा पुण्यकालो भवति पुण्यः पुण्यतरः
पुण्यतमश्चेति अतीतानागतो भागो नाड्यः
पंचदशेति देवीपुराणात् पुण्यः कालोऽर्क
संक्रान्तेः षोडशोभयतः कालाइतित्व यच्छाता
ऽपवचनं तद्दीर्घनिदाघदिवसाभिप्रायेण तत्र
दिनार्धे दक्षिणायनं चेत्तत्रोत्तराः पंचदश षोड
शवा नालिकाः पुण्याः पूर्वाः पुण्यतराः सन्निहि
ताः पुण्यतमाः तत्रैव दिनार्धे यद्युत्तरायणं ष
डशीतिमुखं वा तदा पूर्वा नाड्यस्तावत्यः पुण्या
उत्तराः पुण्यतराः सन्निहिताः पुण्यतमाः
तत्रैव विषुवति पूर्वामानाडीनामुपरितनीनां
तावतीनां पुण्यत्वं मध्यवर्तीनामुपर्यधोवर्ति
नीनां पुण्यतरत्वं पुण्यतरत्वं तन्मध्ये संक्रान्तेः

© Dharmartha Trust J&K. Digitized by eGangotri

समीपवर्त्तीनां पुण्यतमत्वं दिनार्धपर्वविषय
यत्वं प्रवृत्तायां
द्वैविध्यमेवानर्थक्यापत्त्या तत्सामर्थ्यस्य प्रवृत्तेः
मध्याह्नतः प्राक् संक्रमे पूर्वभागे संक्रान्तेर्मध्याह्न
स्योपरि नाडीनां संक्रान्तीनामुत्तरभोगानां वैप
रीत्ये पुण्यपुण्यतरभावस्य पूर्वभोगाद्यः पुण्य
तमत्वं पुण्यतरापत्ते औदयिकां घटिकायां यदि
दक्षिणायने विषुवे वा स्यात् तदोपरि घटिका
नां पुण्यत्वं संक्रमघटिकायाः पुण्यतरत्वं रात्रौ
भोगाभावादानर्थक्यापत्त्या तत्सामर्थ्यस्योत्पत्तेः दि
नान्त्यघटिकायामुत्तरायणे षडशीतिमुखे वि
षुवे वा आद्या नालिकाः पुण्याः सैव संक्रमनाडी
पुण्यतरा यत्रापि रात्रौ भोगाभावाद्द्वैविध्यम्
तथा चैतदेवाभिप्रेत्य यत्तु पाद्मः आसन्नसंक्रमं
पुण्यं दिनार्धं स्नानदानयोः रात्रौ संक्रमणे भानो
र्विषुवत्ययने दिवा याया सन्निहिता नाड्यस्ता

© Dharmartha Trust J&K. Digitized by eGangotri

सं
सू
१०६

स्ताः पुण्यतमाः स्मृताः रात्रौ विषुवति अय
नेचदत्तिरणोन्नतरूपे संक्रमे सति अर्धरात्रपूर्वो
त्तरभागतया संक्रमासन्नतया यद्दिनार्धं तदेव पु
ण्यं तत्रैव दिने याः सन्निहिता नाड्यस्ता एव पुण्य
तमाः तन्मध्ये विषुवति दानमित्यादि निर्देशी
कीकाचन पुण्यतमादि व्यवस्था अर्धे चेदर्ध
रात्रे तु यदा संक्रमते रविः प्राङ्दिनद्वयं पुण्य
मुक्तामकरकर्कटौ अस्यार्थः अर्धरात्रे सं
क्रमे दिनद्वयं प्रथमदिनस्यापराह्णः द्वितीय
दिनस्य पूर्वाह्ण इति योजनया दिनद्वयं पुण्य
मिति मकरकर्कटयोस्तु अर्धरात्रे वैषयि
कतया दिनद्वययोजना न किंतु रात्रिपूर्वापर
भागतया द्वैविध्यमेव प्रयोजकं न त्वर्धरा
त्रगतत्वेन कापि तृतीयाविधा तथाच वत्सपा
र्थः रात्रौ संक्रमणे भानो विषुवत्यवने दिवा
यायाः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः

© Dharmartha Trust J&K. Digitized by eGangotri

स्मृताः अस्यार्थः रात्रावित्यविशेषात्सर्वसंक्रा
न्तौ विषुवति तुलामेषयोः अयने कर्कटमकर
योः संक्रमे सन्निहितत्वेनौचित्यादर्धरात्रादथः
पूर्वदिनापराह्णनालिकाः अर्धरात्रोर्ध्वपरदि
नपूर्वाह्णनालिकाः पुण्यपुण्यतरपुण्यत
मत्वेन ग्राह्याः तथा च धनुर्मीनावतिक्रम्य कुं
भं च मिथुनं तथा पूर्वापरविभागेन रात्रौ संक्र
मते रविः दिनान्ते पंच नाड्यस्तु पुण्याः प्रोक्ता
मनीषिभिः उदिते च तथा पंच दैवे पित्र्ये च क
र्मणि अत्रेदमभिधेयं मकरमेषतुलाकर्क
पूर्वरात्रार्धे संक्रमश्चेत्तदा पूर्वदिनान्ते पंच
नाड्यः पुण्यतमाः ततः पूर्वाः पंच पुण्यतराः
ततोऽपि पूर्वाः पंच पुण्याः अपररात्रार्धे चेत्तदा
द्वितीयदिनोदये पंच घटिकाः पुण्यतमाः तदु
त्तराः पंच पुण्यतराः ततोऽप्युत्तराः पंच पुण्या
दैविके पैतृके च कर्मणि ग्राह्या इति दिनार्धयो

© Dharmartha Trust J&K. Digitized by eGangotri

सं सू: १०७

जना अतएवज्योतिर्विदः सकलमपि दिनं
तिथिकरणादिषु दिवागतसंज्ञया रात्रिं तु
पूर्वापरभागद्वैधेन प्रविष्टसंज्ञया शेषसंज्ञ
या च गणयित्वा लिखन्ति न तु पूर्वार्धरात्रेते
षां कापि संज्ञा तस्मात्कश्मीरेषु विशिष्टे रात्रवि
ता रात्रौ प्रविष्टशेषसंज्ञाभ्यां सर्वेषामपि से
क्रमाणां ग्रहणकालव्यवस्थितिः सिद्धेत्यलमस्तु
तायासेन इदमेव कल्पतरावपि देवीपुराण
वचनैरुदाजहार अस्तसूर्योर्धरात्रे तु उदये
स्तमयेपि वा मानार्थं भास्करे ग्रहणमसूर्योश
र्वरीदले असूर्योर्धरात्रे उदयास्तमये सन्ध्यायां
वा संक्रमे तत्र सामान्यवचनबलादसूर्यो शर्व
रीदले माप्यसंयस्तु ग्रहणकालत्वं तत्प्रथमदिनाप
राह्णगदपदिनार्थैर्ज्ञेयम् एतदेव तत्रैवानुवादे
नदर्शयति अर्धरात्रे त्वसं सूर्योदिवाग्रहणम
नागते अनागते सामान्यवचनबलादप्यसम

107

© Dharmartha Trust J&K. Digitized by eGangotri

त्रसम्पूर्णार्धरात्रसमं व्यपित्रायकालत्वं दिनयो
र्न नतत्रायैश्रान तस्य कर्मणः श्राद्धादेस्तत्रानुष्ठा
नमशक्यत्वात् इत्यर्थः सम्पूर्णउभयोस्तयम्
सम्पूर्णेर्धरात्रे चेत्संक्रमः तदा पूर्वोत्तरयोरह्नो
र्मानार्धग्राह्यम् पूर्वदिनस्योत्तरार्धं परदिनस्य
च पूर्वार्धमिति अतिरेकेपरेहनि अर्धरात्रोत्त
रकालं चेत्संक्रमस्तदागामिनि द्वितीयेह्निमा
नार्धं पूर्वाह्णान्तु पुण्यमित्यर्थः सम्पूर्णउभ
योज्ञेयमित्यत्र ये पूर्वपतास्तेषां वितेपो नत्त
भद्दीयादनीतणीयः नेहाय्यत्नमप्रस्तुत्वादि
त्यलं विस्तरेण इत्यमेवसर्वोवाकार्यापरार्के
पि अथसप्तमी भविष्येआदित्यः ॥
सप्तम्यामथवाषष्ठ्यां पक्षयोरुभयोरपि यो
ह्येकं नभुंजीतनियतात्माजितेन्द्रियः यस्तुएप
परमं प्रोक्तं सततं सत्रयाजिनां सत्यवादिषुप
त्पुण्यं यत्पुण्यं सत्रगामिनां तत्फलं सकलंश

© Dharmartha Trust J&K. Digitized by eGangotri

सं सप्तलोकमुपैति सः सप्तम्यां नक्तभुग्दद्यात्सप्तमा
सू न्ते गां पयस्विनीं सूर्यलोकमवाप्नोति भानुव्रतमि
दं शुभं सप्तान्ते वर्षसमाप्तौ यश्चोपवासं सप्तम्यां
१८ समाप्ते हेमपंकजं गाश्चैव शक्तितो दद्याद्धेमघं
टाविभूषिताः एतत्सौरव्रतं नाम सूर्यलोकनि
वासदम् शुक्लपक्षे तु सप्तम्यां यदा संक्रमते र
विः महाजया तदा स्यात्सा सप्तमी भास्करप्रिया
स्नानं दानं तपो होमः पितृदेवाभिपूज
नम् सर्वकोटिगुणं प्रोक्तं तपनेन म
हौजसा यस्तस्यां भानवो भक्त्या घृतेन
स्नापयेद्रविम् सोऽश्वमेधफलं प्रा
प्य ततः सूर्यपदं व्रजेत् पयसा
स्नापयेद्यस्तु भास्करं
भक्तिमान्नरः
॥ छ ॥
॥

108

© Dharmartha Trust J&K. Digitized by eGangotri

विमुक्तः सर्वपापेभ्यो याति सूर्यसलोकताम्
स्थित्वा तत्र चिरं कालं राजा भवति कश्चन महान्
ये घा कथिता सप्तमी त्रिपुरान्तक यामुपोष्य न
रो भक्त्या विपुलामन्नं लभेत् ततो याति परं
ब्रह्म यश गत्वा न शोचति शुक्लपक्षस्य सप्तम्यां
यदा हस्तं करो भवेत् तदा सा स्यान्महापुण्या
सप्तमी पापनाशिनी तस्यां सम्पूज्य देवेशं चि
त्रभानुं विभावसुम् सप्तजन्मकृतात्पापान्मुच्य
ते नात्र संशयः यश्चोपवासं कुरुते तस्यां निय
तमानसः सर्वपापविनिर्मुक्तः सूर्यलोके मही
यते दानं यद्दीयते तेन तत्फलं चाक्षयं भवेत्
ऋग्वेकादेव पुरतोज मा प्रहापरेणतु ऋग्वे
दस्य समस्तस्य यच्छ्रुते सा फलं ध्रुवम् सामवे
दफलं साम यजुर्वेदफलं यजुः अथर्वणोथ
वेदस्य यच्छ्रुते विपुलं फलं यतः पापसमो
हं तु नाशयत्यत्र भास्करः करतः सप्तमी तेन

© Dharmartha Trust J&K. Digitized by eGangotri

सं देवोक्तापापनाशिनी अस्यामभ्यर्च्य वरविं
स्त याति सौमनसं शुभम् विमानवरमारुह्य कर्पू
१०५ रोद्भवशुभ्रमम् कर्पूरं स्वर्णं कान्त्यात्रेयसप्तमः
कल्पः सौर्यैर्हरितसप्तमः सदा मोदते तत्र सुचिरं
वृन्दारकगणैः सह पुनरेत्य भुवं रूपाभवे
द्वीपाधिपाधिपः इति सप्तमीप्रशंसा ।
अस्याश्च रविवारेन तत्र संयोगाद्विजयसप्तम्या
दियोगातिशयाः रविवारप्रशंसायामेवप्रो
क्ताः षष्ठ्याश्च सप्तमीयोगे वारश्चेदंशुमा
109 लिनः योगोऽयं पद्मको नाम सहस्रार्कग्रहो
पमः अथास्याः कालविचारः ॥
सप्तमी पूर्वविद्धैव ग्राह्या षण्मुन्योर्वसुर
न्ध्रयोरिति युग्मवाक्याभिधानात् ॥
स्कान्दे षष्ठ्येकादशपमावस्या पूर्वविद्धा
तथाष्टमी सप्तमी परविद्धा च नोपोष्यास्ति
थिपञ्चकम् । ब्रह्मवैवर्ते ॥

सप्तमीनाष्टमीयुक्ता नसप्तम्यायुताष्टमी सर्वे
ष्वव्रतकल्पेष्वष्टमीपरतःशुभा पैठीनसिः
नागविद्धातुयाषष्ठीरुद्रविद्धोदिवाकरः कामवि
द्धोभवेद्विष्णुर्नग्राह्यास्तेतुवासराः नागःपंचमी
रुद्रोष्टमीदिवाकरसप्तमी कामस्त्रयोदशी वि
ष्णुर्द्वादशी यदातुसर्वेषुरस्तमयपर्यन्ताषष्ठी
परेद्युस्तिथित्वयवशात्तोस्तमयादर्वागष्टमीवि
मुहूर्त्तातदासर्वविद्धाया प्रलाभात्सरविद्धापिस
प्तमीपूज्या तथाचोक्तम् इतरान्यतराभावेपर्व
सुपूज्यातिथिर्नीम्येति तथाचव्यासः शाषप्र १
वंसदि २५ पतद्देवाभिप्रेत्यमाधवः सप्तमीप्र
वेविद्धेवव्रतेषुनिखिलेष्वपि प्रलाभेसर्वविद्धा
याःपरविद्धापिरद्यताम् चैत्रशुक्लसप्तम्याद
मनकाद्यैः सूर्यपूजा देवीपुराणेचैत्रतिथिप्र
क्रमे भास्करस्यतुसप्तम्यांपूजादमनकादिभिः
हुत्वा प्राप्नोति भोगादीन्विगतार्तिर्महातपाः

© Dharmartha Trust J&K. Digitized by eGangotri

सं आख्ये प्राषाढशुक्लासप्तम्यांविवस्वान्नामभा
त्र स्करः जातःसर्वोत्तवतस्मात्तंतत्रोपोष्ययजेत्स
११० दा रथचक्राकृतौरम्येमंडलेसर्ववर्णके भ
क्त्याभोज्यैस्तथापेयैःपुष्पैःसुपविलेपनैः मा
र्गशीर्षशुक्लासप्तमीमित्रसप्तमी आख्ये ॥
यदिषष्ठोर्दितिरांनेयंतदेवाकृतिमत्तरा अदि
तेः कश्यपाज्जातोमित्रोनामदिवाकरः सप्त
म्यांतेनसाख्यातालोकेस्मिन्मित्रसप्तमी तस्यां
चस्नपनेकार्यंतस्मैमित्रायभानवे तत्रोपवा
सः कर्तव्योभक्ष्याण्यथफलानिवा रात्रौजाग
रणंकार्यंगीतनृत्यपुरस्सरम् सप्तम्यांवपत
ऊर्यातः स्नात्वायजेद्दिवा दीपैः कुसुमसं
भारैः भक्ष्यैःपिष्टमयैः शुभैः मधुनाचप्रभूतेन
होमजप्यसमाधिभिः ब्राह्मणान्भोजयेत्पश्चा
द्धितानार्यांश्चबान्धवान् सप्तम्यांसंविभज्यास्य
तथार्थैर्नर्तनर्तकाः दिनद्वयेचभोक्तव्यंमिष्टमन्नं
मन्नंमधुस्तं दिनद्वयेषष्ठ्यांसप्तम्योः माघशुक्लस
प्तमीजयन्ती सासूर्यग्रहणात्तुल्या ।

110

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मा महारुणोदयव्यापिन्यां स्नात्वा सूर्यार्घ्यं दद्या
त्. तदुक्तं भविष्योत्तरे माघस्य शुक्लपक्षे तु स
प्तमीयात्रिलोचन जयन्तीनाम सा प्रोक्ता सर्वपा
पहरा तिथिः स्मृतिचन्द्रिकायाम्. सूर्यग्रहणतुल्या तु शु ग्रहण॰
क्ला माघस्य सप्तमी अरुणोदयवेलायां तत्र स्ना
नं महाफलं माघमासि सिते पक्षे सप्तमी कोटि
भास्करा कुर्यात् स्नानार्घ्यदानाद्यमायुरारोग्य
संपदः अर्घ्यदानमन्त्रस्तु यद्यज्जन्मकृतं पा
पं मया सप्तसु जन्मसु तन्मे रोगं च शोकं च भा
स्करी हन्तु सप्तमी इयमेव रविवारेण पुंनाम्ना
नक्षत्रेण युक्ता महती प्रोक्ता तथा च गार्ग्यः
रविवारेण युक्तायां शुक्लायामुत्तरायणे पुंना
मधेयनक्षत्रे पूजयेच्च दिवाकरम्. उत्तरायणे
मासि पुंनामधेयनक्षत्राणि हस्तो मूलं तथाश्वि
न्यो मृगशीर्षं पुनर्वसुः पुंनामधेयनक्षत्राणि
तान्याहुर्महर्षयः वराहपुराणे अथापरेम

© Dharmartha Trust J&K. Digitized by eGangotri

सं ह्यराजन्व्रतमारोग्यसंततिं कथयामिपरंशुभं
स्तू सर्वपापप्रनाशनं तथैवमाघमासस्यसप्तम्यां
॥। समुपोषितः पूजयेद्भास्करंदेवंविश्वरूपंसना
तनं आदित्यभास्कररवेभानोसूर्यदिवाकर
प्रभाकरेतिसम्पूज्योदेवःसर्वेश्वरोरविः षष्ठ्यां
चैवकृताहारःसप्तम्यामुपवासकृत् अष्टम्यां
चैवभुंजीतपयपवविधिक्रमः अनेनवत्सरंपू
र्णंविधिनायोर्चयेद्रविं तस्यारोग्यंधनंधा
न्यमिहजन्मनिजायते परत्रचशुभंस्थानंय
द्गत्वाननिवर्तते भविष्यराणे आदित्यः
माघमासेतुशुक्लायांसप्तम्यांसमुपोषितः
यःपूजयेच्चमांभक्त्यातस्याहंतुरापतोव्रजे
एवंचोभयसप्तम्यांमासिमासिसुरोत्तम य
स्तुमांपूजयेद्भक्त्यावर्षमेकंसदादरात् प्रय
च्छामिस्वतेनतस्याशात्मनोह्यरोगसंभवम् वि
त्तंयशस्तथाविद्यामारोग्यंपरमंतथा ॥

माघेमासिसमन्ब्रह्मकुण्डलापतेजितेन्द्रियः उपो
ष्यविधिवत्सष्ठ्यांश्वेतमाल्यविलेपनैः पूजयि
त्वाचमांब्रह्मन्वीरहोमंसमाचरेत् प्रीणयित्वा
हरिंभक्त्याहविषापद्मलोचनं दध्योदनेनपय
सापायसेनद्विजांस्तथा तस्यैवकुसुमपत्रस
षष्ठ्यांसम्यगुपोषितः रक्तोत्पलैःसुगंधाढ्यै
रक्तपुष्पैश्चपूजयेत् षष्ठ्यांषष्ठीविहायांसप्त
म्यां एवंयःपूजयेभक्त्यानरोमांविधिवत्सदा
उभयोरपिदेवेन्द्रसम्पूर्णंलभतेफलम् वीरहो
मंवह्निहोमम् हरिंसूर्यं अत्रपकेंव्रतंमाघशु
क्लसप्तमीमाघे अपरंसांवत्सरिकं अन्यत्स
तह्वयसप्तम्यां यावज्जीवंसदेति अवणादि
तिव्रतत्रयमिष्टं अत्रचपुनःपुनःपुत्राख्यफल
श्रुतिः दार्दीप्यार्थेतिसिद्धम् श्रीः
सूर्यव्रतेप्रशंसादौसूर्यस्याथव्रतेषुतु आ
दित्यवारः संक्रान्तिः प्रशंसामास्यास्ततोभिदाः

© Dharmartha Trust J&K. Digitized by eGangotri

सं ततस्तत्कर्मकालोथसप्तमीसप्रशंसना अ
स्मृ मास्याकर्मकालोथभेदामासत्तवारतः श्रीः
११२

त्तिलेनजायतेमूर्धादीपेनश्रोत्रचक्षुषी रूपे
ननासिकास्कन्धौतीरेणसंछ्रुतेनहृत् मध्
नोपस्थऊत्तवस्त्रायेनहस्तपादकाः नैवेद्येन
तुसर्वाङ्गंएवंपिंडविधिःस्मृतः अग्नौऽऊतेनदे
वस्याभूमिस्याद्द्विजतर्पणैः नरकास्थास्तुपिं
डेनत्रिविधंश्राद्धमुच्यते इतिसामान्यम् अपि
यन्नःकुलेजायाद्यस्माकंमतिमान्नरः अऊर्व
न्विनशाकादिपिंडान्यो निर्वपिष्यति ॥

112

अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंचितम् अ

© Dharmartha Trust J&K. Digitized by eGangotri

अत्रेहापि न गोभूमयवगोरसविक्रयाः गोर
सं चैव सक्तूंश्च तैलं पिण्याकमेव च अपूपान्भ
क्षयेच्छूद्राद्यच्चान्यत्पयसा कृतम्

© Dharmartha Trust J&K. Digitized by eGangotri

सं गेतत्सन् गेंकारंकारंशुनिनुतिंस्मारंस्मारं
टी स्मारंचतद्भिः शिष्याणांहृदयेशुद्धिंसंप्रदा
९८ यंप्रकाशये विहितकर्मार्हत्वप्रयोजकोऽथ
र्मविशेषः शुद्धिः विहितकर्मानर्हत्वप्रयोज
कत्वधिकविशेषोऽशुद्धिरशौचमिति यावत्
तस्याशौचस्यसपिण्डादिजननमरणमुख्यं
निमित्तं अशौचिभिःसहसंसर्गतदन्नभोज
नादिकमनुख्यंनिमित्तं तदेतस्मिन्नशौचि
भिःसहसंसर्गतदन्नभोजनादिकमनुख्यंनि
मित्तं तदेतस्मिन्नशौचे विहितकर्मानर्हत्वं
सामान्येनाभोज्यान्नत्वं यथावद्व्यवस्थित
शौचस्नानकर्मन्यागित्वमस्पृश्यत्वंचेतिसि
द्धं मनुः उभयत्रदशाहानिकुलस्यान्नंनभु
ज्यते दानंप्रतिग्रहोहोमःस्वाध्यायश्चनिव
र्तते दशाहपदमशौचान्त्यदिनपरं उभयत्र
जननेमृत्यौच अशौचिसिद्धान्नं अनशौचिभि :
नभोक्तव्यं अशौचिभिस्तुभोक्तव्यमेव यदाहयम :

113

© Dharmartha Trust J&K. Digitized by eGangotri

सूतकेतुसमुत्पान्नमदोषमत्ररब्रवीत् तथा
चोक्तं शुध्येद्विप्रोदशाहेनद्वादशाहेनभूमिपः
वैश्यःपंचदशाहेनशूद्रोमासेनशुध्यति
शौचाशौचंप्रकुर्वन्तिशूद्रवद्वर्णसंकराः व
र्णसंकराश्चपक्षस्ववर्णास्वस्त्रीषुजाताः सं
वृत्तः विप्रोदशाहमासीतवैश्वदेवविवर्जितः
पंचयज्ञविधानंतुनकुर्यान्मृत्युजन्मनोः
जाबालिः सन्ध्यापंचमहायज्ञान्नैत्यिकंस्मृ
तिकर्मच तन्मध्येहापयेत्तेषांदशाहान्तेपु
नःक्रियाः अत्रपुनः सन्ध्यामिष्टिंचरुंयज्ञेया
वज्जीवंसमाचरेत् नत्यजेत्सूतकेवापित्यजन्
गच्छेदधोद्विजः इतिमूलस्यवचनाद्विप्रोष
षमाहजातकर्मणः सूतकेतुसमुत्पन्नेस्मार्त
कर्मकथंभवेत् पिंडहोमंचरुंयज्ञमसगोत्रे
णकारयेत् पिंडयज्ञःपिंडपितृयज्ञः अमा
वस्याश्राद्धमितियावत् असपिंडाः असगोत्राः

सं अन्यगोत्रजाः यत्तु नः दानं प्रतिग्रहो होमः स्वा
प्र शौ ध्यायश्च निवर्तते इति तत्काम्यहोमाभिप्रायं वे
१५ ति पारिजाते बृहस्पतिः सूतके मृतके चैव अश
क्तौ श्राद्धभोजने प्रवासादिनिमित्ते हावयेन्न
तद्धावयेत् जाबालः जन्महानौ वितानस्थक
र्मत्यागो विधीयते शालाग्नौ केवलो होमः का
र्यः पवान्यगोत्रजैः शालाग्निः स्मार्ताग्निः छन्दो
गपरिशिष्टे प्रकृतं हावयेच्छ्राद्धे तदभावे कृ
ताकृतम् कृतमोदनसक्त्वादि तण्डुलादिकमकृ
114 तं व्रीह्यादि चाकृतं प्रोक्तमिति द्रव्यं त्रिधा बुधैः
अत्रैव सूतके कर्मणां त्यागः सन्ध्यादीनां वि
धीयते होमः श्रौते तु कर्तव्यः शुष्कान्नेनाथवा
फलैः स्मार्ते श्रौते तु शुष्कान्नं फलं च निषिद्धमस
गोत्रद्वारा पक्वान्नेनैव होमः इति मनुपरिशि
ष्टे पंचयज्ञविधानं च न कुर्यान्मृतजन्मनोः
होमस्तत्र तु कर्तव्यः शुष्कधान्यफलेन वा ॥

© Dharmartha Trust J&K. Digitized by eGangotri

संवर्तः फलहोमंतुनेच्छन्तियाज्ञिकानहित
हविः पक्वान्नहोममन्येनकारयेदितिनिश्चयः
कात्यायनस्यवचनात्परतोब्राह्मणःस्वयम् सं-
ध्यायांविशेषमाह सूतकेमृतकेचैवसन्ध्याक-
र्मनसंत्यजेत् मनसोच्चारयेन्मन्त्रान्प्राणायाम-
विनाद्विजः मंजलिप्रक्षेपस्तुसावित्रीमुच्चार्य
कार्य इतिपैठीनसिः सूतकेसावित्र्यांजलिंप्र-
तिप्रदक्षिणंकृत्वासूर्यंध्यायन्नमस्कुर्यादि-
ति विष्णुपुराणे उपस्थानमन्त्रोच्चारनिषेधः
सर्वकालमुपस्थानंसन्ध्ययोःपार्थिवेष्यते अ-
न्यत्रसूतिकाशौचविभ्रमातुरभीतितः व्याघ्र-
पात् स्मार्तकर्मपरित्यागोराहोरन्यत्रसूतके
श्रौतकर्मणितत्कालंस्नातःशुद्धिमवाप्नुयात्
राहोःसूतकादन्यत्रसूतकेआशौचे इत्यर्थः
राहुसूतकेतुस्मार्तकर्मश्राद्धादिग्रासमामाने
नक्रियते ग्रहणविचारेप्रपंच्यते ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सं अशौ १५

115

अशौचमध्ये यदि कदाचिद्ग्रहणं भवेत् तदाग्र
हणनिमित्तस्नानदानादौ निषेधः तथा च बृ
हद्वसिष्ठः चन्द्रसूर्यग्रहे स्नायात्सूतमृतकेपि
वा अस्नायी मृत्युमाप्नोति स्नायी मृत्युं न विन्दति
सूतके मृतके चैव न दोषो राहुदर्शने तावदेव भ
वेच्छुद्धिर्यावच्छुद्धिर्न दृश्यते अथास्पृश्यत्ववि
चारः तत्र जननाशौचे मातुरेव न पित्रादीनाम्
अपरार्के पित्रोस्तु सूतके मातुस्तद् दर्श
नाद्ध्रुवं तदहर्न प्रदुष्येत सर्वेषां जन्मकारणात्
अस्यार्थः सूतिकं सूतिभवमाशौचमस्पृश्यत्व
लक्षणं मातापित्रोरेव नान्येषां सपिण्डानाम् तत्रा
पि यदि पिता सूतिकास्पर्शं न भजेत तदा मातु
रेव न पित्रादीनाम् तथा च वसिष्ठः
नाशौचं सूतके पुंसः संसर्गं चेन्न गच्छति रजः
स्तत्राशुचि भवेत्तच्च पुंसि न विद्यते ॥
बृहस्पतिः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मृगावाशौचं तु सर्वेषां सूतके मातुरेव च स्नानं तु
र्याच्चायपितातातनयोर्हि सचैलिनः संवर्तः जा
ते पुत्रे पितुः स्नानं सचैलस्य विधीयते माताशु
ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः ब्राह्मे सूत
केतु पुत्रं विहृष्टु जातस्य जनकः शुचिः स्नात्वा
सचैलस्नानं तु शुद्धो भवति तत्क्षणात् अन्याश्च
मातरस्तस्य संस्पृष्टेन व्रजन्ति चेत् सपिण्डाश्चापि
सर्वे ष्याः सन्ति सर्वे च नित्यशः शुद्धा इति शेषः
सूतिकायां दशरात्रमस्पृश्यत्वं सर्ववर्णसाधा
रणं प्रचेताः सूतिका सर्ववर्णानां दशरात्रेण
शुध्यति स्तनैश्चन हृष्यकौचं सर्ववर्णेष्वयं
विधिः तथान्यदपि सर्ववर्णसाधारणमशौचं
मनुः परिशिष्टे असपिण्डे स्ववाले प्रोषिते
श्रोत्रियेत्वसौ रात्रिभिः मासतुल्याभिः स्त्रीणां
शुद्धाः सूतेऽन्तरपे अप्रसूतास्तथा स्त्रीशुमातलेवा
न्यवेशु च एवमादावशौचमस्य चतुर्णामपि तु

© Dharmartha Trust J&K. Digitized by eGangotri

सं स्नाता पृथग्निस्तुस्रपाभवति कर्मार्हात्वेतत् सूतिका
पुत्रवंती विंशतिरात्रेण कर्माणि कारयेत् मासेन
१९ स्त्रीजननीमिति प्रचेतोवचनापेक्षयैव पत्तनि
गुणं ब्राह्मणस्त्रीविषयं ब्राह्मणेतरस्त्रीविषयं
वेतिमन्यन्तेवैविघवृद्धाः ब्राह्मण्यास्तु दशरा
त्रयवातीतेकर्मार्हत्वम् तथाचापरार्के सोम
यागं प्रत्याह कात्यायनश्नतिपत्नुदक्यादीतान्नृपा
णिनिधायसिक्तान्वासीतपोश्रवणान्तिकेष्टे
ष्वग्निवेलयोर्वेदिसमीपे स्नात्वास्त्रिरात्राने
गोमूत्रमिश्रेणोदकेनस्नापयित्वापरिधानादि
कं सान्निपातिकं प्रसूतायाश्चदशरात्राहर्धेस्ना
नादि वसिष्ठः प्रजागावोमहिष्यश्च ब्राह्म-
णीच प्रसूतिका दशरात्रेण शुद्ध्यन्ति भूमिष्ठं
चनवोदकम् तथाच व्यासोपि सूतिकावास
निलयाजन्मदानामदेवताः ॥
॥ ॥

116

तासंयोगनिमित्तंतुशुद्धिजन्मनिकीर्तितेमा
दि मरणाशौचेयस्मात्तस्यसंपातस्यकालनिय
ममाह देवलः अशौचकालाद्विज्ञेयंस्पर्शने
तुविभागतः शूद्रविट्क्षत्रविप्राणांयथाशास्त्र
प्रदेशनात् मनुः स्पर्शक्रमेणवर्णानांवि
चतुष्पंचषड्दिनैः भोज्यान्नादशभिर्विप्राःशो
धाद्विर्विषड्दिनैः शूद्रैः दशमेह्निशूद्रस्यक
र्तव्यंस्पर्शनेविडः मासेनैवाविशुद्धिःस्यात्सूत
केमृतकेपिवा मातापित्रोरनुपदमरणेस्य
संपातव्यवस्थामाह शंखः मातर्यादौतुप्र
मीतायामशुद्धौम्रियतेपिता पितुःशेषेणशु
द्धिस्तुमातुःकार्यातुपक्षिणी प्रथमंमातरि
मृतायां तदशौचमध्येपितायदिम्रियते
तदास्यसंपातान्तरमशौचंसर्वशौच
विभागावच्छिन्नंपित्राशौचाप्तेतयाकार्य
मेवनतुमात्राशौचेनैवगतार्थम् पितरितु
प्रथमंमृते तदशौचमध्येमाताचेन्म्रियते त

© Dharmartha Trust J&K. Digitized by eGangotri

सं दानस्पृश्यत्वलक्षणमशौचंपत्नीत्यापि
कार्यं नत्वशौचविभागावच्छेदेन नचेदंवाक्यं
१७ श्रौतस्मार्तकर्मानधिकारलक्षणाशौचसंको
चपरम् तथासति प्रथममृतायांमातुरशौच
मध्येमृतस्यपितुरशौचान्त्यदिनपक्षद्वयोरे
वौर्ध्वदेहिकंसमकालमेवकरणीयंप्राप्नुया
त् तच्चविरुद्धं तथाचापरार्के प्रथमेहनि
यःपिंडस्तेनमूर्धाप्रजायतेइतिविचारे पक्षेस
तिसन्निपाताशौचेतन्मध्येजातायामपिश्रा
दिनैकस्मिन्दिनेपक्षैक शः पिंडदानादिक
र्तव्यमितिगम्यते तस्यपुनरस्पृश्यत्वभोज्या
न्नत्वंचभवत्येवनिमित्तान्तरत्वान्नयोरिति
तथाच देवयाज्ञिकनिबन्धे मातुरशौचम
ध्येऽभ्युदयेऽपिपितुःसुतः प्राग्यश्राद्धादिकं
वीतनूनमेकादशेहनि।। तथाच गौतमोक्त
दशाहेदर्शविचारे अन्तर्दशाहेदर्शेचेत्त
त्रसर्वंसमापयेत् ।।

© Dharmartha Trust J&K. Digitized by eGangotri

पिंडोरस्त्वयावदाशौचंदद्यात्पिंडाग्जलांजलीन्
कविदस्यैश्यत्वस्यापवादमाह प्रचेताः कार
वः शिल्पिनो वैद्यादासीदासस्तथैवच राजानो
राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः एतच्चप
दान्यथिकं वैद्यादिकार्यं नचैवतेषामशौच
विधानं शातातपः मूल्यकर्मकराः शूद्रादा
सीदासस्तथैवच स्नानेशरीरसंस्कारेगृह
कर्मण्यदूषिताः चिकित्सकोयत्कुरुतेनद
न्येनशक्यते ग्रतः चिकित्सकः स्पर्शेशुद्धो
भवतिनित्यशः ग्रथाशौचापवादः सद्वि
धा येषुमृतेषुवाजातेषुसपिंडानामशौचं
नभवतीत्येकः प्रकारः सपिंडेषुमृतेषुवाजा
तेषुयेषांनाशौचमिति द्वितीयः नत्रयेषुमृ
तेषुवाजातेषुसपिनामशौचंनभवतितानाह
संन्यासिप्रभवरोज्ञातिस्त्यागान्सपिंडनमित्य
नुदृतोमनुः उत्स्राहवद्गानांचविद्युतापार्थे

© Dharmartha Trust J&K. Digitized by eGangotri

सं येनच गोब्राह्मणस्यचैवार्थेयस्यनेच्छन्तिपा

ति र्थिवाः उद्यतैराहवेशस्त्रैः क्षत्रधर्महतस्यच

११८ सद्यःसन्तिष्ठतेयज्ञस्तथाशौचमितिस्थितिः

यमः डिम्बाहवहतानांचतथैवप्राणसत्रिणां

नदेशापदंष्ट्रिभ्यः सद्यःशौचंविधीयते भृ

रवग्निजलसंग्रामदेशान्तरसंस्थसन्न्यासनश

नाशनिहतमहाध्वनिकानामुदकक्रियाकार्या

सद्यःशौचंभवति कश्यपस्तु श्मशानगता

नामनिहतानामग्निजलप्रविष्टानांभृगुसं

ग्रामदेशान्तरगतानांत्रिरात्रेणशुध्यतीति

एषांसद्यःशौचत्रिरात्राशौचव्यवस्थासगुण

निर्गुणापेक्षयेत्यपरार्के अप्रतिषिद्धभृग्वा

दिमृतानामेतत् प्रतिषिद्धमृतानांतूदकक्रि

याशौचंचनिवर्तते तथाचमनुः वृथासङ्क

रजातानामित्यादि शुद्धिचिन्तामणौ म

तैर्मध्येनात्मघातिनामसंस्कारमर्हतीत्युक्तं

तथाच याज्ञवल्क्यः ॥

118

© Dharmartha Trust J&K. Digitized by eGangotri

पाषंडमनाश्रिताः स्तेना भर्तृघ्न्यः कामकाधिकाः
सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः
तन्मरणे सति सपिंडैर्नाशौचं ग्राह्यं नोदकं कार्य
मित्यर्थः सुराप्य इत्यादिषु लिंगमविवक्षितं
पुरुषाणामप्येतादृशत्वादिति पारिजाते
गौतमः प्रायानशकशस्त्राग्निविषोदकोद्बन्धनप्रप
तनैश्चेच्छतामिति अनिच्छतां तु विशेषमाहां
गिराः अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादि
भिः तस्याशौचं विधातव्यं कर्तव्या चोदकक्रि
या अथ सपिंडेषु जातेषु मृतेष्वपि येषां नाशौ
चं तानाह कात्यायनः नत्यजेत्सूतके कर्म ब्रह्म
चारी कदाचन नदीक्षणात्परं यज्ञे न कृच्छ्रादित
पश्चरन् पितर्यपि मृते नैषां दोषो भवति कर्हि
चित् अशौचं कर्मणोन्ते स्यात् त्र्यहं वा ब्रह्मचा
रिणां एषां ब्रह्मचारी दीक्षिततपस्विनां क
र्मणोन्ते ब्रह्मचर्ययज्ञकृच्छ्राद्यवसाने शौचं

© Dharmartha Trust J&K. Digitized by eGangotri

सं
ति
११५

भवति तेनपित्रोरपिमरणे ब्रह्मचारिणस्त्र्यह
मेवाशौचं तथाचमनुः आदिष्टीनोदकंकुर्या
दाव्रतसमापनात् समाप्तेतूदकंकृत्वात्रिरात्र
मशुचिर्भवेत् ब्राह्मे गृहीतमधुपर्कस्ययजमा
नादथद्विजः पश्चादशौचंपतितंनभवेदितिनि
श्चयः तद्गृहीतदीक्षस्यैवविधमहामखे स्नानंत
वभृथेयावत्तावत्तस्यनविद्यते निवृत्तेकृच्छ्रहो
मादौब्राह्मणादिभोजने गृहीतनियमस्या
पिनस्यादन्यस्यकस्यचित् निमन्त्रितेषुविप्रेषु
प्रारब्धेश्राद्धकर्मणि निमन्त्रणाद्धिविप्रस्य
स्वाध्यायादितरस्यच देहेपितृषुतिष्ठत्सुना
शौचंविद्यतेकुचित् नैष्ठिकस्याथवाकस्य
भिताथंप्रस्थितस्यवा वानप्रस्थस्यचान्यः
स्यसाधिकारस्यसर्वदा प्रतिग्रहाधिकारा
श्चनिवृत्तस्यनविद्यते गोमलादौवेश्यानां
रताकालात्ययादपि ॥

119

© Dharmartha Trust J&K. Digitized by eGangotri

अपिदातृगृहीत्रोश्च सूतके मृतके तथा अविज्ञा
ते न दोषः स्याच्छ्राद्धादौ न कथंचन विज्ञाते भो
क्तुरेव स्यात्स्नायच्छिन्नादिकं क्रमात् भोजनार्थं त
संभुक्ते विप्रैर्दातुर्विपद्यते यदा कश्चिन्न दोषस्त्विष्टे
शेषं त्यक्त्वा समाहिताः आचम्य परिकीर्येन जले
नस्युर्व्ययोऽमलाः तथा च यज्ञव्रतविवाहेषु श्राद्धे
होमेऽर्चने जपे आरब्धे सूतकं न स्यादनारब्धे तु सू
तकं सूतमिति मृतकस्याप्युपलक्षणम् आरं
भश्चात्रैवोक्तः आरंभो वरणं यज्ञे संकल्पो व्रतस
त्रयोः नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रि
या शुद्धिचिन्तामणौ गृहीतमधुपर्कस्यर्त्विव
नाद्गृहीतमधुपर्कस्य पूर्ववरणे कृते भोक्तुः
ब्राह्मणस्य नाशौचे प्रकृतेस्मिन्निमन्त्रितस्या
पि भवेत्स्वेवेति शंखः विवाहव्रतयज्ञेषु अन्तरा
मृतसूतके सर्वसंकल्पितार्थानि भोज्यानि मनु
रब्रवीत् अपरार्के विष्णुः न देवप्रतिष्ठोत्सवविवि

© Dharmartha Trust J&K. Digitized by eGangotri

सं
त्रि
१२०

120

वाहेषु सर्वसंकल्पितेषु गृहीतमधुपर्कस्येति
यजमानसकाशाद्गृहीतमधुपर्कस्यर्त्विजो म
धुपर्कग्रहणानन्तरं प्रारब्धकर्मण्याशौचेनास्ति
मधुपर्कग्रहणात्पूर्वं वरणे कृतेऽपि अशौचमेवे
त्यर्थः महामखे सोमयागादौ दीक्षणीयेष्ट्यनन्तर
कालमवभृथस्नानमधीतवेदत्रयस्य यजमा
नस्याशौचाभावः निवृत्ते कृच्छ्रहोमादाविति
होकृच्छ्रे प्राजापत्यादि निवृत्ते समाप्ते ब्राह्मणा
दिषु इति कर्मणि मया विप्राः भोजयितव्या इति
गृहीतनियमो यस्तस्यान्नं भुञ्जानानामन्यत्रल
ज्ञातानामपि दोषाभावः व्रतादौ कृतसंकल्प
स्येति कश्चित् निमन्त्रणादीनिति विप्रस्य निमं
त्रणानन्तरं अशौचं न भवतीत्यर्थः नैष्ठिकस्ये
ति नैष्ठिकब्रह्मचारिणः अनन्तस्य चतुर्थाश्रमि
णो शौचविभिन्ताग्रहणे दोषाभावापवेति भावः
वानप्रस्थस्याप्यशौचविदोषाभावः गोमंगल्यादिक्षे

© Dharmartha Trust J&K. Digitized by eGangotri

वैश्यानां गोजादिस्वस्त्ययनक्रियायामशौचा
भावः अन्यथाशौचसमाप्तिप्रतीक्षायामुपस
र्गव्याध्यादिनागवामत्यन्तपीडने भूतरक्षाका
लातिक्रमादिति दातृगृहीत्रोरिति यदाह
न्तरशौचं भोक्तः वा दातृभोक्तृभ्यामपिनज्ञा
यते श्राद्धादिषु भोजने उभयोरपि दोषाभावः
यदात्वशौचं स्वयं दाता न जानाति भोक्ता तु जा
नाति तदा लोकाद्विज्ञानसम्भायश्चित्तमशौचं
च अयं च शौचाभावो यत्र कर्म पुरस्कारेण क
थितस्तत्कर्मण्येव न तु सन्ध्यावन्दनादावपि
नदेशविप्लवेनापद्यपि काष्ठायामशौचमिति
वत्सरस्यान्तरम् दिनदशकं दिनसप्तकमथ
वा दिनपंचकं वदन्त्येके त्र्यहमपि केचित्तु ताः
संकल्पार्थं वदन्ति कालविदः अनारंभेपि
पारिजाते कन्यायाश्च प्रार्थिते न सन्निहितस्या
न्तराभावे च विप्लवे वाभ्यनुज्ञातवान् अनारं

© Dharmartha Trust J&K. Digitized by eGangotri

सं भविशुद्ध्यर्थं कूष्माण्डैर्जुहुयाद्घृतम् । गां दत्त्वा पंच
गव्याशी ततः शुध्यति सूतकीति निर्णयामृ
२१ तेपि व्रतयज्ञविवाहेषु श्राद्धे होमे र्चने जपे
प्रारब्धे कर्मणि भवेन्नानारब्धे तु सूतकं । अना
रब्धे विशुद्ध्यर्थं कूष्माण्डैर्जुहुयाद्घृतं । गां दत्त्वा
पंचगव्याशी ततः शुध्यति सूतकी । विष्णुः
अशौचं न राज्ञां राजकर्मणि न व्रतिनां व्रते न
सत्रिणां सत्रे न कारूणां स्वकर्मणि न राजा
ज्ञाकारिणां तदिच्छया न देवप्रतिष्ठाविवाह
योः पूर्वसंभृतयोः ब्राह्मे दासादासस्य यत्क
र्म कुर्वन्नपि च लीलया तदन्यो न तमः कुर्वते
न ते शुचयः स्मृताः । यमः स्वस्थ्यहनावयं धर्म
स्त्वापद्यत्वन्यथा स्मृताः । दैवे भये समुत्पन्नेभ
याद्ये विनाशिते पूर्वसंकल्पिते चार्थे तस्मि
न्नाशौचमिष्यते दैवेऽत्पातादौ तच्छान्त्यर्थं हो
मादौ कर्त्तव्ये सूतकाद्यशौचं न वाथ कं प्रथाना

121

© Dharmartha Trust J&K. Digitized by eGangotri

ह्ने॰ सेनापत्यादौ नास्मिन्मृतके सूतके पितृशौचं
पितृगृहावस्थितानां पितृपाकेन सह वसतां त
त्रविद्धद्धमातृकाणां ब्राह्मणशुश्रूणां दशाह
माशौचं विभक्तानां पृथक्पाकेन वसतां मातृ
जातितुल्यं दशाहपक्षमासं यथाक्रममशौचं
पृथक्संसर्गाशौचं संसर्गस्तु शौचिभिः सहास
नं शयनं भोजनं चेति सम्भुचितं व्यस्तं वा
बृहस्पतिः यस्तैः सहासपिंडोपि प्रकुर्याच्छय
नासने बान्धवो वा परो वापि स दशाहे न शुध्य
ति दशाहपदमशौचविजातीयाशौचकाल
परम् ब्राह्मे अन्यजातिमृतं तद्वाप्यात तदन्नं भुंज
ते च ये ज्ञातिनास्तेन रायोक्तास्तदशौचसभा
गिनः कौर्मे असपिंडे द्विजप्रेते विप्रो निर्हृत्य
वभुवत् असित्वा च सहोषित्वा दशरात्रेण शु
ध्यति यस्तैः सहवनं कुर्याच्छयनादीनि चैव हि
बान्धवो वा परो वापि स दशाहेन शुध्यति द

© Dharmartha Trust J&K. Digitized by eGangotri

सं शादप्रदं तदशौचान्नदिनोपलक्षणं तथा च
ति यस्तेषामन्नमश्नाति तदशौचनिवृत्तौ तु स्नानं
१२२ कृत्वा विशुद्ध्यति मनुः अवरश्चेद्वर्णमवरं च
वरो यदि अशौचे स्नेहात्तस्य शौचेन शुध्यति
संस्पृहनवहनार्थं यज्जातीयः शवः तज्जातीयकेन
शौचेन शुद्ध्यतीत्यर्थः ब्राह्मणश्चेत्क्षुद्रं निर्हृ
रति तदा तस्य मासेन शुद्धिः शूद्रश्चेद्ब्राह्मणं
तदास्य दशभिर्दिनैर्विशुद्धिरन्वेयमिति पावि
जाते ब्राह्मे योऽसवर्णं च मूल्येन नीत्वा चैव द
हेन्नरः अशौचं तु भवेत्तस्य प्रेतजातिसमं त्वप
मेवैव वर्णाः सजातीयं दग्ध्वा त्र्यहमशौचिनः
भवति परजातीयं निर्दह्य परजातिवत् प्रना
श्यमेतद्वहनादौ विशेषमाहांगिरः यः कः
श्चिन्निर्हरेत्प्रेतमसपिंडः कथंचन स्नात्वा चै म
लः स्पृष्ट्वाग्निं तस्मिन्नेवाह्नि शुध्यति ॥

पराशरः ॥

122

© Dharmartha Trust J&K. Digitized by eGangotri

अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः प
दे पदे यज्ञफलमानुपूर्व्याल्लभन्ति ते न तेषा
मशुभं किंचित्पापं वा शुभकर्मिणां जलावगा
हनात्तेषां सद्यः शौचं विधीयते प्रेतसंस्पर्शसं
स्कारैः ब्राह्मणो नैव दुष्यति वोढा चाप्यग्नि
दाता च सद्यः स्नात्वा शुचिर्भवेत् पैठीनसि
असम्बन्धे द्विजार्थे वहित्वा दहित्वा च सद्यः शौ
चं सम्बन्धे त्र्यहं येषां मातुलमातृष्वस्रा
दीनां सद्यः शौचं त्र्यहं तेषां सम्बन्धिनां दारा
दौ कृते त्र्यहमित्यर्थः मनुः असपिंडं द्विजं
प्रेतं विप्रो निर्हृत्य बन्धुवत् विशुद्ध्यति त्रिरात्रे
ण मातुराप्तांश्च बान्धवान् यद्यन्नमत्ति तेषां
तु दशाहेनैव शुद्ध्यति अनदन्नन्नमह्नैव न चे
त्तस्मिन्गृहे वसेत् ब्राह्मे ब्राह्मणस्त्वनव
स्थानां नरकोति कदाचन कामान्मोहाद्भया
ल्लोभात्कृत्वा न जातितां व्रजेत् राजविषयेव

सं
ति
१२४

123

नैव ब्राह्मणस्याप्यधिकारमाह मृते राज्ञ
सपिंडे तन्निरपत्ये पुरोहितः मन्त्री वा तदशौ
चं तु चीत्वा सर्वं करोति सः इदं तु संसर्गनिमि
त्ताशौचं संसर्गिणापवनत्वं तद्भार्यादीनां तद्
द्रव्याणां वा तथा चाङ्गिराः अशौचं यस्य
संसर्गादापतेद्गृहमेधिनः क्रियास्तस्य नल
प्यन्ते गृह्याराणां न च तद्भवेत् अथ यः कश्चि
त्कामादकामाद्वा संसर्गमशौचिनो सपिंडः
सन्करोति तस्य प्रायश्चित्तं विष्णुः ब्राह्मणा
दीनामशौचे यः सकृदेवान्नमश्नाति तस्य च
तदशौचं यावदशौचं तदशौचापगमे प्राय
श्चित्तं कृत्वा शुद्धिः । एतत्कृत्वापि तदन्नभोज
ने अवर्णसमकृत्तमेव भुज्यमानेऽन्नशेषान्न
त्यागान्नाशौचं न प्रायश्चित्तं अनशासने के
पाञ्चपरीतायां अशौचे ब्राह्मणो राजन्योऽश्नी
याद्ब्राह्मणादिषु तानपूर्वमधोलोभान्नसा
धर्मेणवान्दते ।

© Dharmartha Trust J&K. Digitized by eGangotri

वृद्धयाज्ञवल्क्यः प्रेतोऽस्मत्यत्रहण्मो तत्र सर्वेश
तिथ्याख्यं कृतान्नं तत्र भक्षयेत् भक्षयित्वा तु त
न्मोहाद्द्विजश्चान्द्रायणं चरेत् कामकारमार्क
ण्डेयः भुक्त्वा तु ब्राह्मणाशौचे चरेत्सान्तपनं द्वि
जः भुक्त्वा तु क्षत्रियाशौचे तथा कृच्छ्रं विधीय
वैश्याशौचे तथा भुक्त्वा शीन्मासान्व्रतमाचरेत्
ग्रकामेक्ष्मागलः अज्ञानाद्भुञ्जते विप्राः सूत
केऽन्नके तथा प्राणायामशतं कृत्वा शुध्यंति
शूद्रसूतके वैश्ये षष्टिर्भवेज्ज्ञात्रिंशति
ब्राह्मणे दश मनुः पक्वान्नस्य हूपंचाह्न सम
ग्रात्मभोजनं ततः शुद्धिर्भवेद्विप्रः पंचगव्यं
पिबेत्तदा मनुपरिशिष्टे अशौचे ब्राह्मण
दीनां न भुञ्जीत कदाचन भुक्त्वा तेषां तथाशौचे
सोमपशुद्धो भवेन्नरः यावदशौचं तेषां स्यात्ताव
त्तस्यापि निर्दिशेत् अशौचान्ते ततः कुर्यात्प्रा
यश्चित्तं विचक्षणः भुक्त्वा तु ब्राह्मणाशौचे न

© Dharmartha Trust J&K. Digitized by eGangotri

सं दींगत्वासमुद्रगाम् गायत्र्यष्टसहस्रन्तुजपे
प्रशौ नशुध्यति भुक्त्वाशूद्रस्यचाशौचेमहासान्त
१२४ पनंचरेत् भुक्त्वातुशौचेविप्राणांशूद्रेनकेन
शुध्यति शूद्रस्यसूतकेभुक्त्वाषण्मासंव्रतमा
चरेत् गोमूत्रंयावकंशीतोज्ञात्वाभ्यासेतुमृत्य
ते ब्राह्मणानांततःभुक्त्वामासमेकंव्रतीभवेत्
अथाशौचेप्यशौचेविसकाशाद्ग्राह्यंतदामरी
चिः लवणेमधुमांसेचपुष्पमूलफलेषुव
तिल्लौषधाजिनेचैवपक्वापक्वेस्वयंग्रहः पु
ष्पेषुचैवसर्वेषुनाशौचंमृतसूतके पक्वंस
क्त्वादिःपक्वंतान्नालादि तथाचाङ्गिरः अन्न
सत्रप्रवृत्तानामाममन्नेनगर्हितम् भुक्त्वाप
क्वान्नमेतेषांत्रिरात्रंतुपयःपिबेत् पक्वान्नमो
दनानि हह याज्ञवल्क्योपि कुमारजन्म
दिवसेविप्रैःकार्यःप्रतिग्रहः हिरण्यभू
गवाश्वाजवासःशय्यासनानिच ॥

124

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र सर्वं प्रतिग्राह्यं कृत्वान्नं तन्न भक्षयेत् भक्षयित्वा
तु तन्मोहाद्द्विजश्चान्द्रायणं चरेत् मनुः ज्ञातेऽ
मावेतदहः कामं कुर्यात्प्रतिग्रहम् हिरण्यधा
न्यगोवासस्तिलान्नगुडसर्पिषाम् शंखलिखि
तौ कुमारप्रसवे नाभ्यामच्छिन्नायां गुडतैलहि
रण्यवस्त्रप्रावरणगोधान्यप्रतिग्रहेष्वदोषः
मनुः शाककाष्ठतृणेषु स्याद्दधिसर्पिःपयः
सुच पुण्येषु चैव सर्वेषु नाशौचं मृतसूतके
विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके पूर्वसंक
ल्पितार्थेषु न दोषः परिकीर्तितः बृहस्पतिः
विवाहे चैव यज्ञे च सूतकं तु यदा भवेत् पैर
त्रं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः अज्ञानेष्वथ
विप्रेष्वन्तरा मृतसूतके अन्यगेहोदकाशा
न्नाः सर्वे ते शुचयो मताः एवं द्वयोरेव जन्ममरण
निमित्तयोराशौचयोः साधारणेनैव नियमा
नुक्त्वा सपिण्डादिविषयभेदेन विशेषमाह

© Dharmartha Trust J&K. Digitized by eGangotri

स हृहस्पति दशाहेन सपिंडास्तु शुध्यति प्रेतसूत
के त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्र
१२५ जाः बीजिनमारभ्य सप्तमपुरुषपर्यन्तं सपिं
डाः ते च संपूर्णाशौचभाजः अष्टमपुरुषादा
रभ्य दशमपुरुषपर्यंतं सकुल्याः समानोदका
ते च त्र्यहाशौचभाजः एकादशपुरुषादारभ्य
जन्मनामस्तानपर्यन्तं गोत्रजाः एकाहाशौच
भाजः अविदितजन्मनामस्तानानां स्ववंशप
वेनस्नापमानानां गोत्रजानां स्नानमात्रापने
यमाशौचमित्यर्थः सपिंडादिस्वरूपं व्यासे।
सर्वेषामेव वर्णानां विज्ञेया साप्तपौरुषी
सपिंडता ततः पश्चात्समानोदकधर्मता त
तः कालवशात्तत्र विस्मृतौ गोत्रनामभिः
समानोदकमन्तात्ततावन्मात्रापि नश्यति
मनुः ॥ सपिंडता तु पुरुषे सप्तमे
विनिवर्तते ॥

125

© Dharmartha Trust J&K. Digitized by eGangotri

समानोदकभावस्तु जन्मनाम्नोरवेदने समानं
जनकशरीरावयवत्वादेकं पिंडं शरीरं येषां ते स
पिंडा इति जीवितां सपिंडशब्दस्य यौगिकोन्वयः
तथा लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागि
नः सप्तमः पिंडदस्तेषां सापिंड्यं साप्तपौरुषमि
ति लुप्यमानपितृपिंडान्वयस्तु मृतानां गजनी
यः न च लुप्यमानपितृपिंडान्वयेनैव जीवतस्त्व
वास्तेषुगगणनेति तथाचैतत्सर्वं विस्तरश
स्तादेतद्विमतिदलने व्याख्यास्यामः ननु ह
नकस्य स्त्रीणां च पिंडशब्दस्य शरीरवाचक
त्वे सपिंडशब्दान्वयो न संभाव्यते व तत्र काप्युन
रूपपत्तिरिति चेत् सत्यम् अस्त्वत्रापि पिंडश
ब्दस्य शरीराभिधायकत्वेन सापिंडशब्दान्वयः
स्त्वतिद्वारा तथा च स्त्रीविषये बृहस्पतिः
चतुर्थे होममन्त्रैस्त्वङ्मांसहृदयेन्द्रियैः
एकत्वं सा गता भर्तुः पिंडे गोत्रे च सूतके दश

© Dharmartha Trust J&K. Digitized by eGangotri

सं कविषयेप्येवमेव दत्तकस्यापि प्रतिग्रहीत्रा
सहैकशरीरान्वयेनैकनिर्वापपिंडान्वयेन च सा
१२६ पिंड्यकृतिविधिबलसिद्धदत्तकाशौचविसृति
तिमिरदलनपवप्रकाशयिष्यामः ॥
अथ सत्यप्येकशरीरारंभान्वयेन सापिंड्ये केषु
चिदाशौचनिकं विशेषान्तरमाह यद्येकजाता
बहवः पृथक्क्षेत्राः पृथग्पनाः एकपिंडाः पृ
थक्शौचाः पिंडस्त्वावर्तते त्रिषु अस्यार्थः वि
न्नामगे पृथक्क्षेत्रा ब्राह्मणाद्यैरसवर्णासु
स्त्रीषु उत्पन्ना मितोजनिताः पृथग्पनाः पितृ
जातसूतको चिन्नाद्भागादन्यादृशभागार्हाः
पृथक्शौचाः पितृजातसूतकाशौचादन्यादृशा
शौचार्हाः एकपिंडाः पित्रा सहैकशरीरान्वयि
नोपि त्रिष्वेव पुरुषेषु पिंडे निर्वाप्यपिंडस्यावर्त
ते एषां पौरुषमेव सपिंडाशौचं अतनकूर्ध्वं स
मानोदकाशौचमित्यर्थः ॥

126

© Dharmartha Trust J&K. Digitized by eGangotri

गौतमः पिंडविनिवृत्तिः सप्तमे पंचमे वा अ
त्रवाशब्दो व्यवस्थितविकल्पार्थः तेन सवर्णा
नां पिंडदंत्यक्ता सप्तमे पितृतो हीनमात्रजा
तिकानां तु पिंडदादारभ्य पंचमे सपिंडतानि
वृत्तिः तेन मध्यभूतास्त्रयः सपिंडा भवन्तीत्यर्थ
तथा च वृद्धजितः पंचमसुपक्रम्य सप्तमजन्म
नोस्तेषां त्रिरात्रमशौचं समानोदकत्वात्
व्रात्ये सपिंडतात्तु कन्यानां सवर्णानां त्रिपौ
रुषी इदमशौचपरम् अत एव सप्तमीपर्य
न्तं मातृसपिंडसाचाविवाहेतिव्यवस्था तथा
च बौधायनः तत्र विट्शूद्रजातीयाः ये स्युः
विप्रस्य बान्धवाः तेषामशौचे विप्रस्य दशा
हाः शुद्धिरिष्यते हारीतः दशाहाः शुध्यते
विप्रो जन्महानौ स्वयोनिषु षड्भिस्त्रिभिस्तथै
केन क्षत्रविट्शूद्रयोनिषु विप्रः क्षत्रियस्य वि
ट्शूद्रेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य शूद्रे सपिंडे

© Dharmartha Trust J&K. Digitized by eGangotri

सं षड्रात्रेण शुद्धिः हीनवर्णानां तु उत्कृष्टेषु स
पिंडेषु जातेषु मृतेषु वा तदाशौचामगमे शुद्धिः
१२१ तत्र विट्शूद्राणां ब्राह्मणेभ्यो मृते जाते वा
वादशाहेन शुद्धिषु विट्शूद्रयोः क्षत्रियेभ्यो
मृते जाते द्वादशाहेन शुद्धिः शूद्रस्य वैश्येभ्यो
मृते जाते पक्षेण शुद्धिरित्यर्थः बौधायनहा
रीतयोर्वचने सगुणनिर्गुणविषयव्यवस्था
यायोजनीये आपस्तंभेन तु परो विशेष उक्तः
तत्र विट्शूद्रजातीनां तद्वेन्मृतकसूतके ते
षां तु पैतृकं शौचं विभक्तानां तु मातृकम् पि
तृगृहावस्थितानां पित्रा सहैकपाकेन वसतां
तत्र विट्शूद्रमातृकाणां ब्राह्मणस्य पुत्राणां
दशाहमशौचं विभक्तानां पृथक्पाकेन वस
तां मातृजातितुल्यं द्वादशाहं पक्षं मासं यथा
क्रममशौचं एवं क्षत्रियस्य पुत्राणां विट्शूद्रमा
तृकाणां पित्रा सह वसतां द्वादशाहं पृथग्वसतां
तु पक्षं मासमिति ॥

127

© Dharmartha Trust J&K. Digitized by eGangotri

तथा वैश्यस्य क्षत्रियजस्य शूद्रमातृकस्यापि
ग्रासहृवसतोष्टयगवसततस्तुमासमिति ददतः
वर्णानामानुलोम्येन स्त्रीणामेको यदा सतिः
दशाहषड्यहाहैकार्यः प्रसवे सूतकं भवेत्
प्रसवो मरणामप्योपलक्षयति तदयमर्थः
सवर्णायां प्रसवे मरणे च पक्षः स्वजात्युक्तं
हीनाया षडहं हीनतराया त्र्यहं हीनतमाया
एकाहं तथा च ब्राह्मणस्य क्षत्रिया स्त्री हीना
वैश्या हीनतरा शूद्रा हीनतमा क्षत्रियस्य वै
श्या हीना शूद्रा हीनतरा वैश्यस्य शूद्रा हीने
व जाबालः नानाजातिषु पारक्ये पैतृकोजी
वतः पितुः प्रतीतमातृके विधात्यारक्तसम्भ
योरपि नानाभ्रातृष्वमथैकतमस्य जन
नमस्योः पितृजीवनपक्षे पितृवत् षडहादिक
मेव भिन्नजातीयानां भ्रातृणां अशौचं भव
ति पितरि मृते मातरि जीवन्त्यां मातृजात्युक्तं

© Dharmartha Trust J&K. Digitized by eGangotri

सं द्वादशाहादिकं उभयोर्मातापित्रोर्मृतयोः सतो
र्यस्यजन्ममरणोद्भूतेतज्ज्ञात्वोक्तं पतत्त्रिगुणो
१२८ त्तमवर्णविषयम् सगुणानां तत्तुमजाती
यभ्रातॄणां षडहादिकमेव हारीतवचनोक्तं
विद्यः पत्नीनां दासानांआनुलोम्येन स्वाम्य
तुल्यमाशौचं मृते स्वामिन्यात्मीयम् प्रथम
र्थः हीनहीनतरादिकमाउन्नमेउपरिणी
तानां स्त्रीणां सपिण्डजननमरणयोः प्रायो
जीवति पत्किजाति तुल्यमाशौचं मृते स्वजा
त्युक्तमेव बृहस्पतिः दासान्तेवासिभृतका
शिष्याश्चैकत्रवासिनः स्वामितुल्येन शौचे
न शुध्यन्ति मृते मृतके विलोपरिणीता
नां तु सर्वदा स्वजात्युक्तमेव प्रतिलोमासती
ष्व ऽतपुत्रे पुत्रे च मृते प्रजाते प्रवातजननकसणे
ऽनामशौचं नास्त्येव प्रतिलोमा धर्महीना इति
स्मरणात् तत्र मूत्रपुरीषोत्सर्गवत् मलापकर्षणा
र्थं शौचं कुर्यादिति पारिजाते ।

128

© Dharmartha Trust J&K. Digitized by eGangotri

अथ दत्तकादीनां जनकगोत्रेण सह सम्बन्धे कार
णशरीरान्वयेन सापिण्ड्यव्यवस्थामाह ब्राह्मे
दत्तकश्च स्वयंदत्तः कृत्रिमः क्रीत एव च भिन्नगोत्रा
पृथक्पिंडाः पृथग्वंशकरा स्मृताः सूतके म
तके चैव त्र्यहाशौचस्य भागिनः अस्यार्थः द
त्तकादयः गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सु
तः गोत्ररिक्थानुगः पिंडो व्यपैति ददतस्स्वधेति
मनुस्मरणात् भिन्नगोत्राः जनकगोत्रादन्याह
ग्राहस्य ग्रहीतृगोत्रस्य भागिनः पृथक्पिंडाः ज
नकगोत्रपिंडैकं त्यक्त्वा ग्रहीतृपिंडैकभागिनः
पृथग्वंशकराः जनकवंशं त्यक्त्वा ग्रहीतृवंश
कराः अतो हेतोरेते दत्तकादयः जनकस्य न तत्स
पिंडानां च न सम्पूर्णाशौचकारिणः किंतु वच
नबलात्त्र्यहाशौचकारिण एव जनके सज
नकसपिंडे च जाते वा जनकसपिंडानामपि त्र्य
हमशौचं तथा चापरार्के सपिंडे शौचमन्या

© Dharmartha Trust J&K. Digitized by eGangotri

सं वे गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेष्विति
ष्वसपिंडेषु गुर्वादिषु मृतेष्वहोरात्रेणैव शुद्धिः
१२५ गुरुरत्रौपचारिको न मुख्यः तस्य सपिंडत्वात्
यद्वा दत्तापविद्धादीष्विति निरूढे सापि गौणे मु
ख्यस्यापि जनकस्य गुरोरुपादानमविरुद्धमि
ति तदमी दत्तकादयो जनककुले त्र्यहाशौच
कारिणः गृहीतृकुले संपूर्णाशौचकारि
ण इति सिद्धम् तथा च मातामहाद्यैः सत्यप्ये
कारव्य शारीरान्वयेन सापिंड्ये आचार्यादिषु
चासत्यपि वचनबलादेव त्र्यहाशौचादि वि
शेषान्तरं बृहस्पतिः त्र्यहं मातामहाचार्य-
श्रोत्रियेष्वशुचिर्नरः मातुले पक्षिणीं रात्रिं
शिष्यर्त्विग्बान्धवेषु च प्रचेताः मातृस्वसृमा
तुलयोः श्वश्रूश्वशुरयोर्गुरौ ऋत्विजि च त्रिरात्रं
मतः त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति त
स्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः श्रोत्रिये
तूपसंपन्ने त्रिरात्रमशुचिर्भवेत्।

129

© Dharmartha Trust J&K. Digitized by eGangotri

मातुलेपक्षिणींरात्रिंशिष्यर्त्विग्बान्धवेषुच
मृतेरजनिसज्योतिर्यस्यस्याद्विषयेस्थितिः श्र
शोत्रियेत्वहः कृत्स्नमनूचानेतथागुरौ सब्रह्म
चारिण्येकाहमतीतेत्वपत्यंस्मृतम् सज्योति
राज्ञिचेदस्तमयपर्यन्तंरात्रौचेदुदयपर्यन्तमि
त्यर्थः वृद्धप्रचेताः संस्थितेपक्षिणींरात्रिंदो
षंभवेत् त्रिरात्रेणैवशुद्धिःस्यादित्याहभगवा
न्यमः श्वश्र्वोर्भगिन्यांचमातुलान्यांचमा
तुले पित्रोःस्वसरितद्वत्पक्षिणींक्षपयेन्निशां
तथा मातुलेश्वशुरेमित्रेगुरौगुर्वङ्गनासुच श्र
शौचंपक्षिणींरात्रिंमृतामातामहीयदि विशेष
स्यभगिन्यादिषुस्नानाच्छुद्धिः तथाच वृद्धव
सिष्ठः भगिन्यांसंस्कृतायांतुभ्रातर्यपिचसं
स्कृते मित्रेजामातरिप्रेतेदौहित्रेभगिनीसुते
श्यालकेतत्सुतेचैवसद्यःस्नानेनशुध्यति या
मेश्वरेज्ञलपतौश्रोत्रियेचतपस्विनि शिष्ये

© Dharmartha Trust J&K. Digitized by eGangotri

सं पंचत्वमापन्ने शुद्धिर्न तच्चदर्शनात् विष्णुः
असपिंडे स्ववेश्मनि मृते एकरात्रम् ग्रामस्
ति थ्यगते यावच्छवस्तिष्ठति कस्यचित् ग्राम
१३० स्यतावदशौचमिति पारिजाते अथजनना-
शौचस्यकालभेदेन संज्ञाभेदे शौचभेदः स्मृत्य
न्तरे आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः
अतऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत्
याज्ञवल्क्यः गर्भस्रावे मासतुल्या निशाः शु
द्धेस्तुकारणं गर्भाधानप्रभृति यावत्संख्ये मा
130 सेगर्भः स्रवति तावत्संख्यानि दिनानि स्त्रीशु
ध्यन्ति सपिण्डानां तु नाशौचमेव गौतमः
गर्भमाससमा रात्रीः स्रंसने गर्भस्य त्र्यहं वा प्र
ज्ञेयं व्यवस्था मासत्रयं यावत्त्र्यहं ततो माससम
मा रात्रयः मरीचिः स्रावे मातुस्त्रिरात्रं स्यात्स
पिंडाशौचवर्जनं वृद्धवसिष्ठः गर्भस्रावे मासतु
ल्या रात्रयः स्त्रीणां स्नानमात्रमेव पुरुषस्यैक
दिनगर्भस्रावेतु त्रिरात्रं ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मरीचिः मासत्रये त्र्यहं मातस्तुर्यै चतुरहं तथा
गर्भस्रावे सपिण्डानां स्नानमात्रं विधीयते तद्दे
वं गर्भादानप्रभृति चतुर्थमासं तावद्गर्भस्रावे
ण त्र्यहं चतुरहं रजोवद्भक्तस्तु तितिहृत्यर्थैवा
मान्तरे वा पुरुषस्य शौचं तत्सपिण्डानां च सद्यः
शुद्धिरशौचाभाव एवेत्यर्थः एतच्चावादिज
ननाशौचं वयोविशेषकृतं मरणाशौचं च स
वर्वर्णेषु तुल्यमेवेति प्रकाशितं प्राक् अथा
शौचप्रवृत्तिकालगणनाप्रकारमाह यदारा
त्रौ संध्यायां वा शौचं पतेत्तदानीं तद्दिने नैव सहा
होरात्रगणना उदिते तु सूर्ये यदि पतेत्तदा
प्रागहोरात्रगणना कश्यपः रात्रावेव सम
त्पन्ने मृते रजसि सूतके पूर्वमेव दिनं ग्राह्यं या
वन्नैवोदिते रविः उदिते तु यदा सूर्ये नारीणां
दृश्यते रजः जननं वा विपत्तिर्वा यस्याहस्तस्य
शार्वरी अग्राह्यमर्थः सायंसंध्यायां रात्र्यङ्कः
तयासक्तः सिद्धं पूर्वाह्णोरात्रावयवत्वमेवत्तेय

© Dharmartha Trust J&K. Digitized by eGangotri

सं मिति अथ पाताशौचं पाते मातुर्यथा मासै
पित्रादीनां दिनत्रयं यत्तु ब्रह्मपुराणे षण्मा
१३१ साभ्यन्तरे यावद्गर्भस्रावो भवेद्यदि तदा मास
समैस्तावद्भिर्दिवसैः शुद्धिरिष्यते अत ऊर्ध्वं स्व
जात्युक्तमशौचं तासु विद्यते सद्यः शौचं सपि
ण्डानां गर्भस्य पतने सतत् सद्यः शौचविधा
नार्थमस्पृश्यत्वालत्तणाशौचविषय अन
पिकारलत्तणां त्वशौचे त्रिरात्रं यावत्सपिण्डानां
भवत्येव यदाह वसिष्ठः ऊनद्विवर्षे प्रेत गर्भ
131 पतने वा सपिण्डानां त्रिरात्रमशौचं अथ सप्त
मप्रभृति षण्मासेषु प्रसूतिः पतनाद्यथा वर्णं
सम्पूर्णाशौचमेव तदुक्तं अत ऊर्ध्वं प्रसूतिः
स्याद्दशाहं शौचमाचरेत् दशाहमिति स्वस्व
वर्णोक्ताशौचपरम् अस्याशौचस्य कर्मनर्ह
त्वास्पृश्यत्वा भोज्यान्नत्वप्रयोजकत्वे पि पित्रा
दिसपिण्डानां यथा नास्पृश्यत्वं तथा प्रतिपादि
तं प्राक् अथ रजस्वलाशुद्धिः मनुः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला दै
वे कर्मणि पित्र्ये च पंचमेऽह्नि शुद्धिमाप्नुयात् तथा
प्रथमेऽहनि चंडाली द्वितीये ब्रह्मघातिनी तृ
तीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति अत्रैव
चंडालीत्वाद्यतिदेशः तज्जातीयत्ववदस्पृश्यत्व
बोधनार्थः चंडालीस्पर्शे याशुद्धिः सात्र कार्ये
त्यर्थः वसिष्ठः त्रिरात्रं रजस्वलाशुद्धिः भवति
सा नाञ्ज्यान्नाभ्यञ्ज्यान्नाप्सु स्नायादधःशयीत
न दिवा स्वप्यात् न रज्जुं सृजेत् न मांसमश्नीया
त् न ग्रहान्निरीक्षेत न हसेन्न किंचिदाचरेत्
न खर्वेण नाञ्जलिना पिबेत् मार्त्तिकमञ्ज
लिना वा पिबेत् इति स्कान्दे स्त्रीधर्मिणीं चि
रांचं तु स्वमुखं नैव दर्शयेत् स्ववाक्यं श्रावये
न्नापि यावत्स्नाता न शुध्यति सुस्नाता भर्तृ
वदनमीक्षेतान्यस्य कस्यचित् अथवा मन
सि ध्यात्वा पतिं भानुं विलोकयेत् हरिद्राकुं

© Dharmartha Trust J&K. Digitized by eGangotri

सं कुमंचैवसिन्दूरंकज्जलंतथा कूर्पासकंचता
म्बूलंमंगल्याभरणंशुभम् केशसंस्कारकबरी
केरवर्णविभूषणम् भर्तुरायुष्यमिच्छन्तीदू
१३२ षयेत्यैसेधारयेदिति रजस्वलायदिस्नातापु
नरेवरजस्वला अष्टादशादिनादर्वागशुचि
त्वंनविद्यते एकोनविंशतेरर्वागेकाहंस्या
त्ततोह्यहं विंशात्प्रभृत्युत्तरेषुत्रिरात्रमशुचि
र्भवेत् बृहस्पतिः रजस्वलायाःप्रथमरजः
प्रवृत्याचतुर्थेह्निस्नातायायदिपुनः प्रवर्तते
रजस्तर्हिद्वितीयारजसासमदशादिनंतावद
त्रकचनप्रवृत्तेननाशौचं तदुत्तरेप्रवृत्तेत्वष्टा
ष्टादशादिनेएकाहः एकोनविंशेद्व्यहः विं
शात्प्रभृत्युत्तरेषुदिनेषुत्र्यहम् एतच्चप्र
तज्ञातेत्रिरात्राशौचनिमित्तायारजः प्रवृ
त्तौद्रष्टव्यंनरजोमात्रप्रवृत्तौ नवयःकालो
रजःप्रवृत्तेस्त्रिरात्राशौचहेतुस्तमाहात्रिः ॥

132

© Dharmartha Trust J&K. Digitized by eGangotri

पराशरः स्नाने नैमित्तिके प्राप्ते यदि नारी रज
स्वला पात्रान्तरेण तोयेन स्नानं कृत्वा व्रतं चरे
त् व्रतं रजस्वला नियममित्यर्थः सिक्तगात्रा
भवेदद्भिः सांगोपांगं कथंचन नवस्त्रपीडनं
कुर्यान्नान्यद्वासश्च धारयेत् उशनाः ज्वराभिभू
ता या नारी रजसा च परिप्लुता कथं तस्य भवेच्छौ
चं शुद्धिः स्यात्केन कर्मणा चतुर्थेहनि संप्राप्ते
स्पृशेदन्या तु तां स्त्रियं सा सचेलावगाह्यापः
स्नात्वा स्नात्वा पुनः स्पृशेत् दशद्वादशकृत्वो
वाचामेच्च पुनः पुनः अन्ते च वाससां त्याग
स्ततः शुद्धा भवेत्तु सा अथ रजस्वला संस्पर्श
दोषप्रायश्चित्तमाहाङ्गिः संसर्गं यदि गच्छेत्तु वि
प्रोदक्या तथान्त्यजैः उदक्यां सूतिकां वापि अ
न्त्यजां स्पृशते यदि त्रिरात्रेण तु शुद्धिः स्यादेष
धर्मः सनातनः संसर्गं यदि गच्छेत्तु विप्र उदक्या
तथान्त्यजैः प्रायश्चित्ती स विज्ञेयः सचेलं स्ना

© Dharmartha Trust J&K. Digitized by eGangotri

सं नमाचरेत् एकरात्रं चरेन्मूत्रे पुरीषे तु दिनद्वयं
दिनत्रयं तथा पाने मैथुने सप्त पंच वा भोजने
१३३ तु प्रसक्तानां प्रायश्चित्तं विधीयते दन्तकाष्ठे
त्वहोरात्रमेव शौचविधिः स्मृतः शूद्रे शूद्रोत्स
र्गसमये यदि रजस्वलासंसर्गात्स्यादेकरात्रमुप
वासश्चार्थः एवमन्येऽपि बोध्यम् तथाचाप
रार्के स्नात्वोच्छिष्टेन रजस्वलासंस्पृष्टा ब्राह्म
णब्राह्मणी यदि एकरात्रं निराहारा पंचग
व्येन शुध्यति एतत्क्षत्रियादीनामपि द्रष्टव
सिष्ठः स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा
पि च कृच्छ्रेण शुध्यते पूर्वा शूद्री दानेन शुध्य
ति दानेन पादकृच्छ्रमन्या स्नाय भूतविसु
विषमुचतुर्थांश दानेन तथा स्पृष्ट्वा रजस्व
लान्योन्यं ब्राह्मणी क्षत्रिया तथा उपवासै
स्त्रिभिः पूर्वा त्वहोरात्रेणाचान्यरा स्पृष्ट्वा
क्षत्रिया वैश्यजापि वा ॥

133

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिरात्रात्शुध्यते सर्वान्त्वहोरात्रेणचोत्तरा स्पृष्ट्वा

वैश्यशूद्रौ तथैवच त्रिरात्रा

च्छुध्यते सर्वाङ्गत्रापि दिनत्रयात् वर्णानां का

मतः स्पर्शे शुद्धिरेषाउदाहृता अकामतः सकृ

त्स्वभार्यामपि रजस्वलां गत्वा याज्ञवल्क्योक्तं

त्रिरात्रान्ते घृतं प्राश्य गतो दक्षो विशुध्यति त्रिरा

त्रान्तोत्रिरात्रोपवासान्ते अकामतोभ्यासे का

मतः सकृद्गमने च शातातपोक्तम् रजस्वलां

तु यो गच्छेद्गर्भिणीं पतितां तथा तस्य पापवि

शुध्यर्थमतिकृच्छ्रं विशोधनं कामतोभ्यासे.

भ्यासे शंखोक्तं त्रैवार्षिकमिति पारिजाते

होरात्रं मूर्ध्नि उच्छिष्टे गृहे पिबेत् स्नावो भृगाग्नि

गः तत्कृतमशौचं तद्उच्छिष्टमिति तथा च बृह

द्शातातपः उदक्या सूतिका वा पि शावं वा स्पृ

संस्पर्शो यदि त्रिरात्रेणैव शुद्धिः स्यादिति षा

सं तातपः उदक्यासूतिकावापि श्वावान्त्यांसंस्पृ
शेद्यदि त्रिरात्रेणैव शुद्धिः स्यादिति शातातपो
१३४ ब्रवीत् अथ रजस्वलायाः पतन्यसंस्पर्शे प्रायश्चि
त्ते शातातपः चाण्डालैः श्वपचैर्वापि आत्रेयी स्पृ
श्यते यदि त्रिरात्रोपोषिता भूत्वा पंचगव्येन शु
ध्यति आत्रेयी रजस्वला कश्यपः चंडालीनतु
संस्पृष्टा कदाचित्स्त्री रजस्वला अहोरात्रेत्तती
र्थेक्तिपरतो नक्तमाचरेत् वृद्धशातातपः
रजस्वली यदा स्पृष्टा चंडालान्त्यश्ववायसैः
तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुध्यति
पराशरः पकहूतसमादृष्टौ चण्डालोथ रज
स्वला अहोरात्रोषिता भूत्वा पंचगव्येन शुध्य
ति रजस्वलाद्यश्च मानाः चाण्डालादीन्स्पृशेद्यदि
गोमूत्रयावकाहारा षड्रात्रेणैव शुध्य
ति अशक्त्या काञ्चनं दद्याद्वि
प्रेभ्यो वाथ भोजनम् ।

134

© Dharmartha Trust J&K. Digitized by eGangotri

मार्कंडेयः उत्कृष्टसवर्णायास्पृष्टा चेत्स्यादु
कृया तस्मिन्नेवाह्नि स्नाताशुद्धिमाप्नोति संश
यं पतत्सगोत्राविषयं तथा च वृद्धवसिष्ठः
स्पृष्ट्वा रजस्वलान्योन्यं सगोत्रे त्वेकसत्रके का
मतोऽकामतो वापि सद्यः स्नानेन शुद्ध्यति कश्य
पः रजस्वलात्संस्पृष्टा तद्विजात्या द्विजोत्तमा
त्रिरात्रेणैव शुध्येत व्याघ्रस्य वचनं यथा रजस्व
लात्संस्पृष्टा वैश्यया ब्राह्मणी यदि पंचरा
त्रेण निराहारा पंचगव्येन शुध्यति रजस्वलात्
संस्पृष्टा शूद्रया ब्राह्मणी यदि षड्रात्रेणैव
शुध्येत्तु ब्राह्मणी कामवतः अकामतस्त्ववेदे
वेब्रह्मणी सर्वजातिष्विति पाठः अथ तत्रि
यादीनां रजस्वलानां हीनवर्णरजस्वलास्पर्शे
विष्णुः रजस्वला हीनवर्णां रजस्वलां स्पृष्ट्वा
न तावदश्नीयायावदन्न शुद्धा सवर्णामपि क
वर्णां च स्पृष्ट्वा स्नात्वाश्नीयात् अत्रिः रजस्व

© Dharmartha Trust J&K. Digitized by eGangotri

सं लेत्वयेनार्यावन्योन्यस्पृशतोयदि सवर्णेपं
चगव्यंस्यात्त्रिरात्रमसवर्णके असवर्णेहीन
१३५ वर्णैः स्पृष्टेरजस्वलेन्योन्यंशूद्राचण्डालणी
यदि कृच्छ्रेणशुध्यतेविप्राशूद्रादानेनशुध्य
ति दानेननिष्कचतुर्थांशनेनेत्यर्थः मार्कंडे
यपुराणे उच्छिष्टेनतुसंस्पृष्टाकदाचित्स्त्रीर
जस्वला यावन्नशुद्धिमाप्नोतिनाश्नीयात्ताव
देवतु रजोनिमित्ताशौचनिवृत्तिःशुद्धिः
व्याघ्रः रजस्वलातुसंस्पृष्टाश्वजम्बुकवायसैःक्व
चित् निराहाराभवेत्तावद्यावत्स्नानेनशुध्य
ति इदंसमर्थविषयं असमर्थेतुबौधायनः
रजस्वलातुसंस्पृष्टाग्राम्यकुक्कुटसूकरैः श्वभिः
स्नानात्तिष्ठेत्तावद्यावच्चन्द्रस्यदर्शनम् रजस्व
लास्पर्शेःस्नानेप्रमादाद्यदिकर्हिचित् तथोप्य
रजनीमेकांपंचगव्येनशुध्यति रजस्वलातुसं
स्पृष्टाचाण्डालरासभैः पंचरात्रंनिराहारापंचग
व्येनशुध्यति ॥

© Dharmartha Trust J&K. Digitized by eGangotri

शूद्रयोच्छिष्टयास्पृष्टाशुभवाह्निहमाचरेत् अ
होरात्रं द्वितीयेह्निपरतोनक्तमाचरेत् अन्यद
पिकिंचित्संसर्गात् स्मृतिः उच्छिष्टेनतुसंस्पृष्टे
ब्राह्मणेब्राह्मणोयदि भोजनेमूत्रचारेवाशौच
स्यवचनंयथा स्नानंब्राह्मणसंस्पर्शेजपहो
मौतुवायुः वैश्येनक्तंभुञ्जीतशूद्रेचैव
ह्युपोषणम् चर्मकंरजकंवेणुंधीवरंनायमे
वच एतान्स्पृष्ट्वाद्विजोमोहादाचमेत्प्रयतो
पिसन् एतैःस्पृष्टोद्विजःशूद्रैरेकरात्रंपयःपि
बेत् उच्छिष्टैस्तुतिरात्रंस्याद्घृतंप्राश्यविशुद्ध्यति
भुंजमानोऽस्थिसन्देहेकदा चित्स्पृशतेयदि
त्रिरात्रमुपवासीस्यात्स्नेहेनक्तमाचरेत् अ
त्रचप्रसंगप्राप्तंपरिसमाप्यरजस्वलायाअ
पिक्वचिदशौचापवादमाह निर्णयामृते
विवाहेविततेतन्त्रेधर्मकालउपस्थिते कः
न्यामृतमतींदृष्ट्वाकथंकुर्वन्तियाज्ञिकाः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सं स्नापयित्वाततोकन्यांअर्चयित्वायथाविधि
प्रयातिमाऽतिंकृत्वा तथाकर्मप्रवर्त्तत ॥

१३९

तथाचाहः आरब्धदीर्घतपसांनारीणांयद्
जोभवेत् नहितेनव्रतंहतासाम्रपा — न्याक
थंचन तथाचशूर्जरः यदातुमृतेपत्यौरज
स्वलापत्नीदेशकालवशात्तदेवानुगच्छति
नशुद्धिंप्रतीक्षते तत्रक्रियानिवन्धेविधिः
यदास्त्रियामुदक्यायांपतिप्राणान्समुत्सृजे
त् तन्दुलानांद्रोणमेकंप्रवहन्याद्विशुद्धये
तदाशरमुसलाघातैःस्रवतेयोनिमंडलात्
विरजस्कामन्यमानासचितेनदशकूयम्
दृष्टाशेषंप्रगृह्णीतपंचमृत्तिकयास्पृशाक
त्रिंशद्विंशतिपत्नीश्चगवांदत्वाततःक्रमा
त् विप्राणांवचनाच्छुद्धासमारोहेद्धुताशनं
इति एषविधिःसर्वत्ररजोदोषापवादेकार्यः

136

© Dharmartha Trust J&K. Digitized by eGangotri

अथ मरणनिमित्ताशौचवयोविशेषशौचाका
लभेदः विष्णुः जातमृते मृतजाते कुलस्य स
द्यःशौचम् यत्तु जातमृते मृतजाते सपिंडानां
दशाहमशौचमिति हारीतवचनं तत्सपिंडानां
जन्मनिमित्तं सम्पूर्णाशौचं तथा च विज्ञानेश्व
रः जन्मशौचान्तरे बालो मृतः चेत्सपिंडकैः
शावाशौचं न कर्तव्यं सद्यःशौचं विधीयते वृद्ध
मनुः दशाहाभ्यन्तरे बालः प्रमादान्म्रियते यदि
शावाशौचं न कर्तव्यं सूत्यशौचं विधीयते य
त्तु जीवं जातो यदि मृतो मृतः सूयते एव वा
सूतकं सकलं मातुः पित्रादीनां दिनत्रयम् मु
हूर्त्तं जीवितो बालः पंचत्वं यदि गच्छति मातुः
शुद्धिः दशाहेन सद्यः शुद्धास्तु गोत्रिणः इति प्र
चेतोवचनं अनिर्दशे दशाहे तु पंचत्वं यदि ग
च्छति मातुः प्रसविकं शौचं उपस्पृश्य पिताशु
चिरिति शंखवचनं बालदेशान्तरस्थेचष्ट

© Dharmartha Trust J&K. Digitized by eGangotri

सं थक्पिंडेचसंस्थिते सवासाजलमाप्लुत्यसद्यएव
१२० विशुध्यति मनुवचनं अनिर्हृतेदशाहेतुपंच
त्वंयदिगच्छति सद्यएवविशुद्धिःस्यान्नप्रेतेनच
सूतकमिति कात्यायनवचनं तत्सर्वमस्पृश्य
तालक्षणाशौचनिषेधनं अग्निहोत्राद्यनुष्ठानप
रंवानतुप्रसवाशौचसंकोचपरम् यस्मात्त्र्य
ह``` सद्यःशुद्धिवचनव्यवस्थासाचनिर्गुण
विषयत्वेनयोज्याः अथजन्मकालमारभ्यस
प्तमपर्यन्तंबालमरणेयाज्ञवल्क्यः आदन्तज
नात्सद्यः दन्तजननेतिस्वकालोपिलक्षणं
दन्तजननकालश्चसप्तममासः दान्तजन्मस
प्तमेमासीत्युपनिषद्दर्शनात् अन्यथाव्या
धिवशादजातदन्तस्यकृतचूडस्यापित्रिरात्र
सद्यःशौचयोः संशयस्यात् यमः ॥
अजातदन्ततनयेशिशौगर्भच्युतेयथा स
पिंडानांतुसर्वेषामहोरात्रेणशौचकम्

137

© Dharmartha Trust J&K. Digitized by eGangotri

दन्तजन्मसमययोगेप्यजातदन्तेचूडाकरण
हीनेचैकाहः इतिपरंवचनमिति वाचस्पतिः
विष्णुः अजातदन्तेबालेमृतेसद्यएवशुद्धिर्न-
स्याग्निसंस्कारोनोदकक्रिया शंखः अजातद
न्तेबालेतुसद्यःशौचंविधीयते अहोरात्रात्
थाशुद्धिर्बालेत्वकृतचूडके तथैवानुपनीते
त्र्यहाच्छुद्ध्यन्तिबान्धवाः अस्यार्थः अजात
दन्तेसद्यःशुद्धिः जातदन्तेचूडाकरणहीनेप
काहः कृतचूडेत्वनुपनीतेत्र्यहः यत्तुपारिजाता
दौ नात्रिवर्षस्यकर्त्तव्याबान्धवैरुदकक्रिया
जातदन्तस्यवाकुर्यान्नाम्निवापिकृतेसतीति
मनुवचनम् बालानामजातदन्तानांत्रिरा
त्रेणशुद्धिरितिकश्यपोक्तिः बालेचाजात
दन्तेत्रिरात्रंधावमाशौचमितिपैठीनसिवा-
कानामकरणोर्ध्वंबालस्यमरणेत्रिदाहः शु
दकदाने त्रिरात्राशौचंचविकल्पयति तदः

© Dharmartha Trust J&K. Digitized by eGangotri

सं जातदन्तस्याग्निदाहादिसंस्कारः शाखा
न्तरविषयः त्रिरात्राशौचं तज्जातमरणेतरव-
१३८ र्णविषयं मातापित्रोरस्पृश्यत्वरूपाशौच
विषयं वेति स्फुटमेवापरार्के यद्यप्यजात
दन्तः स्यात्कृतचूडस्तु संस्थितः तथापि दा
हयेदेनं त्र्यहं वाशौचमाचरेत् कौर्मे अदन्त
जातमरणे पित्रोरेकाहमिष्यते दन्तजाते
त्रिरात्रं स्याद्यदि स्यातां तु निर्गुणौ अथ सप्त
समासाद्वर्षे प्रथमं वा वर्षे द्वितीयं वाऽथ तृती
यं वा सशाखास्नानाच्चूडाकरणकाले ताव
दालमरणे एकाहः याज्ञवल्क्यः आचौला
न्नैषिकी स्मृता शावः अहोरात्रात्तथा शुद्धिर्बा
ले त्वकृतचूडके एतद्विषय एव याज्ञवल्क्यः
ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः मनुः नास्य
कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया अरण्ये
काष्ठवत्त्यक्त्वा क्षपेत त्र्यहमेव तु त्र्यहमिति पित्रपं

138

© Dharmartha Trust J&K. Digitized by eGangotri

यमः ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः
यमगाथां गायमाना यमसूक्तमनुस्मरन् अ
प्यचूडाकालात्प्रथमाद्द्वितीयात्तृतीयाद्वा
र्षाद् उपनयनात्प्राक् तस्य त्रिरात्रं याज्ञवल्क्य
त्रिरात्रमाचूतादेशात् शंखः तथैवानुपनी
तेष्वप्यस्माकुद्यन्ति वांधवाः यस्त्वजातदन्तः
चूडाकालेऽप्यतीते कृतचूडः तस्या गिराः यद्य
प्यकृतचूडो वै जातदन्तस्तु संस्थितः दाहयि
त्वा तथाप्यनमशौचं त्र्यहमाचरेत् अत्रैव पै
ठीनसिः अकृतचूडानां त्रिरात्रम् वसिष्ठः
ऊनद्विवार्षिके प्रेते सपिण्डानां त्रिरात्राशौचं
षड्विंशत्मते यद्यप्यकृतचूडो वै त्रिवर्षाद् ऊर्ध्व
माहूतात् तथापि दाहयित्वैनमशौचं त्र्यह
माचरेत् अस्याग्निदाहमुदकक्रियां च याज्ञ
वल्क्यः आश्मशानमानुव्रज्य इतरेतरा ज्ञातिभिर्वृ
तः यमसूक्तं तथा गाथा जपद्भिः लौकिकाः

© Dharmartha Trust J&K. Digitized by eGangotri

सं ग्निनादव्यः इतरः कृतद्विवर्षेतरः कृतचूडोऽकृ
तचूडो वा लौकिकाग्निनादग्धव्यः अग्निदाह
१३५ उदकदानं गमयत्यव्यभिचारादनयोरन्योन्य
तमित्यपरार्कः अथ दत्ता या कन्या यास्ते तो
प्राप्ते आजन्मनस्तु चूडान्ते यत्र कन्या विपद्य
ते सद्यः शौचं भवेत्तत्र सर्ववर्णेष्वयं विधिः त
तो वाग्दानपर्यन्तं यावदेकाहमेव च वाग्
दाने कृते तत्र ज्ञेयं चोभयतस्त्र्यहम् पितृवंश
स्य च ततो वाग्दानाद्धर्तुरेव तु स्वजात्युक्तम
शौचं स्यात्सूतके मृतके पि वा इति मनुः प्र
प्रौढायां तु कन्यायां सद्यः शौचं विधीयते अ
हस्त्वदत्तकन्यासु दत्तासु च तथा त्र्यहम् म
रीचिः कन्यानां प्राक्चूडाकरणात्सद्यः शौचं
प्राग्दानादेकाहः दत्तानां प्राक्सविरणयास्त्र्यहं
पुत्रस्यः सद्यस्तु प्रोढबालानां प्रौढायां बान्ध
वाः स्मृतिः अहत्तायां त्रिरात्रेण दत्तायां पक्षिणी भवेत्

139

© Dharmartha Trust J&K. Digitized by eGangotri

प्रोढाकृतचूडा अप्रत्तांत्वप्रत्तान्त दानयोग्यत्वर्थ :
दन्तादेनैव याज्ञवल्क्यः अहस्त्वदत्तकन्यासु बाले
षु च विशोधनम् वाग्दानादूर्ध्वं विवाहसंस्कारा
त्प्राक्पितृकुले पतिकुले च त्र्यहाशौचं मरीचिः
वारिपूर्वं प्रदत्तां तु या नैव प्रतिपादिता असं
स्कृता तु सा ज्ञेया त्रिरात्रमुभयोरपि मनुः स्त्री
णामसंस्कृतानां तु त्र्यहाच्छुद्ध्यन्ति बान्धवाः
यथोक्तेनैव कल्पेन शुद्ध्यन्ति च सनाभयः अस्या
र्थः असंस्कृतानामनूढानां स्त्रीणां बान्धवा
भर्तृपक्षाः त्र्यहेण शुद्ध्यन्ति सनाभयः पितृप
क्षा यथोक्तेन चौलादूर्ध्वमुपनयनात्प्राग्बाल
स्य मरणे यः कल्पस्त्रिरात्राशौचात्मकस्तेन
शुद्ध्यन्ति विप्रधर्मोत्तरेऽपि अजातदन्तबा
लेषु सद्यः शौचं विधीयते बालेष्वकृतचूडेषु
विशुद्धिर्नैशिकी स्मृता तथा चानुपनीतेषु त्रि
रात्राच्छुद्धिरिष्यते स्त्रीणां चाकृतचूडानां त्र्यहा

© Dharmartha Trust J&K. Digitized by eGangotri

सं \ च्छ्वसन्तिबान्धवाः तदित्थं अमन्त्रिकास्तुका
र्यंस्त्रीणामावृदशेषतः संस्कारार्थंशरीरस्य
१४: यथाकालंयथाक्रममित्यादिमन्वादिवचनात्
स्त्रीषुशरीरसंस्काराणांजातकर्मादीनांयथा
कालंकर्तव्यत्वेदशाहोदकदानादेरपि यथाय
थंमूढेनवंकर्तव्यतायांत्र्यहाशौचंवचनमा
त्रमेव यत्तुस्मृतिषुवारदानेतिपदंतत्का
लस्योपलक्षणंतस्यचकालस्यान्तर्यतोवर्षः
140 पंचमादिषूपनयस्थानीयस्यविवाहाग्निसं
स्कारस्यस्त्रीणांनियतत्वात् व्याख्यातंचैतन्म
न्वाशयानुसारिणामाधवाचार्येण विष्णु
धर्मवचनंयथोक्तेनैवकल्पेनयाज्ञवल्क्यवच
नेचव्याख्यातम् अतएवस्मृत्यन्तरेऽविज्ञानेश्वरो
दशाशौचकांदत्तायांविशेषमाह प्रदत्तायांर
णोव्यक्तौज्ञात्योक्तंपैतृकेकुले विवाहोर्ध्वंस
हस्त्रीणांत्र्याशौचंभर्तृपक्षके ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रदत्तायाश्चविवाहितायाश्च पितुर्गेहे एव रजो
व्यक्तिकाले मरणे पितृपक्षे वर्णक्रमेण परि
पूर्णाशौचं यथा तस्या अपि चूडस्य षोडशव
र्षादूर्ध्वं परिपूर्णाशौचं तथानूढायाः स्त्रियाः अपि
रजोदर्शनादूर्ध्वं मरणे पितृपक्षे पूर्णाशौचमे
वेति सिद्धान्तः तासां चोदकदानादिकं पितृगो
त्रेणैव पैठीनसिः पितृगोत्रं कुमारीणामूढा
नां भर्तृगोत्रता जलदाने प्रमीतानामोद्वाहादु
भयत्रत आतद्वाहात् गेहादाहादिसोदकान्त
मन्त्रवर्जेदिति वत्सस्मृतिः तथाचार्थः उद्वाता
कुमारीणां मरणे जलदाने पितृगोत्रापद्मारि
का भर्तृगोत्रेण नारीणां देयं पिंडोदकं ततः
चतुर्थीहोममन्त्रैस्त्वङ्मांसहृदयेन्द्रियैः एक
त्वं सा गता भर्तुः पिंडगोत्रे च सूतके एतस्य वर्षा
विशेषकृतमशौचं सर्ववर्णेष्वविकल्पमेवेति
पारिजाते अविशेषेण वर्णानां सर्वावस्था

© Dharmartha Trust J&K. Digitized by eGangotri

सं रकर्मणाम् त्रिरात्रात्तु भवेच्छुद्धिरित्याङ्गिरसं
स्मृतेः व्याघ्रपादोऽपि तुल्यं वयसि सर्वेषां यत
१५१ विप्रोत्यूने त्रिभिर्वर्षैः मृते शुद्धिस्तु हूहेन तत्रि
ये शुद्धिस्त्रिभिर्वर्षैपमृते तथा निवृत्तचूडके विप्रे
त्रिरात्राच्छुद्धिरिष्यते निवृत्ते तत्रिये षड्भिः वैश्ये
नवभिरुच्यते शूद्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु प
चभिः अतऊर्ध्वं मृते शूद्रे द्वादशाहे इति तद्वद्
नाम त्र्यहो न्यायः इति मन्वाद्यनेकस्मृतियो
लोचनया विप्रक्षत्रियवैश्यशूद्र मेधातिथिविज्ञाने
श्वरप्रभृतिभिर्निबन्धकृद्भिर्वयोवस्थाभेदशौ
चं सर्ववर्णसाधारणमेव यानि त्वाङ्गिरसादि
वचनानि न्यूनाधिकाशौचप्रतिपादिकानि
तानि सगुणनिर्गुणादिविषयतया योजनी
यानीति व्याख्यातं अथोपनयनकृते संस्पर्शा
शौचं याज्ञवल्क्यः दशरात्रमतः परम् दशार
त्रं पदं समसवर्णोत्क्रमोत्क्राशौचपरं तथा चात्रैव

151

© Dharmartha Trust J&K. Digitized by eGangotri

तत्रस्यद्वादशाहानिर्विशाःपंचदशैवतत्रिंशाद्दि
नानिशूद्रस्यतदर्थंन्यायवर्तिनः अपिच स्मृति
रुपनयनपदंदन्तजननादिपदवत्तुकालमा
त्तिपति उपनयनकालश्चगर्भाष्टमेसप्तमेवा
हेब्राह्मणस्योपनयतं राज्ञामेकादशेमेकेवि
शामेकोयथाकुलं सप्ताष्टमौवर्षौब्राह्मण
स्योपनयकालःक्षत्रियस्यैकादशः वैश्यानां
द्वादशः अतएवोपनयनकालोर्ध्वमनुपनी
तेपिस्मृतेष्वर्णाशौचं बृहस्पतिः सप्तकाल
क्रमादूर्ध्वमव्रतेपिद्विजोमृते सजात्युक्तमशौ
चंस्याद्दष्टमाहात्परंनवा अनेनैवाभिप्राये
ण ब्रह्मपुराणमपि विप्रस्त्वनुपनीतस्या
शानाचैवाथचतुर्यहात् अग्रहीतव्रतोदस्तुवै
श्यः शूद्रस्त्वव्रतयुक् म्रियतेयत्रतत्रस्यादशौ
चंत्र्यहमेववहि द्विजन्मनामयंकालः त्रयाणां
तथशाधिकः पंचाधिकेनशूद्राणांसजात्युक्तं

© Dharmartha Trust J&K. Digitized by eGangotri

से मृतः परम् अस्यार्थो ब्राह्मणक्षत्रियवैश्यानां त्रिया
णां द्विजशब्दवाच्यानां षष्ठाब्दांतावन्मरणे ग्रहणम्
१५२ अथउत्तरमष्टमवर्षकालेउपनयनमारभ्य यावदा
युः सम्पूर्णशौचं सद्यजातक्रमम् पंचमाह्निकं
पंचमाहं तावद्ब्राह्मणाग्रहः अतःपरं सुजात
क्रमिति मच्छूद्रविषयं तथाचाङ्गिरसवाक्येनैव
व्यवस्था शूद्रैस्त्रिवर्षन्यूनेतस्ततेशुद्धिस्तु पंचभिः
अतऊर्ध्वंमृते शूद्रे द्वादशाहे विधीयते षड्वर्षान्त
मतीतस्तु शूद्रः संम्रियते यदि मासिकं तु भवेच्छौ
142
चं इत्याङ्गिरभाषितं एतत्सद्वृत्तेपरिमासिकाशौ
चपदं विवाहितशूद्रविषयम् अविवाहितस्य
षोडशवर्षं यावद्द्वादशाहस्तदनन्तरं मासिकाशौ
चमिति शुद्धिविवेकादयः अन्यवापरार्के
शूद्रस्योपनयनस्थानेवस्त्रद्वयग्रहण
म् तथाच आमोञ्जिबन्धनाद्वि
प्रः क्षत्रियश्चायतनगर्भहात् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अप्रेतादेयहाहेरपः शूद्रोवस्त्रहयपहात् वा·
त्तोद्दिचत्वारिवर्षाणिनचपवप्रचरति पंचमी
त्वथरीयोत्तरीयोवस्त्रहयेपरिधापयन्तीतिसदा
चारः शंखः अन्नूढभार्यः शूद्रस्तुषोडशाहात्
गत्सरे मृतःसमधिगच्छेत्त्रमासंतस्मापिबां
धवाःइति अथसपिंडानामेवकेषांचिदयं
सदाचारसम्प्रदायः चतुर्थे दशरात्रं स्यात्ष
ड्रात्रमथपंचमे षष्ठेचतुरहःशुद्धिःसप्तमेच
दिनत्रयम् अष्टमेस्यादहोरात्रंनवमेप्रहरद्वयं
दशमेस्नानमात्रं स्यादस्थिविस्तुगोत्रतःइति
अत्रादिस्मृतिवाक्यानुसारंब्रह्मावर्तेचतुर्थपु
रुषंतावत्संपूर्णाशौचंपंचमीषड्दिनानीत्या
दिक्रमेणाशौचमस्तिहोविगाःशिष्टाअनुति
ष्ठंति तथाच दशाहमध्येदर्शपातेपितृषांश्च
वस्था ऋष्यशृंगः अशौचमन्तरादर्शोयदि
स्यात्सर्ववर्णिनां ममाभिप्रेततत्रस्पृज्ञ्यादि

© Dharmartha Trust J&K. Digitized by eGangotri

सं त्याह गौतमः भविष्यत्कारणे प्रवृत्ताशौचवतं
रस्तु यदि दर्शः प्रपद्यते समाप्याशौदके पिंडात्
१५३ स्नानमात्रं समाचरेत् दर्शात्प्रागाशौचं प्रेतपिं
डोदकदानाञ्जलिदानादि सर्वं समाप्य ततः
शुद्धीभूय दर्शश्राद्धं कुर्यादित्यर्थः तथा पैठीन
सिः आशायावेव कर्तव्या पिंडदानोदकक्रिया
द्विरेर्दवे तत्कुर्वाणा पुनः शौचं समश्नुते पकः
तीणः प्राचीनः चन्द्रः तथा द्वितीयोऽजायमा
नोनवचन्द्रो यस्मिन्निति द्विरेर्दवो दर्शः पत
143 त्सातापितृव्यतिरिक्तविषयम् मातापित्रो
स्तु मृतयोः दशाहमध्ये दर्शपाते पिपिंडोद
कादीनां दर्शात्प्राक्समाप्तिः किन्तु यथाका
लमेव यावदशौचं गौतमः अन्तर्दशाहेद
श्चोत्तरसर्वं समापयेत् पित्रोस्तु यावदाशौ
चं दद्यात्पिंडाञ्जलाञ्जलीन् अथ विदेशस्
ताशौचं भवति न श्रवणप्रभृति पुनर्दशा

© Dharmartha Trust J&K. Digitized by eGangotri

पारिज्ञाते देशान्तरस्थसपिण्डमरणे दशरात्राद्यशौ
चकाले चानतिक्रान्तदशरात्रादिशेषे यावदशौचं
भवति न श्रवणप्रभृति पुनर्दशाहादिकमित्य
र्थः दशाहाद्यनन्तरं मासत्रयपद ततः षण्मासप
र्यन्तं पक्षिणी ततो नवमासादर्वागेकाहः ततः संव
त्सरपर्यन्तं स्नानोदकाभ्यामेव शुद्धिः संवत्सरान
न्तरं स्नानेनेति विवेकः यदाह वृद्धवसिष्ठः मा
सत्रये त्रिरात्रं स्यात्षण्मासात्पक्षिणी ततः अहस्तु
नवमादर्वागूर्ध्वं स्नानेन शुध्यति तथा चैतदेव शु
द्धिचिन्तामणौ मनुः विगतं तु विदेशस्थं शृणु
याद्यो ह्यनिर्दशम् यः शेषं दशरात्रस्य तावदे
वाशुचिर्भवेत् अतिक्रान्ते दशाहे तु त्रिरात्रमशु
चिर्भवेत् संवत्सरे व्यतीते तु प्रेते दत्वोदकं शुचिः
दशाह इति सजात्यकाशौदपरे अतीते मृतके
स्वस्वतिरात्रं स्यादशौचकमिति जाबालिवच
नात् एतच्च सपिण्डानां त्रिरात्रं संवत्सरस्य पूर्वा

© Dharmartha Trust J&K. Digitized by eGangotri

सं र्थे उक्तार्थे देवलः अशौचानन्तरं वक्ति अशौ
चाद्दादतीतेषु वर्षेषु श्रूयते यतः तत्र त्रिरात्रम
१५४ शौचं भवेत्संवत्सरान्तरे ऊर्ध्वं संवत्सरार्धात्तु श्रू
यते चेन्नरतः स्वकैः भवेदेकाहमेवात्र तच्च सं
स्निनानतिम्यादि केचित्तु संवत्सरे तावत्त्रिरात्र
मशौचमविशेषेणेति समं स्यादश्रुतत्वादिति
न्यायेन वर्णयन्ति तथा च याज्ञवल्क्यः प्रोषि
ते कालशेषः स्याद्दशेषेऽप्यहमेव तु सर्वेषां व
त्सरे पूर्णे प्रेते दत्तोदकं शुचिः यत्तु देवलः अति
155 पन्ने त्रिरात्रं स्यात्षण्मासात्यतीते ततः परमे
कार्यमावर्षादूर्ध्वं स्नात्वा विशुध्यति विष्णुः
अर्वाक्त्रिपक्षात्त्रिनिशं षण्मासाच्च दिवानिशं
अहः संवत्सरादर्वाग्देशान्तरमृते शुचिः इत्या
दि तत्सर्वं समस्तज्ञानात्तद्गणाशौचं च पवतयास
गुणनिर्गुणतया वा योऽयं येतु समानोदयः
त्र्यहाद्यशौचभागिनः तेषां दशाहेनैवेचरण

© Dharmartha Trust J&K. Digitized by eGangotri

स्नानेसद्यःशुचिः मनुः निर्दशंज्ञातिमरणंश्रुत्वा
पुत्रस्यजन्मच सवासाजलमाप्लुत्यशुद्धोभवतिमा
नवः अस्यार्थः दशान्तरेज्ञातीनांसमानोदका
नांमरणेश्रुतेऽप्यहं तदूर्ध्वंतुश्रवणेस्नानमाह
पतञ्चसर्ववर्णेष्वतुल्यमेव व्याघ्रपदः तुल्ये
वयसिसर्वेषांअतिक्रान्तेतथैवच उपनीतेतु
विषमेतस्मिन्नेवातिकालजम् अस्यार्थः स
र्वेषांवर्णानामसमजातदन्तायशौचंतुल्यमेव
तथातिक्रान्तेदशाहेमरणंश्रुत्वायत्र्यहादितत्
पितुल्यमेव उपनीतेतुदशाहद्वादशादिक्रमे
णवैषम्यं तस्मिन्नेवसजातिक्राशौचेतीतेका
लेतीतेश्रुत्वाशौचंत्र्यहादिकमेवभवति नपुन
स्त्र्यहापयति क्रमेकिंचिदन्यप्रकारकं अशौचं·
किंतुस्नानमात्रेसद्यःशुद्धिरित्यर्थः पित्रोविदे
शमरणेविशेषमाह पैठीनसिः पितरौचेन्म
तौस्यातांदूरस्थोपिवपुत्रकः श्रुत्वातद्दिनमा
रभ्यदशाहंसूतकंचरेत् दत्तः महागुरुनिपा

© Dharmartha Trust J&K. Digitized by eGangotri

सं तेषुतान्दवस्त्रोपवीतिना अतीतेऽप्यपिकर्तव्यंप्रे-
तकार्यंयथाविधिः पत्नदत्तक्रियापितृमरणविष
१५१ यंकृतक्रियेतत्पुत्रस्यापिग्रहादिग्रवस्थैव तथा
वस्मृत्यन्तरम् साग्नेः प्रत्यस्यसंस्कारेप्रत्यतंशव
वद्भवेत् दाहादिकंसम्पूर्णंशौचमत्रयथोदि
तं तथानिरग्नेः संस्कारः स्यात्सूतकमध्यगः
तच्छेषेणैवशुद्धिः स्यादतीतेपुनरन्यथा अशौ
चमगृहीतंचेत्तदासम्पूर्णमेवतत् त्रिरात्रंस्या
गृहीतेचेत्यत्याः पुत्रस्यसूतकम् अष्टताशौचके
145 तत्रसपिण्डानांत्र्यहंत्विदम् स्नानमात्रंह्यताशौचे
पुनः संस्कारकर्मणीति इदंत्वतिक्रान्ताशौचे
नतद्व्यस्य अंगिराः अतिक्रान्तेदशाहेतुप
श्चाज्जानातिचेद्गृही त्रिरात्रंसूतकंतस्यनतद्व्य
स्यकस्यचित् विदेशप्रसवेतु दशाहमध्येश्रु
वणेयावच्छेषं अतीतेत्वशौचम् देवलः
नाशुद्धिः प्रसवस्यास्तिव्यतीतेषुदिनेष्वथ दे
शान्तरमृतस्यङ्गर्भाणमृतस्यवादाहलाभादिहे

© Dharmartha Trust J&K. Digitized by eGangotri

तोः पर्णशरीरेणापिष्टकेन वा प्रकृतिं कृत्वा दा
हादिसंस्कारकरणे अनाहिताग्निसम्बन्ध्याशौ
चं त्रिरात्रं आहिताग्निसम्बन्धि तु यथावर्णं पूर्ण
मेव तदुक्तं स्मृत्यन्तरे सपिण्डैः यवसः क्रियै
दग्धव्यस्तु तथाग्निहा अमी स्वर्गाय लोकाय स्वा
हेत्युक्त्वा तु बान्धवैः एवं पर्णनरं दग्ध्वा त्रिरात्र
मशुचिर्भवेत् वसिष्ठोप्याहिताग्निश्चेत्प्रवासे
म्रियते पुनः संस्कारं कृत्वा शाववच्छौचम् २
दशशौचं संस्कारकर्तृश्राद्धादिविषयम् सपिण्डे
ष्वत्र विशेषः स्मृत्यर्थसारे अगृहीताशौच
सपिण्डानां त्र्यहम् गृहीताशौचसपिण्डानां अ
शौचं नास्तीति सपिण्डैः पूर्वं यद्यशौचं गृहीतं
तदा पुनः संस्कारेपि तेषां अशौचं नास्ति यदि
न गृहीतं तदा त्र्यहं तेषामपि भवत्येव अपरा
र्के नारायणबलावेवमेव स्मृत्यन्तरं यदेवम्

© Dharmartha Trust J&K. Digitized by eGangotri

सं मृतेप्रेतेनारायणावलोकृते तदैवपापनिर्मु
क्तिः क्रियार्होजायतेनरः योददातिक्रियापिं
१४९ डंतस्मैप्रेतायवैस्वतः तस्यैवाशौचमुद्दिष्टंत्र्यह
मत्रनसंशयः विष्णुश्राद्धसमाप्तौतुत्रयोदशाहे
नत्रयं प्रशौचपिण्डादः कुर्यान्नान्ततद्बन्धुगोत्र
जाः ॥

146

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ श्रीगणेशं नमो यस्यप्रसादप्राप्तबुद्धयः प्रौढ
बुद्धिमुद्बुध्यन्ति मादृशाअपि बालिशाः तान्तंभक्त्या
यकल्याणं गर्भे विभ्रदिवान्वहं तद्दिभोगगणशारणाः
सविघ्नशान्तिं करोतुनः सूर्याचन्द्रमसौ नत्वाकाल
चक्रप्रवर्तकौ मलमासे सम्प्रदायं वक्ष्ये धर्मप्रवर्तये ॥
अथ मलमाससम्प्रदायः तत्र मलमासो द्विधा
श्रौतः स्मार्तश्च स्मार्तो दर्शद्वयमतिक्रम्येत्यादि
स्मृतिदर्शितः श्रौतस्तु षडङ्गनन्दागतोज्योतिर्वित्
सिद्धः तथाच श्रुतिः तदास्यानियामकोनाम
मासोधिनामा अकालवेलास्फिरतोस्य सौम्य इति
तथा यत्षोडशाहस्मजनेद्वाविंमत्यौर्ण मासी विष्णु
गार्हपत्यं प्रीणाति तेनत्रयोदशमासाः सम्पद्यन्ते
तेनपितरः प्रीणन्ति तस्मात्त्रयोदशमासः संवत्सरः
संवत्सरस्याभ्येस एवमलिम्लुच इतिकाठकीय
श्रुतिः इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्
इति वचनादस्याः श्रुतेरुपबृंहकं विष्णुधर्मोत्तरव

© Dharmartha Trust J&K. Digitized by eGangotri

सं चनेवरुणरामसंवादे प्रथमखंडे द्वासप्ततितमे
म ध्याये सौरसंवत्सरस्यान्तेमानेन शशिजेनतु
१५० एकादशातिरिच्यन्तेदिनानिभृगुनन्दन समाह्
येचाष्टमासेदिनषोडशकान्विते नालीचतुष्टया
न्वेतु तस्मान्मासोतिरिच्यते सचाधिमासः संप्रो
क्तः काम्यकर्मसुगर्हितः काम्यकर्मस्विति नित्या
नांसंध्यावन्दनादीनामत्राप्यनिवृत्तेः तथाचाग्रेव
क्ष्यामः ईशानस्यवलिर्विष्णोःशयनेपरिवर्तन
मितिकालादर्शे ईशानवलेःशिवरात्रिव्रताख्य
स्य फाल्गुणकृष्णापत्तीयस्यमलमासेनिषेधः
श्रौतस्यास्यप्रायशः स्मृतिसिद्धत्वंदर्शयति प्राप्ति
पूर्वकोहिप्रतिषेधः तथाच उपाकर्मतथोत्सर्ग ः
प्रसवालोत्सवाष्टक इत्युत्सर्गकालस्यवृद्धिः ष
डगनन्दागतस्यश्रौताधिमासस्य सत्रागमयति
तत्सर्गकालोहि उपाकर्मदिनात्सार्वमासचतुष्ट
येतीते तत्सर्जनम् तथाहि श्रावण्यामुपाकृत्य

© Dharmartha Trust J&K. Digitized by eGangotri

पौषशुक्लप्रतिपदि उत्सृजेत् पौष्यपद्यामुपाकृ
त्य माघशुक्लप्रतिपदि इति स्पष्टम् तत्र षडङ्गनंदा
गतस्यैव पौषमाघयोः संभवः नत्वसंक्रान्तिकस्य
तस्यैवदशाहत्वात्तेनोत्कर्षश्चतुर्थपिष्टगादिषु इति
वचनमपि चतुर्थस्य युगस्य माघपौर्णमास्यस्य
निषेधोपि षडङ्गनन्दागतस्यैव मलत्वबोधकः
प्रतिद्वादशमासमधिमासपातेयः शुभाशुभ-
फलनिर्देशो ज्योतिःशास्त्रनिर्दिष्टः सोपि मलमा
सत्वं षडङ्गनन्दागतस्यैव गमयति दर्शद्वयमती
क्रम्येति लक्षणास्तिहस्यतु प्रतिमासंपाताभावा
त् तथाहि स्कृतेरर्थः सौरसावनचान्द्रभेदाच्चत्रि
धाद्विमासोऽज्योतिर्विद्भिर्निरूपितः तथा च ब्रह्मसि
द्धान्ते दर्शाद्दर्शं चान्द्रस्त्रिंशद्दिवसस्तु सावनो मा
सः रविसंक्रान्तिविच्छिन्नः सौरो मासो निगद्यते
तैस्तैः तत्र त्रिष्वप्येतेषु मासेषु दर्शाद्दर्शमित्या
दिनियमोऽस्ति अधिकमासस्य तु दर्शादिनियाम

© Dharmartha Trust J&K. Digitized by eGangotri

सं कचितया भावादनियामकताप्रकाशैव अतप
१५८ वाधिनामा चन्द्रादिव्यपदेशाव्ययातिरेकादधिकः
तथाच अकालवेलास्थितिः कालस्य ग्रीष्मा
देः वेलायाः सूर्योदयादेः स्थितिनास्थिरतानास्ति
अयमपिचान्द्रादेविशेषः स्मार्तोधिमासोहि द
र्शद्वयमति क्रम्येति लक्षणाच्चान्द्रः सन् स्थैर्ये
णाचैत्रमारभ्यकार्तिकान्तंपतति अस्मच्छ्रौताः
धिमासस्य सर्वेषुमासेषुपातदर्शनात्कालस्थि
रता तथाच ज्योतिःसिद्धान्ते घटकस्यागतेसू
148 र्यैवृश्चिकेवाथयथाविति सकरेवाथकुंभेवानाधि
मासोविधीयते अस्यार्थः घटस्तुला तुला
दिराशिषु कुंभान्तेषुस्थिते सूर्येधिमासः स
भावतोनभवति तथाच मध्याकादावर्धगा
मोदौच यस्मिन्कस्मिंश्चिन्मुहूर्तेपातप्रवेशादर्शना
त् सावनंस्यादहोरात्रमुदयाउदयंरवेरित्यादिसा
वनात् वेलायामपिस्थैर्यंनास्ति तथाचासौस्पः
सोमकलानांवृद्धिक्षयवशात्तिथि ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पंचदशाकनियमेनशुक्लपक्षोपलक्षितप्रतिपदा
दितिथिचरमत्वमन्यमासेष्वपिवर्ततइतिनास्तीति सिद्धो
यंस्मार्तोदपरः षडगनन्दागतः श्रुतिसमस्तलक्ष
णलक्षितः श्रौतस्यकर्मणोविहिताविहितत्वप्रयो
णकेमलमासः नचास्यापि द्वात्रिंशत्पूर्णिमासीरि
ष्वाइत्येवंप्रकारोदर्शोदर्शमितिवन्नियमोऽस्तिकुतो
स्यानियामकत्वमिति वाच्यम् पदंशाखाचन्द्रः
न्यायेनद्वात्रिंशत्पौर्णमासीरिति वाक्यस्योपलक्ष
णत्वेनोपन्यासः नतुसाक्षात्सम्बन्धत्वेन तथाहि
शाखायामसत्यपिचन्द्रोतिदूरत्वेनाकाशवर्तीपि
परप्रदर्शनार्थंशाखायांचन्द्र इतिशाखाउपल
क्षणीकृत्यदर्श्यते तथात्रापि द्वात्रिंशत्पौर्णमासी
तिवाक्यमुपलक्षणीकृत्यायंश्रौतोमलोमासोज्यो
तिर्विदांकृत्यादर्श्यते ननुद्वात्रिंशत्पूर्णिमासमा
रभ्यत्रयस्त्रिंशत्पूर्णिमान्तमस्यसाक्षात्सम्बन्धः
तथाज्योतिर्वित्सिद्धान्तेष्वनियमादर्शनात् सती

© Dharmartha Trust J&K. Digitized by eGangotri

सं १४९

नियमेस्मार्त्तोधिकमासवदस्यापि श्रौतत्वविचाता
त्. तस्माद्येनकेनापिमूढेननिजकपोलकल्पितः
पूर्णिमायाः पूर्णिमान्तमित्यस्यानियमोदर्शितः
तद्वचनंस्वेच्छामभाषितमिव श्रुतिस्मृत्याद्यष्टा
दशविद्याबहिर्भूतमनादरणीयमेव त्रैविद्यवृद्धैः
तदलमत्रशशशृंगइवाघन्तासतिविचारप्रपं
चदर्शनेन ततश्चायं षडगानन्दागतःश्रौतोपि
मासः अनियतकालवेलः असौम्यःचन्द्रकलावृ
द्धिक्षयानुमित शुक्लकृष्णपक्षप्रतिपदादितिथि
प्रारंभावसानभावाभावात्. कश्चनपरः चान्द्राधि
मासव्यपदेशानिरूपितः मलिम्लुचश्चौरइवप
रगृहंप्रविष्टः नकेनापिरूपेणलक्षितः अक
स्मान्निपतनशीलःकथंतर्हिसितासिताभ्यांप·
ताभ्यांयातितिथिः श्राद्धकर्मणीत्यादि ब्रह्मपुराणे
यत्नशिष्ट शुक्लकृष्णप्रतिपदादितिथ्येकशरणां
गयादिभ्योविशिष्टफलंपतितोद्धारकंमलिम्लुचेमा
सेऽश्राद्धं पवतिथि.

149

© Dharmartha Trust J&K. Digitized by eGangotri

सत्राक्रमासंभवात्किमाश्रयेणानुष्ठेयमितिचेत्
अत्रत्यत्र आस्तरणाश्रमरणन्यायेन चान्द्रत्वबहिर्भू
तस्यापि श्रौतमलमासस्य चान्द्रत्वव्यपदेशेनैव
पततिथिव्यवहारास्पदत्वम् अमरणीभूतोपिश्रा
स्त्रणेलोकव्यवहारेषु श्रावणजातैवाद्रियते अ
मुक श्रावणेति यस्मिन्नेवत्रयस्त्रिंशेवर्षे सं ३३
हि आषाढवदिवअदि १९ नदि १८ अधिकमा
सप्रवेशोपि १ अचैकस्यामेवदशम्यांतिथौ मल
मासप्रवेशात्पूर्वं सप्तदशीदिनघटीमारभ्यपरस्मि
न्नघटिकात्रये योमृतस्तस्य यथाक्रमश्रामाषा पू
र्णिमान्तमासपरत्वेन श्रावणकृष्णदशम्यां प्र
त्यब्दंतयाहः यस्त्वस्यामेवदशमीतिथौप्रविष्टेम
लमासे विंशतितमघटिकोत्तरकालेपरस्मिंश्चाप
केपिमृतस्तस्य मलमासमृतानांतु सौरमासं
समाश्रयेदिति वचनेनाद्यमिथुन संक्रान्तिसत्र
यामत्यब्दंतयाहः आषाढकृष्णदशम्यामित्येक

© Dharmartha Trust J&K. Digitized by eGangotri

सं स्मिन्नेवमासेतिथिकृतः पौर्वापरविपर्ययः इत्युपह
म॰ सितं षडगनन्दागतमलमासखंडनकृताश्रुभाक
१५० वरांगुलेन तद्दूषणमेवनतद्दूषणं तथाहि षडग
नन्दागतमलिम्लुचस्यातपवै तन्मलिम्लुचत्वंसार्थकं
चौरोहि अनियतकालवेलः नकेनापिरूपेण नि
रूपणीयोकस्मात्परगृहंप्रविष्टः स्वाभिलाषितं
वस्तुसकलमन्दाशंकस्तद्गृहवर्तिसर्वपदार्थजातमस्त
व्यस्तीकृत्यस्वीकुरुते अस्तव्यस्तमेवमुषितंस्वस्था
नेव्यवस्थापयति तादृशेनैवचव्यवहरतीति कि
मप्रस्तुतायामेन अथस्मार्तस्यमलमासस्यलक्षणम्
150 स्मार्तस्तुमलमासः यस्मिन्मासेनसंक्रान्तिः संक्रां
तिद्वयमेववा मलमासः सविज्ञेयोमासेत्रिंशत्तमे
भवेदित्यादिस्मृतिसिद्धोद्विविधः तत्रप्रथममुद्दिष्ट
स्यासंक्रान्तिमलमासस्यलक्षणमस्मृतयः दर्शद्व
यमतिक्रम्ययदासंक्रमतेरविः मलमासस्तदाज्ञे
योमासेत्रिंशत्तमेभवेत् एकराशिगतेसूर्येयदा

© Dharmartha Trust J&K. Digitized by eGangotri

दर्शद्वयं भवेत् हव्य कव्य क्रियाहन्ता तदाज्ञेयोधि
मासकः अमावस्यापरिच्छिन्नं रविसंक्रान्तिवर्जितम्
मलमासं विजानीयाद्गर्हितं सर्वकर्मसु पक्षद्वयेऽर्कसं
क्रान्तिर्यदि नस्यात्सितासिते तदातन्मासिकं कार्यम्
नरेमासि कारयेत् भानुनालङ्घितोमासः ख्यातस्त्वा
न्होमलिम्लुचः संभवन्निजकालं तुनास्मिन्कर्म समा
चरेत् यदाकृष्णचतुर्दश्यां संक्रान्तिं कुरुते रविः
पक्षेसितेद्वितीयेतु तदाज्ञेयोधिमासकः देवमार्ग
स्थितोभानुः पितृमार्गस्थितः शशी अथः स्थश्री
भ्रुगोराशीन्भुनक्तेवं समासतः सर्वेषां शीघ्रगश्चन्द्रः
सदाभानुं जहात्यसौ व्यत्ययः कृतकार्योऽस्तित्रिदशा
नां मलं हितत् सर्वदारवि संक्रान्त्यां यानि राश्यन्तरे
शशी विपर्ययो यदातस्यात्सोधिमासः प्रकीर्तितः
रविर्त्वमंडलमेति यदाशशी तदत्र संक्रमणं कुरु
तेरविः मरवमहोत्सवनाशकरस्तदामुनिवरैः क
थितोह्यधिमासकः यदाशशीयातिगभस्तिमंडले

© Dharmartha Trust J&K. Digitized by eGangotri

सं दिवाकरः संक्रमणं करोत्यथः तदाधिमासः कथितो
विरिंचिना विवाहयात्रोत्सवहृषकस्तदा द्वौशशिमा
१५१ सान्तौचैकस्मिन्सौरमासमध्येस्तः मलमासः स्याद
वमस्तिथ्यन्तावेकवान्तरः इत्यादिस्मृतयः प्रमाणं
तदेवंत्रिंमतमेमासेदर्शद्वयमतिक्रम्य रविक्रमे रवि
शशिगतिव्यत्यये भानुलंगितोमासो भवतीतिलक्ष
णंसिद्धम् तत्रमासेत्रिंशात्तमइति त्रिंशात्तमान्मासा
दूर्ध्वं यस्मिन्कस्मिंश्चिन्मासेभवतीति अनियतपात
परत्वं सार्धद्वात्रिंशन्मासनियतपातस्य षडगन्
न्तागतस्य मलमासस्य वैलक्षण्यायेति प्रतिपादि
तमेवद्वाद्वैः तदेवंदर्शद्वयातिक्रमेण रविसंक्रमणे
तत्रैवादावन्ते उभयत्रवा रविशशिगतिव्यत्यये संभ
वति भानुलंगितोभवतीत्येतावल्लक्षणंसिद्धं दर्शा
द्दर्शं चान्द्रस्त्रिंशाद्दिवसस्सावनोमासः रविसंक्रान्तिक
चिह्नः सौरोमासो निगद्यते तद्वैः तथा चान्द्रः शुक्ला
दिदर्शान्तः सावनस्त्रिंशताद्दिनैः एकराशौरविर्या

151

© Dharmartha Trust J&K. Digitized by eGangotri

वत्कालंमासः सभास्करः इति शुक्लपक्षप्रतिपपा
दे: कृष्णदर्शावसानस्यचन्द्रमासस्यगणनया चैत्र
वदि कृष्णचतुर्दश्यां मीनसंक्रमे वैशुदि प्रतिप
दितमेषसंक्रमे यदाचान्द्रेषु मासेषु मेषादीन्क्रम
तेरविः चैत्रादयस्तदोच्यन्ते तदभावेधिमासकइ
तितु चैत्रत्वव्यपदेशकस्यमेषसंक्रमस्यैव कच्चान्द्रफा
ल्गुनान्त्यांशीभूतप्रथमदर्शातिक्रमः द्वितीयोनि
जान्त्यांशीभूतचरमदर्शातिक्रमस्य यदाभवति
तदादर्शद्वयातिक्रमादधिमासः तथैव यत्रचैत्रव
दिदर्शे एवमीनसंक्रान्तौ वैशुदि प्रतिपदिमेष
संक्रान्तिस्तदा चैत्रत्वव्यपदेशकस्य मेषसंक्रम
स्य दर्शद्वयातिक्रमेस्फुटेजायमानेधिमासत्वम्
तथात्रैवभेदद्वये अमावस्यामहोरात्रे यत्रसंक्र
मतेरविः सतुमासः पवित्रःस्यादतीतेतथिकोभ
वेदिति चान्द्रफाल्गुणस्यनिजचरमांसभूताया
ममायांमीनसंक्रान्ते फाल्गुणत्वव्यपदेशिकाया :

© Dharmartha Trust J&K. Digitized by eGangotri

सं सद्भावान्मलिनत्वम् चैत्रस्य तु चान्द्रस्य स्वान्त्यांशभू
म तेदर्शे चैत्रत्वव्यपदेशिकायां मेषसंक्रान्तेरतीत
१५२ त्वान्मलिनत्वमिति एवं वैशाखादिष्वाश्विनपर्य
न्तं बोध्यम् कार्तिकादिपंचके तु चान्द्रमासापेक्ष
या वृश्चिकादिभोगस्याल्पत्वाद्दर्शद्वयातिक्रमो न
संभवत्येव तथा च दर्शद्वयमित्यादि स्मृतेरर्थः
दर्शाद्दर्शं चान्द्र इत्येवं लक्षणस्य चान्द्रमासस्य
पूर्वो दर्शो मर्यादीभूत उत्तरस्त्ववधीभूतः तौ
द्वावेवातिक्रम्य रविर्यदा संक्रमते राशे राश्यन्त
रं गच्छति तदा मलमासो ज्ञेयः प्रथमदर्शस्य म
र्यादात्वेन स्वभावसिद्धस्येति क्रमेवधीभूतस्य
चरमस्यापि दर्शस्यातिक्रमे रवे राश्यन्तरग
मनान्मलमास इति लक्षणार्थः दर्शद्वय
मिति द्विग्राह्यतस्य तयस्य च व्यवच्छेदाय मा
द्वाते हि मासि तन्मासव्यपदेशको रविः
स्वान्त्यांशीभूतं दर्शं यत्र क्रमन्नतिथो तस्मि

152

© Dharmartha Trust J&K. Digitized by eGangotri

न्नेववादर्शे संक्रान्तः क्रमते प्रतिक्रमतेच स्वमर्या
दाभूतं पूर्वमासान्त्यंदर्शमेकमिति नातदर्शाद्व
यातिक्रमः एवमेवद्विसंक्रान्तिकेक्षयमासेपि
बोध्यम् अथक्षयमासलक्षणं राशिद्वयंयत्र
मासेसंक्रमेतद्दिवाकरः क्षयमासः सविज्ञेयः स
र्वकर्मसुगर्हितः तथा अत्रक्षतिर्यदैकस्मिन्मा
सेद्वौसंक्रमौ तदा असंक्रान्तिमासोधिमासः स्फु
टः स्याद्विसंक्रान्तिमासः क्षयाख्यः कदाचित्
क्षयः कार्तिकादित्रयेनान्यदास्यात्तदावर्षमध्ये
धिमासद्वयंस्यात् तदेवंयदि कदाचित्पूर्णि
मान्तमासगणनयाज्ञातस्याश्विनस्यकृष्णपक्षे
चतुर्दश्यामभावस्यायांवाकन्यासंक्रमणे पुनः
भाविनि पूर्णिमान्तगणनयाख्यातस्यकार्तिक
स्य शुक्लप्रतिपदितुलासंक्रमणदाश्विनस्या
संक्रान्तिकत्वेजाते अत्रैववान्द्रः शुक्लादिदर्श
न्त इत्येवंक्रमगण्यमानेनन्तरे मासिवृश्चिकसं

© Dharmartha Trust J&K. Digitized by eGangotri

सं प्राप्ते दर्शे वृश्चिसंक्रांतौ संभवन्त्यां मेषेरवि
संक्रान्तिः प्राग्गिमासेभवति यत्रचैत्रोसौ एवं
११५३ वैशाखाद्या वृषादि संक्रांतियोगेन इतिक्रम
गणनया कार्त्तिकत्वव्यपदेशकस्य वृश्चिकसं
क्रमस्य संभवात्कार्त्तिकत्वेनज्ञायमानेस्मिन्मा
सद्वयो स्तुला वृश्चिकयो राश्योः सूर्यसंक्रम :
इतिद्वयमासोदाहरणम् एवमेव मार्गपौ
षयोरपिबोध्यम् तथाच तदावर्षमध्येधिमा
सद्वयंस्यादिति यदुक्तं तत्राप्यधिमासद्वयोप
पत्तिः दर्शिता षड्गनन्दागतमलमासखंडने
153 प्रभाकरेण कन्यास्थेनरविणामासस्यलं
घितत्वेपि पुनर्धन्विभोगस्य चान्द्रमासापेक्ष
याल्पत्वाद्भाद्रपदादर्शसंक्रमे पौषस्य द्विसंक्रा
न्तित्वे पूर्वोत्पन्नस्य मासाधिकस्यबाधितत्वे उ
नःमीनस्थेनरविणाचान्द्रमासोलंघने वाथ
रहितस्यचैत्राधिमासस्योत्पत्तिरिति ग्रन्थैवंका

© Dharmartha Trust J&K. Digitized by eGangotri

माथवीकारः चान्द्रोधिमासोसंक्रान्तः सैन्तोऽभ
वतिचोमरे असंक्रान्तीएकवर्षेद्वौचेसंसर्प्पआ
दिसः त्वयः मासोद्विसंक्रांतिःसचांहस्पतिसंज्ञ
कः त्रयस्त्याज्याविवाहादौसंसर्प्पांहस्पतीउभौ
शुद्धौश्रौते तथा स्मार्त्तेमलमासोविधीयते सं
सर्प्पांहस्पतिरधिमासइत्येते त्रयोपिज्योतिःशा
स्त्रनिरूपिते विवाहादौत्याज्याःश्रौतस्मार्तकर्म
सुसंसर्पः शुद्धस्तथैवांहस्पतिरपि अधिमासश्रौ
तस्मार्तविषयस्यविवेचनीयस्य बाहुल्यान्नहिवे
कः पृथक्प्रतिज्ञायते एवमेवनिर्जयामृतेपि
एकत्रमासद्वितयं यदिस्याद्वर्षेधिके तत्रपरो
धिमासः त्रयोदशंत्वक्रतिराह वेदेचतुर्दशः
क्वापिनचास्तिदृष्टइति तथाचात्रैव असंक्रान्तिक
स्यसंसर्प्पइति द्विसंक्रान्तिकस्यांहस्पतिरितिच
संज्ञान्तरं दर्शद्वयंयदैकस्मिन्सौरेसत्यंचकेभवे
त्. अंहस्पतिस्तदैकस्मिन्मासेद्वौसंक्रमौयदा संस

© Dharmartha Trust J&K. Digitized by eGangotri

सं यों हसतीचेति द्विविधावधिमासकौ मासो ह्र
म र्वोपरो ह्युक्तौ परपूर्वौ शुभावहाविति तथाच पा
११५४ रिजातेपि अत्र मलमासो नामाधिकमास एव न
त्वयमासः त्वयमासे तत्रैव श्राद्धविधानात् प
कएव यदा मासः संक्रान्तिद्वयसंयुतः मासद्व
यगतं श्राद्धं मलमासेपि शस्यते गावलेपि व
र्षेवर्षे त्वयः श्राद्धं मातापित्रोर्मृते हनि मासद्व
येपि तत्कार्यं व्याघ्रस्य वचनं यथा मासद्वयेति
संक्रान्तिद्वययुक्तत्वात्त्वयमास एव मासद्वया
त्मक इति तथाहि त्वयमासत्वेन गणिते कार्ति
के तुलावृश्चिकयोराश्विनकार्तिकव्यपदेशक
यो तत्र द्वयोरेव संभवान्मासद्वयात्मकत्वमिति
सिद्धम् तदेवं सिद्धे श्रुतिस्मृतिद्वैधेन मलमासे
सामान्यतो द्वयोरेव व्यासानि विधिनिषेधवचना
नि प्रदर्शयामः तत्र मलमध्ये यो मृतः तस्य व
र्षाकमं श्राद्धषोडशाकं प्रेतत्वमोचकं सम्पाद्य

159

© Dharmartha Trust J&K. Digitized by eGangotri

यस्मिन्कस्मिंश्चिक्रमप्राप्तेद्वादशेमासि प्रथमा
ब्दिकं विधेयं तथा चापरार्के हारीतः सर्वदा द्वाद
शे मासि कार्या पिंडक्रिया बुधैः क्वचित्त्रयोदशेपि
स्यादाद्यं मुक्त्वा तु वत्सरम् अस्यार्थः सर्वदा द्वाद
शे मासि परिसमाप्ते त्रयोदशारंभे सांवत्सरिकं का
र्यं अधिमासोपनिपाते तु त्रयोदशेतीते चतुर्दशा
रंभे प्राप्ते पिंडक्रिया आद्ये तु वत्सरेधिमासे द्वादशेव्य
तीते त्रयोदश एव कार्यं न चतुर्दशे इत्येतच्च यस्य
मासस्याब्दिकं लगति तद्विषयं अन्यथा त्रयोदशे
मासिके दत्तो जलांजलिः स्यादिति अत्रायं चतुर्थे
श्लोकपादे वाक्यार्थः द्विराषाढःशुद्धि प्रतिपद
मारभ्याधिमासे यो मृतस्तस्य नष्टाब्दिः तत्सर्वकाल
मृतस्य तन्नष्टाब्दिरस्त्येवेति तथाहि यदि संवत्सराभ्य
न्तरेधिमासः स्यात्तदा मासिकार्थं दिनमेकं वर्धये
दिति विस्रर्वचनेप्ययमेवाभिप्रायः मासिकार्थ
मित्यत्र यावद्वचनं वाचनिकमिति न्यायेन मा

© Dharmartha Trust J&K. Digitized by eGangotri

सं सिकानिदर्शैकं चेति संख्यातान्येकादश।
१५५ मासिकानि नचमलमासस्थतस्य तेष्वेक
मपिमासिकंानि नचमलमासे संभवति
ऊतोत्रवृद्धिः ऊतस्तदनुगामि त्रयोदश
मासगणनयासमदशात्वंप्रेतपिंडेष्विति
तत्सिद्धं मलमासस्थतस्य द्वादशैवमासाइति
ननुमासपततिथि स्पष्टेयोयस्मिन्नित्यादिवच
नेन चान्द्रैवेत्रादीनियतोयः न्वयाहः सकथं त
तोन्यत्रयत्रक्वचन द्वादशगणनया प्राप्तेमासेक्रि
यते सत्यंमासपत्ततिथि स्पष्टेति वचनस्य सामा
न्यतयोत्सर्गभूतस्याधिमासेविपतिश्चेदित्यादि
विशेषापवादवशोभिर्वाधायाःप्रयमानत्वादन्तु
त्यत्वेसति अत्राप्येतद्वाधाया अनुमीयमानत्व
मस्त्येव अथवा षष्टिभिर्दिवसैःमासःकथितो
वादरायणे इत्यादियोजनयाघसं ३३ आषाढ
स्यायतनस्य मलप्राप्त्या षष्टिदिवसावच्छिन्नत्वे

155

© Dharmartha Trust J&K. Digitized by eGangotri

मलमासस्तत्त्वयाहस्याषाढत्वे संभाव्यमा
ने सं ३८ भविष्यति श्राषाढे द्वादश समाप्ति
संख्यानेनशाकोसत्त्वामपि मासपत्ततिथि स्
छतया चान्द्रमासस्य त्वयाहत्वे काचिद्धानिर्नाः
स्त्येव तस्मादसंक्रान्तिकमासस्य मलत्वे द्विराषा
ढस्रुति पूर्णिमान्तमाषाढसत्ताशमारणेन स्त
स्यभाविन्याषाढेत्वयाह शमिरविप्रतिपन्नैव प
वमत्रैव श्रावदिमलस्य भाविनि श्रावणेपि त्व
याहविधिरनवद्य एव यत्त्वषड्गानन्तागतमल
मासमानी तस्यापि मलमासस्यत्रिंशद्दिवसा
वच्छेदाद्विराषाढसुदिप्रतिपदमारभ्य श्रासुदे
प्रतिपदं तावत्सत्त्वयाषष्टिदिवसावच्छिन्नमास
योगे सर्वत्राषाढत्वमेव कथंनभवति तत्कि
मिति द्विराषाढसुदिपूर्णिमान्तमाषाढत्वम
तः परेश्रावणत्वमितिचेत् सत्यं अस्त्येवेदम्
दर्शाद्दर्शो चान्द्रइतिन्यायाद्विराढवदिदर्शः

© Dharmartha Trust J&K. Digitized by eGangotri

सं मारभ्यागामिनीं द्वितीयाममावस्यां यावदाषा-
म ढएव लिखन्ति मानएवगणाका श्रवभानुमा
१५६ समन्तांपर्यन्त पूर्णिमाद्यवसानः स्यान्मासोदेव
कृतस्तथा दर्शान्तोमानयो ज्ञेतो विन्याद्दन
दयाम्य गोइति गर्गेणविन्ध्योत्तरदेशे पूर्णिमा
न्तस्य चान्द्रत्वं व्यवस्थापितं विन्ध्यदक्षिणदे
शेत दर्शान्तस्येति व्यवस्था भेदेनचान्द्रमास
भेदात्सर्वत्रएते आषाढत्वम् उत्तरस्मिन्पते
श्रावणत्वमिति तस्माद्भाविनि श्रावणकृष्ण
पते व्यवस्थया श्रावणोद्देशेपि न काचित्क्षतिः
उच्चारयन्तिचातएव देवपितृकर्माणि त्रैविद्य
द्दष्टा आषाढएव श्रावश्रावणमासेत्यादिसंक
ल्पावसरे अथमलमासेशुक्लपक्षान्तस्य द्वि
तीयवर्षाषाढ शुक्लपते कृष्णपक्षान्तस्य स्य
त तत्रैवश्रावणेद्वादशमाससमाप्तिगणनया
प्रथमाह्निकमिति यःक्रमोनिरूपितः सएवस

156

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिवत्सरं द्वितीयादिश्राद्धिकेषु गणनीयो यतो वार्षिक
श्राद्धेनेतिचेत् सत्यम् प्रसक्तमस्य दर्शान्तो वैदिको
मासो राकान्तः स्मार्त इष्यते पौराणे हरिदिवसा
न्तः सौरस्तूत्पत्तिपूर्वक इत्यार्षिषेणिवचनाद्वैदिक
स्य दर्शान्तमासस्य द्वात्रिंशद्भिः पौर्णमासीभि
र्यज्ञेतेति श्रुतिसिद्धस्य मलिम्लुचस्य पूर्वापर॰
व्यापितया वर्तमाने वत्सरे चतुस्त्रिंशे च वत्सरेम
ध्यपाते नैमित्तिकत्वयोत्पन्ने कर्मगणे प्रयोगः नो
त्तरेषु पंचत्रिंशादिवर्षगणेषु पतत्सु तत्र भाविषु
द्वितीयादिश्राद्धिकेषु तु अधिमासे विपन्नानां
सौरं मानं समाश्रयेत् सएवतस्य मासोपि श्रा
द्धपिंडक्रियादिषु यस्मिन्राशौ गते सूर्ये विपत्तिं
याति मानवः तद्राशावेव कर्तव्यः पिंडकार्यं स्तुता
हनीत्यादीनां व्यासादिवचनानां नादर्शनात् उक्त
पक्षप्रतिपदमारभ्य कर्कटसंक्रान्तेः सप्ता॰
श्रावणएवसौरमाना श्रयणादाह्निकम् सच

सं

म

१५०

157

श्रावरणोस्मिन्देशेविन्ध्योत्तरतयासदाचारपरिप्रा
प्तः पूर्णिमान्तएव यथावस्थितोग्राह्यः नचैवंप्र
थमाह्निके द्वादशसमाप्तिगणनया क्रियमाणे
द्वितीयाह्निकस्यानयापुनरा क्रियमाणतायांप्र
मायां त्रयोदशत्वेकाचिद्धानिः यदत्रापि त्रयो
दशेतुसम्प्राप्तेकुर्वीत पुनराह्निकमिति एवम
चनेनमलेक्रियमाणस्य प्रथमाह्निकस्य यथा
द्वितीयाह्निकेत्रयोदशेसमाप्राप्ते कर्तव्यतातथा
त्रापि अतएवानन्तभट्टेन आह्निकंप्रथमंयत्तस्मा
न्नकुर्वीतमलिम्लुचे त्रयोदशेतुसम्प्राप्तेकुर्वीत
पुनराह्निकमिति वाक्येनकुर्वीतकारेणपाद
पराहृतास्मिन्विषये योजितम् तथाह्नस्यार्थो
व्याख्यातः मलिम्लुचेमृतस्य प्रथमाह्निकम्
यत्रत्रयोदशे संप्राप्तेनकुर्वीतकिंतु द्वादशेएव
तु एतदनन्तरे मलमासमृतस्य पुनराह्निकं द्वि
तीयाह्निकं यत्रत्रयोदशे सम्प्राप्तेकुर्वीतनतुद्वाद
शे इत्यर्थः तत्र मलमासमृतस्य,

© Dharmartha Trust J&K. Digitized by eGangotri

सौरमानानुयेरणे न तयाहस्यैतद्धि प्रत्यब्दमध
तनमलमासमृतानां कर्कटसंक्रान्ति शुक्लाष्टके
षु भाविष्वाश्रावणेषु कोविचारइतिचेत् चक्र
वत्परिवर्तेनसूर्यः कालवशागतः प्रतःसांवत्
सरंश्राद्धंकर्तव्यंमासचिह्नितं मासचिह्नन्तुक
कर्तव्यंपौषमासाद्यमेवहि इत्यादि वचनबलं
त्कर्कटसंक्रान्तिरश्रावणमासस्तु परंतु श्रावण
एवकार्यं महालयेकन्यांगच्छन्वावेत्यादिवद
त्रापि रविसंक्रमस्यैवतत्प्राधान्यात् यदातुग
च्छताकालेनमलमासमृतस्यपुनःसयाहमा
सस्याधिक्येन पुनरुक्तौ तस्यश्राद्धं सपिंडीक
रणाहर्ध्वयत्किंचिच्छ्राद्धिकंभवेत् इह्रंवाप्य
च्छवाप्यृतेन तत्कार्यान्मलिम्लुचे इत्यादिहारीतः
वर्षेवर्षेतुयच्छ्राद्धं मातापित्रोर्मृताहनि मल
मासेनतत्कार्यं व्याघ्रस्यवचनंयथा इत्यादि
वचनैः पुनर्मलमाससम्बन्धस्य द्वैमासिकर्तव्यते

© Dharmartha Trust J&K. Digitized by eGangotri

सं प्राप्ते तत्रमलमासएव कर्तव्यतायांनियामका
म निवचनानि यथामलमासमृतानन्तु श्राद्धंयत्प्र
१५८ तिवासरं मलमासेपिकर्तव्यंव्यासस्यवचनंय
था मलमासमृतानांतुयत्कार्यंप्रतिवासरम्
मलमासेतुतत्कार्यं नान्येषांतुकदाचन वर्षेव
र्षेतुयःश्राद्धंमृताहेतन्मलिम्लुचे कुर्यात्तत्प्रमी
तानामन्येषामुत्तरत्रतु इत्यादिवचनबलान्मल
मासमृतस्य पुनर्मलमासप्राप्तौमलएवश्राद्धं
नोत्तरत्रेति सिद्धम् यस्यशुद्धमासमृतस्य पुनः
तयाद्येमलिम्लुचःपतितः तस्यमलिम्लुचंत्यक्त्वो
त्तरेशुद्धेमासिश्राद्धंकार्यं सपिंडीकरणादूर्ध्वंय
त्किंचिच्छ्राद्धिकंभवेत् इष्टंवाप्यथवापूर्तंन
तत्कुर्यान्मलिम्लुचे इत्यादिहारीतः वर्षेवर्षेतु
यच्छ्राद्धंमातापित्रोर्मृताहनि मलमासेनतत्कार्यं
व्याघ्रस्यवचनंयथेत्यादिवचनैः पुनर्मलंत्यक्त्वा
शुद्धेमासिकर्तव्यत्वेप्राप्ते तत्रमलमासएवेति

158

© Dharmartha Trust J&K. Digitized by eGangotri

कर्त्तव्यमायांनियामकानि वचनानि अधिमास
नकर्तव्यं श्राद्धमाभ्युदयंतथा तथैवकाम्यंयत्कर्म
वत्सरात्प्रथमादृते अनन्तेज्योतिषिपितामहः षष्ठ
त्रदिवसैःमासःकथितोबादरायणो पूर्वार्थेत
परित्यज्यकर्त्तव्यास्तेक्रियाः पैठीनसिः श्रौतस्मा
र्तक्रियाःसर्वाद्वादशेमासिकीर्त्तिताः त्रयोदशेत
ताःसर्वानिष्फलाइतिकीर्त्तिताः तस्मात्त्रयोदशे
नैतत्कुर्यान्नत्रकदाचन कुर्वन्नर्थमेवाप्नुयादा
त्मविनाशनं कालनिर्णयेवसिष्टः आब्दिकाद
निसम्प्राप्तेमलमासोभवेद्यदि श्राद्धद्वयंप्रकुर्वी
तएवंकुर्वन्नमुह्यति पारिजातेगालवोपि वर्षे
वर्षेतुयच्छ्राद्धंमातापित्रोर्मृताहनि मासद्वये
पितृकार्यंव्याघ्रस्यवचनं वर्षेत्यादि तस्मात्क्षये
मलिनेचेति श्राद्धद्वयं कर्तव्यम् तत्केचित्तद्य
मासपरतयायोजयन्ति परंतन प्राप्तस्यविलो
पोस्मिपैटकस्यविशेषतइति वचनान्नदिनस्या

© Dharmartha Trust J&K. Digitized by eGangotri

सं वत्सरत्वार्थे मलमासे पित्रुद्देशेन ब्राह्मणं भोजयी
म· त्वा शुद्धमासे पि श्राद्धं कुर्यादित्येवं परतया वर्णय
१५९ न्ति विद्वांसः कश्मीरेषु द्वैविध्यदृष्टास्तु सामंतया
हश्राद्धं मलिम्लुचे मार्तंडपादमूले कृत्वा पुनः
यथावच्छुद्धेपि कार्यमिति निश्चित्य कुर्वन्ति तथा
चापरार्के शौचप्रकरणे ब्रह्मपुराणे क्रियते
पतितानां तु गते संवत्सरे क्वचित् दशाथर्मप्रदान
त्वा गयात्र्ये सबन्धुभिः मार्तंडपादमूले वा श्रा
द्धं हरिहरौ स्मरेत् स्कन्दपुराणे अदशपानामपि
ण्डानां पतितव्रतिनां तथा श्राद्धं पिण्डप्रदानं
च नैव कुर्यादिति श्रुतिः तेषां मलिम्लुचे मासि
सर्वं ते त्रेप्रयत्नतः सितासिताभ्यां पक्षाभ्यां या
तिथिः श्राद्धकर्मणि तस्मिंस्तस्मिन्नवितेत्रे मा
सेचैवत्रयोदशे श्राद्धपिंडप्रदानं च कुर्यान्मार्तं
डपादयोः यत्तु संवत्सरे द्वात्रिंशे असंक्रान्ति
कस्य मलत्वमंगीकुर्वाणाः ॥

159

© Dharmartha Trust J&K. Digitized by eGangotri

आवत्समावस्यामारभ्य भावदिदर्शान्तंतावन्स्तः अथ
वा अस्मिन्वर्षे षडगनन्दागतस्य मलत्वमंगीकुर्वन्
आवदिद्दशमीमारभ्य भावदिदशमीतावन्स्तः
तस्यसंवत्सरेत्रयस्त्रिंशेयमलमाससनायां द्वादशमा
सगणनया मलमासे एव प्रामेरेजैव प्रथमाह्निकं
श्राद्धकार्यं वसिष्ठः असंक्रान्तेपि कर्तव्यमाह्निकंप्र
थमंद्विजैः तथैवमासिकेसर्वंसपिंडीकरणंतथा
हारीतः अधिमासेनकर्तव्यंश्राद्धमाभ्युदयंबुधैः त
थैवकार्म्यंयत्कर्मवत्सरात्प्रथमादृते सर्वदाद्वाद
शेमासिकार्यापिंडक्रियाबुधैः कश्चित्त्रयोदशेपि
स्यादाद्यंमुक्त्वातुवत्सरं यमः आह्निकंप्रथमंयत्
स्यात्तत्कुर्वीतमलिम्लुचे त्रयोदशेतुसम्प्राप्तेकुर्वी
तपुनराह्निकं अस्मिन्वचनेतरार्थंप्रथमाह्निकेद्वा
दशसमाप्तिगणनायांवचनबलान्मलमास एव
कृतेद्वितीयाहस्य द्वादशसम्प्राप्तिसंख्यानेनवा मा
सपततिथिस्पृष्टइत्यादि तयाहलतरणानुमानेन

© Dharmartha Trust J&K. Digitized by eGangotri

सं वाकर्त्तव्यत्वमित्यनियमे प्राप्ते त्रयोदशो तु सम्प्राप्ते इति
म द्वितीयाह्निकस्य तयाहलक्षणानुसारेणैव कर्त्तव्य
१९० तानियम्यते तथाहि प्रथमाह्निकं तु यत्र द्वादशागण
नयाप्राप्तं मलिम्लुचे एव कार्यं द्वितीयाह्निकं तु त्रयोद
शे सम्प्राप्ते तयाहानुसारेणाकर्त्तव्य तथा पारिजाते
प्येवमेव द्वितीयाह्निकं तु श्राद्धएव कार्यं तस्मिंस्तु
प्राकृते मासि कुर्याच्छ्राद्धं यथाविधीति सत्यस्मरणा
त् अतएव सर्वदा द्वादशो मासीति वाक्ये क्वचित्त्रयो
दशोपिस्यादिति क्वचित्पदेनाविशेषार्थेन मलमा
सेवा तदुत्तरकालिके वा यथाविधिप्राप्ते त्रयोदशो
पि स्यादिति व्याख्यातम् यस्तु संवत्सरे द्वात्रिंशे भा
वदिदर्शमारभ्य त्रयस्त्रिंशाद्धि आषाढवदिदर्शं ता
वन्मृतः अथवैवद्विआषाढवदिदशमी तावत्
षड्गनन्तरागतस्य मलत्वमंगीकुर्वाणो मृतः तस्य
वत्सरकस्य चिन्मासिकस्य प्रथममासिकादूर्ध्वमेका
दशमासिकान्तस्य मले प्राप्याद्द्विवशात्त्रयोदशोमे

160

© Dharmartha Trust J&K. Digitized by eGangotri

सिमांवत्सरिकंकार्यम् तथाहि सं ३२ भाद्रशुक्लाऽऽ
तस्य पुनः संवत् ३३ भाद्रशुक्लेश्राद्धकर्तव्यतया
त्रयोदशमासत्वंस्पष्टमेव एवमन्यान्यमासेष्वपियथा
यथंयोज्यम् तथाच विष्णुः यदिसंवत्सराभ्यन्तरेऽ
धिमासः स्यात्तदामासिकार्थंदिनमेकंवर्धयेत् अ
त्राभ्यन्तरपदोपदानादवधिभूतयोराद्यस्योर्ध्वदेहि
कनाम्नर्थनसांवत्सरिकनाम्नश्चान्त्यस्यश्राद्धपिंडस्य
निवृत्तिः तथाहि चैत्रमैत्रयोर्मध्यागच्छद्दत्तमानये
त्युक्ते कश्चिच्चैत्रंमैत्रंनानयति किंतु तन्मध्यवर्ति
नंयज्ञदत्तमेव तथात्रापि मध्यवर्तिनएववृद्धिः न
त्वाद्यन्तयो मासिकार्थमितीकएकवचननिर्देशा
न्मासिकश्राद्धाभिधेययोस्त्रिपाकपंक्त्यानियमाद्दन
स्यानिवृत्तिः तस्मात्मामेऽद्वितीयमा सिकेतृतीय
मासिकेषाण्मासिकेवामलिम्लुचे नद्वयोःपिंडयोर्वृ
द्धिः किंत्वेकस्यैव अतोवृद्धावपिसप्तदशत्वमेव प्रेत
पिंडेषुश्राद्धेषुनसदाचारविरुद्धमष्टादशत्वमपीति

© Dharmartha Trust J&K. Digitized by eGangotri

सं अत एवमलद्दशा क्रियमाणाधिकमासिकश्राद्धे य
म स्यैव मासस्याधिकं तत्समीपे वान्यत्र वेत्यनियमे प्राप्ते
१६१ विस्पष्टार्थमेष नियमः मध्ये चेदधिमासः स्यात्कुर्यादब्
दयं तदिति मध्येऽधिमासप्राप्तिवशाद्दूद्यात्रयोदशे
त्वं प्रतिपाद्य कालातिदेशमाह संवत्सरस्य मध्ये
चेदधिमासकस्ततो द्वादशे मासि कार्यं तदधिमास
कम् अस्यार्थः संवत्सरस्य मध्ये चेदधिमासः
पतति तर्ह्यधिमासद्वशात् क्रियमाणं सप्तदशं श्रा
द्धं यत्रैव त्रयोदशेऽपि द्वादशत्वं तयाद्ददलक्षण
त्तमितं कल्प्यते तत्रैव कार्यं न तु यस्य मासस्य द
द्धिस्तत्समीप इति तस्मादित्थमेव कश्मीरेषु ॥
नैविधद्दहार्थेन सांवत्सरिके सप्तदशे श्राद्धे इत्य
श्राद्धस्यान्ते दमदशं पिण्डं ददति गच्चवाक्यं श्राद्धे
याहनि संप्राप्ते अधिमासो भवेद्यदि श्राद्धद्वयं
प्रकुर्वीत एवं कुर्वन्न मुह्यति इति प्रेतश्राद्धपरे वसि
ष्ठवाक्ये एकोद्दिष्टेनैव श्राद्धद्वयस्य कर्तव्यत्वं सपै
केनोद्देशः यस्य मासस्य वृद्धिस्तल्लग्नं,

161

© Dharmartha Trust J&K. Digitized by eGangotri

तस्यैव संख्यानुसारेण मलिनेपि मुख्येपि मासे द्विः कार्या
इति सिद्धेपि मासमुख्या क्रियमाणस्यैकस्य द्वितीयोद्देशो
न समीपपर्वकर्तव्यत्वे किमर्थमाकृष्यान्ते क्रियत इति
तथा हि एकोद्देशेन श्राद्धद्वये द्वितीयाशुद्ध मलिनभेदे
न क्रियमाणे यदि कदाचिद् द्वितीयमासिके तृतीयमा
सिके षाण्मासिके वा मलवशान्मासद्वित्वं लग्नं
तर्ह्येवंविधे विषये तृतीयपाक्षिके तृतीये द्वितीयमा
सिके च तदर्थं शुद्धोद्देशेन मलिम्लुचपाते श्राद्धे कृते शुद्धे
पि तस्मिन्मासि एवमेव तृतीयपाक्षिके तृतीये द्विती
यमासिके च तदर्थं शुद्धोद्देशेन क्रियमाणेप्येतच्छ्राद्धा
नामष्टादशत्वं न त्वश्रुति स्मृतिविरुद्धमनिष्टं च त
थाहि विष्णुवचनेदिनमेकं वर्धयेदित्यनेनैकमिति नि
र्णयं कस्मात् तस्मात्क्रमगणनया मलिम्लुचे संख्यो
द्देशं कृत्वा शुद्धे तदनन्तरकालिके मासि परपर्वसंख्यो
द्देशः करणीयः न त्वेकपर्वद्वयोः मासयोः द्विरुद्देश
नीय इति तथा च पारिजाते गार्ग्यः न कुर्यान्मलमा

© Dharmartha Trust J&K. Digitized by eGangotri

सं मेतत्कर्मीकर्मकथंचन शुक्लानैमित्तिकंश्राद्धंतन्नैमि
म त्तिकमुच्यते तत्कार्यंपूर्वमासेपिकालाधिकेपिथर्मतः
१६२ एकोद्दिष्टषोडशश्राद्धादि पूर्वमासेपि अपिशब्दएव
कारार्थः पूर्वमासएवकार्यमित्यर्थः कालाधिकेपिस
त्येकोद्दिष्टंश्राद्धं पूर्वएवकार्यमित्यर्थः कालाधिकेन
तद्दृष्टिश्राद्धादिवद्धुनरत्र शुद्धेमासि अयोगमन्ययोगं
वा अत्यन्तायोगमेवच व्यवच्छिन्नर्तिथर्मस्य एवका
रस्त्रिधामत इत्यभियुक्तोक्त्यास्मिन्वाक्यद्वयेपिशब्दए
वकारार्थः एकोद्दिष्टश्राद्धस्यान्यमासयोगंव्यवच्छिन
र्त्ति यथार्ज्जुनएवधनुर्धरइति तदेवंसिद्धमेकोद्दिष्ट
162
स्यक्रमप्राप्तसंख्याद्देशेनमलमासएवकर्त्तव्यत्वं नो
भयत्रैवैकोद्देशेनेति तस्माद्यानिकानिचिद्वचनानि
मलमासे श्राद्धद्वयवाचकानितानिदृद्धएवत्वेनयो
ज्यानि नत्वेकस्यैवबुद्धावपि द्विरुद्देशा तथाकर्त्तव्यत
पराणि तथाचानन्तेप्येतदेवैकोद्दिष्टश्राद्धस्य पूर्वस्मि
वकर्त्तव्यत्वं यथा द्वौमासावेकनामानौस्यातांसंवत्सरेक्वचित्

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वेतु पितृकार्याणि देवकार्याणि तूत्तरे पितृका
र्याणि प्रेतसम्बन्धीनि कार्याणि उत्तरे देवकार्याणि
पवित्रारोपनागपूजा कुलधर्मप्राप्तानि यानि ता
न्युत्तरे क्रियमाणानि नदुष्यन्ति अतएव वृद्धौ यमः
अन्नमग्रुष्टं दद्यादन्नं चापि सुसंस्कृतं संवत्सरे वृ
द्धेपि प्रतिमासं च मासिकम् व्यासः षष्टिभिर्दि
वसैः मासः कथितो बादरायणे उत्तरे देवकार्याणि
पितृकार्याणि चोभयोः पितृकार्यं मासिकपरम्
अगस्त्यवचनेन पूर्वं एवमलिनेकम अप्राप्तनिजसं
ख्योद्देशेन श्राद्धे कृते पुनस्तस्मिन्नेवाब्दे विरम्य
विश्रामशंकायां जातायां व्यासोनेन वचसा तस्मिं
न्नब्दे तदुत्तरकालिकस्य श्राद्धान्तरस्य कर्तव्यतामा
पादयति एवं संख्यानतिक्रमेण श्राद्धेषु यथाक्र
मं क्रियमाणेषु अधिकस्य सप्तदशस्यान्त्याप
व कर्तव्यता प्रस्फुटं स्फुरतीत्यलं विस्तरेण ॥
अथ मलेवज्यावर्ज्यविधिः तत्रावर्ज्ये बृहस्पतिः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मं नित्यनैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुचे तीर्थश्रा
म द्धं गजच्छायां प्रेतश्राद्धं तथैव च नित्यमावश्यकं य
१६६ दकरणे कालातिक्रमनिमित्तं प्रायश्चित्तं श्रूयते
अथ च यन्मासविशेषनामनिरपेक्षमेव विहितं त
न्मलमासेपि कार्यं यदहरहः पंचमहायज्ञ देवार्च
नातिथिपूजा सन्ध्यावन्दनादि नैमित्तिकं पुरुषप्र
यत्नाधीनेन निमित्तेन विहितं यस्तत्रजन्मसोमसू
र्योपरागादौ जातकर्मस्नानश्राद्धादि तन्मलिम्लु
163 चेपि कार्यं गजच्छायापारिभाषिकी सातादृजच्छा
या तदुभयमपि न नित्यमकरणे प्रत्यवायाश्रवणा
त् नापि नैमित्तिकं गजसम्भूत्यादेः नित्यनैमित्तिक
त्वाभावात्पृथग्व्यपदेशः अत्रैव निर्णयामृते विश्व
रः नित्यनैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुचे तीर्थ
श्राद्धं गजच्छायां प्रेतश्राद्धं तथैव च मघात्रयोदशी॰
श्राद्धं श्राद्धान्यपि च षोडश चन्द्रसूर्यग्रहे श्राद्धं दान
स्नानजपादिकं कार्याणि मलमासेपि नित्यनैमि

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिकेतथेति अत्रतीर्थश्राद्धं स्नानं सर्वमेव न तत्पूर्वं अपू

र्वे तीर्थस्नानस्य मलमासे निषेधात् तदुक्तं मलमा

सेऽप्यनावृत्ततीर्थस्नानं विवर्जयेत् नैमित्तिकं यदि पूर्वं

मासे निमित्तमुत्पद्यते तदा पूर्वत्रैव यदा मलमासे तदा

तत्रैव उभयत्र चेन्मासद्वयेऽपि कुर्यात् यदाह गभस्तिः

जातकर्म जातश्राद्धं नवश्राद्धं तथैव च ग्रहणे सूत

कादौ च तत्सर्वत्र परत्र च निमित्तवशादिति शेषः

मात्स्ये चन्द्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि मलमा

सेऽपि देयं स्याद्दत्तमक्षयकारकम् मरीचिः योगे चा

लभ्ययोगे च सीमन्ते पुंसवे तथा यद्दानादिकमुद्दिष्टं

पूर्वत्रापि तदुच्यते नित्यान्यपि च पंचयज्ञादीनि मा

सद्वयेऽपि कार्याणि तदुक्तं मैत्रेयसूत्रे मासद्वयेऽपि

यद्येकमसंक्रमेणादित्यस्तदाघो मलिम्लुचः अहोमः

पूर्वत्र होमाग्रायण सन्ध्योपासन पार्वणस्थालीपा

काश्वयान्यन्यानि नैमित्तिकानि द्वापयेनैवस्वायत्त इ

ति ज्ञायते यत्तु व्यासवचनं श्रौतस्मार्तक्रियायाश्च हा

© Dharmartha Trust J&K. Digitized by eGangotri

सं
म
१६४

दशीमासिकीर्तिताः त्रयोदशैतताःसर्वाराजस्याःप
रिकीर्तिताइति पत्नकाम्येष्ट्यादिविषयं जाबालिः
नित्यंनैमित्तिकंचैवश्राद्धंकुर्यान्मलिम्लुचे तिथिन
तत्रवारोक्तंकाम्यंनैवकदाचन तदुक्तं गृह्यपरि
शिष्टे श्रवणाकर्मादिमासर्वमाग्रायणंतथा मलमा
सेपि कर्तव्यं काम्याइष्टीर्विवर्जयेत् श्रवणाकर्मादिमा
अग्निहोत्रोपासनवैश्वदेवत्याः पर्वदर्शपौर्णमा
सेष्टिःपार्वणः आग्रायणंनवान्नेनक्रियमाणेष्टिः
यदिपुराणतथाप्यभावः तदासानवान्नभोजनार्थं
165 कार्या नतुनापदि तस्यानिषेधोवसन्ते प्रतन्ने
मलंवदन्तिकालस्यमासंकालविदोजनाः नेष्टेता
नविशेषेष्यामन्यत्रावश्यकाहिये: आवश्यकाद
र्शपौर्णमासादिविषयेन्यत्र विशेषेष्यांनेष्टेतना
चरेत् यस्यामन्नमासिक्रियमाणायां विशेषोना
स्ति साविशेषेष्टिः तथावसन्ते ज्योतिषा यजेते
ति वसन्तेविहितस्यज्योतिष्टोमस्यमलिम्लुचवैशा

© Dharmartha Trust J&K. Digitized by eGangotri

स्वपरित्यागेन उत्तरस्मिन्वैशाखे क्रियमाणस्य वस
न्तेएव कृतत्वान्नास्ति विधिलोपः आग्रायणमपि वि
शेषेष्टिः तस्मात्साप्युत्तरस्मिन्नेवाप्नोति यत्तु प्रवृ
द्धरेत्यादिवचनं तदापत्काले श्यामाकाग्रायणवि
षयम् मासे दर्शे चाहरहः श्राद्धदानं च हरिवासरे
गोभूतिलहिरण्यानां मासेपि स्यान्मलिम्लुचे यत्तु संव
त्सरातिरेकेण मासो यः स्यान्मलिम्लुचः तस्मिंस्त्रयोद
शे श्राद्धं न कुर्यादिन्दुसंक्षये इति ऋष्यशृंगवचनेन
दर्शश्राद्धनिषेधः सकाम्यदर्शश्राद्धविषय इति नि
र्णीयास्मते पारिजातस्तु इन्दुसंक्षये इत्ययं पाठोनयु
क्तः बहुस्मृति विरोधान्निबन्धकारैरनादृतत्वात्
तस्मात्त्रयोदशे श्राद्धं न कुर्यान्नोपतिष्ठतीत्ययं यो निब
न्धकारैरादृतः स एव युक्तः अयं च निषेधो दर्शश्राद्ध
व्यतिरिक्तविषयः अनन्तभट्टेप्येवमेव ऋष्यशृंगः
संवत्सरातिरेको वै मासश्चैवत्रयोदशः अस्तुराणांगत
मासोमौतस्मादेवविगर्हितः । तस्मात्त्रयोदशो मासो

© Dharmartha Trust J&K. Digitized by eGangotri

मं सुरसम्बन्धेन विगर्हितस्तस्मात्त्रयोदशेमासि श्राद्धं न
म कुर्यात् यतः कृतमपि नोपतिष्ठते एतच्च प्रतिसांवत्
१६५ सरिकविषयम् नकुर्यादिन्दुसंक्षये इति पाठस्तु व्या
सवचनेन विरुद्धः तथा च व्यासः तीर्थे दर्शे विशेषेण य
दा संक्रमते रविः तदा मासो न संक्रान्तो विद्वद्भिः परि
कीर्तितः सिनीवालीमतिक्रम्य यदा संक्रमते रविः
पूर्वमासं परित्यज्य शुद्धस्त्वोत्तरः स्मृतः जातकर्माणि
यच्छ्राद्धं दर्शश्राद्धं तथैव च मलमासेपि तत्कार्यं व्या
सस्य वचनं यथेत्येतेनेन्दुसंक्षये मलमासेपि श्राद्ध
165 स्य विहितत्वादिति चन्द्रसूर्योपरागे च मरणे पुत्रज
न्मनि मलमासेपि देयं स्यादक्षयकारकम् सत्य
व्रतः जातकर्मणि यच्छ्राद्धं मलमासेपि तत्स्मृतम्
प्रतिसंवत्सरं श्राद्धमिति मलमासमृतस्य पुनः म
लमासप्राप्तौ योऽब्दं काठकगृह्यपरिशिष्टे प्रेतमा
सादिमारभ्य श्राद्धपिंडोदकक्रियाः सपिंडीकर
णान्ताश्च यथाकालमुपस्थिताः अनन्यगति

© Dharmartha Trust J&K. Digitized by eGangotri

कृतेनकर्त्तव्याः सन्मलिम्लुचे वसिष्ठः असंक्रान्तेपिक
र्त्तव्यमाह्निकंप्रथमंद्विजैः तथैवमासिकंश्राद्धंसपिं
डीकरणंतथा सपिंडीकरणोत्तरकालिकमभ्युदय
श्राद्धमपिमलमासेकार्यं तथा(वा)न्तोहारीतः अपि
मासेनकर्त्तव्यंश्राद्धमभ्युदयंतथा तथैवकाम्यंय
त्कर्मवत्सरात्प्रथमादृते काम्यमपिमलमासेनार
भेत वत्सरात्प्रथमादृते प्रथमंवत्सरंविहाय मल
मासेभ्युदयश्राद्धंनकर्त्तव्यम् प्रथमेत्ववत्सरेम
लमासेप्राप्ते सपिंडीकरणंविहितं तदुत्तरदिने
यदाभ्युदयमवश्यकरणीयंप्राप्तं तन्मलमासेपि
कार्यं यथोक्तम् भ्रातावाभ्रातृपुत्रोवासपिंडः
शिष्यएववा सपिंडीकरणंकृत्वाकुर्यादाभ्युद
यं तथेति पारिजाते यमः गर्भेवावार्षिकेभृ
त्येश्राद्धकर्मणिमासिके सपिंडीकरणेनि
त्येनाधिमासंविवर्जयेत् तीर्थस्नानंजपो
होमोयवव्रीहितिलादिभिः जातकर्म्मा

© Dharmartha Trust J&K. Digitized by eGangotri

सं
म
१६६

णिनवश्राद्धंतथैवच मघात्रयोदशीश्राद्धंश्राद्धान्यपि

चषोडश चन्द्रसूर्यग्रहेस्नानंश्राद्धस्नानजपादिकम्

कार्याणिमलमासेपिनित्यंनैमित्तिकंतथा गर्भगर्भे

निमित्तंपुंसवनादिकर्माणिवार्द्धुषिके अशीतिभागो

वृद्धिःस्यादित्याद्युक्तवृद्धिग्रहणेश्राद्धकर्माणिमासिके

मावस्याश्राद्धे तीर्थस्नानंपूर्वोपक्रान्तं यवादिहोमो

नित्यहोमः जपोनित्यएव तथाकाठकगृह्यपरिशि

ष्टे मलेनन्यगतिंनित्यांकुर्यान्नैमित्तिकंक्रियाम् म

घात्रयोदशीश्राद्धंतत्सर्वत्रपरत्रच मघायुक्तायास्त्रयो

दश्या असंभवे स्मृतिचन्द्रिकायाम् योगादिकंमासि

कंचश्राद्धंचापरपात्तिकम् मन्वादिकंतैर्थिकंचकुर्या

न्मासद्वयेपिच अत्रापरपात्तिकमपि प्रतिमासंकृ

ष्णपक्षेषु विधीयमानमुच्यते नत्वाश्विनसम्बन्धि

महालयश्राद्धं तस्यद्विनकुर्याद्धानुलंघिते इति म

हालयाष्टकेतिच भृगुपरिशिष्टवाक्याभ्यांनिषेधात्

प्रथमेप्याधिकेमासिमलिनेपापसंभवे नाश्नन्तिपि

166

© Dharmartha Trust J&K. Digitized by eGangotri

ततो देवा दानारं नोपतिष्ठति तस्माद्धि वर्जयेत्सर्वं हि
तीयेकारयेत्क्रियाम् तथाच मार्तंडपादमूले विमु
श्राद्धादिकं मलमासे सत्येव तथाच ब्रह्मपुराणे मा
र्तंडमाहात्म्ये श्रीमार्तंडोदये तेत्रे समस्यां तु रवेर्दि
नं विजयासप्तमी प्रोक्ता ब्रह्मलोकनिवासिनी सू
र्यपादे वसिष्ठे तु यः श्राद्धं कुरुते पुमान् पितरो मोद
मायान्ति स च भूयो न जायते हि पंचाशत्ति वर्षाणि
गयाश्राद्धानि कुर्वतः एकाहस्तु रवितेत्रे तस्य श्राद्धं
तु तत्समं यस्तु वर्षशतं पुण्यं गयाश्राद्धं समीहते
दिनमेकं तु मार्तंडे श्राद्धं पुण्यं तु तत्समम् श्राद्धं
मार्तंडके तेत्रे भूयः श्राद्धं न गच्छति यस्तु मार्तंडना
यस्य मासे चैव त्रयोदशे मासमध्ये प्रतिदिनं तत्या
ने भोजयेद्द्विजान् गयाशतगुणं पुण्यं भवत्येव न सं
शयः सितासिताभ्यां पक्षाभ्यां यातितिथिः श्राद्धक
र्मणि तस्यां चैव रवितेत्रे मासे चैव त्रयोदशे श्राद्धं
पिंडप्रदानं तु यः कुर्यात्तिलतर्पणं गयापिंडप्रदा

© Dharmartha Trust J&K. Digitized by eGangotri

सं नस्यवाराणाश्वतत्फलं सूर्यक्षेत्रेकुरुक्षेत्रेप्रयागे
म मर्त्यालभन्ति तत्कालफलमेवनसंशयः सोम
१६७ वारेत्वमावस्यारविवारेतुसप्तमी तत्रमलिम्लुचेमासि
सूर्यक्षेत्रेपितॄन्यजेत् अक्षय्यंचाप्यनन्तंचश्राद्धोदकं
जपोहुतम् अथमिरणासपिंडानांपतितव्रतिनांत
था श्राद्धंपिंडप्रदानंत त्प्ताःप्रीतामोदमा
नाः पितरोयान्तिवैदिवम् येषांश्राद्धविरोधोस्ति
पतितानांविशेषतः सूर्यक्षेत्रेकृतंतेषांश्राद्धमक्षय
तांव्रजेत् गयायांभास्करक्षेत्रेपितृमातृगुरुक्षये
मधुमत्यांचयज्ञेचवपनंसमस्तुस्मृतं मासमध्येच
167 तदिने यत्कालंभोजयेद्द्विजान् द्वादशीसात्तवि
ज्ञेयागयाशतगुणंफलम् मार्तंडपादमूलेवा
गयाकूपेस्ववंधुभिः अपिंडानामदग्धानांपतित
व्रतिनांतथा श्राद्धंपिंडप्रदानंचनैवकुर्यादितिश्रु
तिः कुरुक्षेत्रेप्रयागेवाहरद्वारेतथैवच मार्तंडपा
दमूलेवाश्राद्धंहरिहरौस्मरेत् भास्करेथसरस्वत्यां

© Dharmartha Trust J&K. Digitized by eGangotri

गंगायमुनसंगमे मानसे दैवकी ग्राह्या पैतृकी सि
द्धिदा भवेत् ॥ इति मार्तण्डमाहात्म्यम् ॥
अथायं समुदायार्थः ये पतिताश्रद्दशपादयः तेषां
मलिम्लुचे मासि मार्तण्डपादमूले नारायणबलिं
कृत्वा श्राद्धं कार्यं शुक्लपक्षद्वादश्यां तस्य कर्तव्य
तासिद्धा सा चैत्रशुक्लपक्षे द्वादशी स्याद्धा नवा प
त्वसर्वेष्वेव तिथिषु प्रतिपादिषु कर्तव्यम् तथा चा
त्रैवोक्तं मासमध्ये यत्र दिने इत्यादि अथ चात्र य
त्सितासिताभ्यां पक्षाभ्यामिति तथाह श्राद्धकर्त
व्यं तत्पूर्वाह्णव्यापिन्यां तिथावपराह्णव्यापि
न्यां इति दैवकी ग्राह्या पैतृकी सिद्धिदा भवेदिति
वचनादिष्टं अथैवातीतवर्तमानद्वादश्याद्युच्चार
विचारो लेख्यः अथ मलमासे वर्ज्यानि ॥

अथ द्वादशीसम्प्रदायः ॥

ॐ तत्सत् ॐ बालाग्रमात्रमपि यत्करुणांशभा
स वाचस्पतेः पदमुपैत्यपि बालिशः सन् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मं वाल्लभ्यमात्रमूलभा इदमाहात्म्यं तेवीणीश्वरीचर
म॰ णरेणउकरणाजयन्ति अथमलमासमम्प्रदायप्र
१६८ काश प्रसंगेन मार्तण्डमाहात्म्योपवृंहितं विस्तुब
लिपूर्वकं पातकिविमोचकं प्रेतक्रियाक्रमसंप्र
दायकं प्रकाशयामः इदं हि नारायणबलिर्नाम
प्रायश्चित्तक्रियाविशेषः सर्वजगत्प्रकाशो हि वि
थः एकोवतिमवगेतमायादैस्तदर्थमव पोकर
णीयः अपवो दाहोदकदानाद्यनर्हाणां महापात
किनां तत्संसर्गपातकिनां कृतदाहादीनां क्रियार्हता
168 सम्पादकः तत्राद्यस्तावत्प्रकाश्यते देवस्वामी
नजर्यात्कृतकं भित्तोः श्राद्धं पिंडोदकक्रियां तत्कं
संन्यासयोगेन गृहधर्मादिकं व्रतम् गोत्रादिचरणं
सर्वं पितृमातृकुलं यतं दत्तात्रेयः अहन्येकादशे
प्राप्ते पार्वणं तु विधीयते सपिंडीकरणं तस्य न क
र्तव्यं सुतेनवै त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते
एकोद्दिष्टं न कर्तव्यं सन्न्यस्तानां कदाचन ॥

© Dharmartha Trust J&K. Digitized by eGangotri

नारायणबलिश्चाम्यकर्तव्योद्वादशेहनि तंचसपवा
द्र कृत्वाविष्णोर्महापूजांपायसंचनिवेदयेत् अष्टोत्त
रात्तरच्छेषंव्याहृतीभिःसमाहितः यतीन्दहस्यान्त्वा
हूत्वाभिमन्त्र्यद्वादशावरान् अभ्यर्च्यगन्धपुष्पाद्यैर्म
न्त्रैःद्वादशनामभिः सम्पूज्यहव्येनान्नेनदत्तिरांत्तनि
वेदयेत् विष्णुवाक्यमाहव्यासः नामगोत्रग्रहंतत्रप
श्चैरभ्यचनंतथा सतंसंकीर्त्यमनसागोत्रपूर्वमतःपरं
दीपपुष्पप्रदानंचभक्ष्यंभोज्यंतथापरम् विष्णुर्नामगट
ह्रीत्वावैतर्पयेद्वादशाग्रजान् विप्रानाचम्यसम्यक्दक्षि
णाभिःसमर्चयेत् हिरण्यंपत्नप्रदानवंदत्तिरणार्थ्यथा
विधि इत्यात्रेयः त्रयोदश्यांद्विजश्रेष्ठमात्मसंज्ञंयतेद्वि
यः विष्णुंयथातथाभ्यर्च्यपाद्यार्घ्यैर्विधिनाततः दद्या
त्स्वरूपसत्केनपुष्पद्व्यादिकाःक्रमात् वस्त्रालंकारवा
ह्यानि यथाशक्तिप्रदापयेत् उच्छिष्टसन्निधौतस्यदर्भा
नास्तीर्यभूतले भूर्भुवस्स्वःस्वधायुक्तेसम्यग्दद्याद्धलिंच
यं एवंयःकुरुतेविद्वान्नारायणबलिंद्विजः विष्णुलो
कमवाप्नोतिपुरुषोनात्रसंशयः अथमेथम

© Dharmartha Trust J&K. Digitized by eGangotri

169

© Dharmartha Trust J&K. Digitized by eGangotri

द्वितीयेपि द्विविधे तावघोवाह्योदकदानाद्य नर्हा
णांतदर्हत्व प्रतिपादकःसयथा पतितानांनदाह
स्यान्नान्त्येष्टिःनास्थिसंचयः नास्रुपातोनचाशौचं न
चपिंडादिकाःक्रिया इत्यादि स्मृति प्रामाण्याद्ब्रह्म
पुराणे मार्तण्डमाहात्म्यसंगृहीतानां पतितानां
दाहाद्यनर्हाणां यादेवशुध्यतिप्रेतोनारायणबलौ
कृते तदैवपापनिर्मुक्तःक्रियार्हेजायतेनरः कृ
ध्वंसंवत्सरात्कुर्यात्सर्वमेवौर्ध्वदैहिकमिति तस्मय
पि प्रा नन्त्याकुलधर्मीणां पुंसांचैवायुषः तथा
त् नारायणबलिःकार्योलोकगर्हाभयान्नरैः तत
स्तेभ्योपिदातव्यमन्नमेवंसदक्षिणमित्याद्यवेत
या संवत्सरादर्वागपि तत्पापानुसारेणाद्विगुण
त्रिकं प्रायश्चित्तंकृत्वौर्ध्वदैहिकंकार्यमिति पारिजा
तस्मरणात् अशौचकालापगमानन्तरंक्रियते
तथाच षाड्विंशत्मतम् अर्वाक्संवत्सरात्कुर्याद्द
हनादियथोदितं प्रायश्चित्तंचरित्वादौविप्राणाम

© Dharmartha Trust J&K. Digitized by eGangotri

सं तुगमनात् प्रायश्चित्तं तु आत्मघातविशुद्ध्यर्थं चरे
म च्चान्द्रायणद्वयं तप्तकृच्छ्रचतुष्कं च त्रिंशत्कृच्छ्राणि
१७० वा पुनः षट्त्रिंशन्मते कृत्वा कृच्छ्रादिकं पूर्वं क्रियाम
अथ यथाविधि नारायणबलिं कृत्वा ततःशुध्यन्तिक
र्मणि पतन्मृतानां पितृणां मध्ये पुत्रैः कर्तव्यमिति
तथा चैतत्प्रत्याम्नाया अपि कृच्छ्रोयुतं च गायत्र्या
द्वादश ब्रह्मभोजनं तिलहोमसहस्रं च वेदाध्यय
नमेव चेत्यादि पारिजाते अत एव विष्णुबलिना
म्नोपुरवात्प्रायश्चित्तान्यारोत दैवैकभक्तोपवास
170 प्रायश्चित्तेति दिनत्रये शिष्टैरनुष्ठीयन्ते अत्र तद्दिनमा
सादिषु दिनैर्विवरणीया यदुक्तं अप्रतस्यावसंस्का
रे दिनं नैव विशोधयेत् अशौचमध्ये क्रियते पुनः
संस्कारकर्म चेत् शोधनीयं दिनं नात्र यथासंभव
मेव तु यदा तु संसर्गपातकिनि कृतदाहादावपि
प्रायश्चित्तार्थं विष्णुबलिर्वर्षाद्ध्वं यत्र कापि क्रिय
ते तत्र अशौचविनिर्मोक्तु पुनः संक्रियते मतः

© Dharmartha Trust J&K. Digitized by eGangotri

संशोध्यैव दिनं ग्राह्यमूर्ध्वं संवत्सराद्यदि संवत्सराद्
ध्वं प्रेतकार्ये उत्तरायणः कालः श्रेयान् तत्रापि शु-
क्लपक्षः तत्रापि दिनत्रयं नन्दांत्रयोदशींचतुर्दशीं
चवर्जयेत् शुक्रशनैश्चररविवासरा वर्ज्याः पातपरि
घभद्रावैधृतिश्च वर्जयेत् नक्षत्रेषु भरणी कृत्तिका
र्द्राश्लेषामघाधनिष्ठापंचकं चातिदुष्टानि स्वातीह-
स्ताश्विनीपुष्यश्रवणेभ्योन्यन्नक्षत्रं न ग्राह्यम् तत्रापि
कर्तुर्जन्मनक्षत्रं प्रत्यरं चतुर्थाष्टमद्वादशचंद्रांश्च वर्जये
त् अस्य सर्वस्यापवादः युगमन्वादिसंक्रान्तिदर्शे
प्रेतक्रियायदि तेष्वेवापतिता तत्र न नक्षत्रादिनशोध
येत् इत्येवं निर्णयास्ततादौ दर्शनाद्दिनवारमासप
क्ष—शुद्धिमवेक्ष्य विषाणुश्राद्धं यदा कुर्यात्तदा कुर्वी
त वत्सरम् द्वादशाहानि वा कुर्याद्व्यहमेकाहमेव वेति
विकल्पदर्शनात् उक्तातिथिपरीक्षेयं नक्षत्रशुश्रवस
ते श्रवणं तिष्योमृगशीर्षं प्रजापतिः हस्तः शतभि
षक्स्वातिश्चित्रापित्र्यमथाश्विनम् नक्षत्राणि प्रश

© Dharmartha Trust J&K. Digitized by eGangotri

सं स्नानिसदैवतानिपैतृके अपराणिषट्दाणिश्रो
म घंतेकारणैःक्वचित् अपराणीयनिष्ठादीनि कार
१७१ णैर्माघपंचदशीयोगादिभिःशस्तानि वर्ज्यान्याह
गार्ग्यः नन्दायांभार्गवदिनेत्रयोदश्यांत्रिजन्मनि पुत्र
श्राद्धंनकुर्वीतगृही पुत्रधनक्षयादिति त्रिजन्मज
न्मदिनं जन्मर्क्षं जन्मताराच तथा भानौभौमेत्रयो
दश्यांनन्दासुचमघासुच पिंडदानंमृदास्नानं
नकुर्यात्तिलतर्पणं वृद्धगार्ग्यः प्राजापत्येचपित्र्य
त्रैपौष्णेचभार्गवेतथा यस्तुश्राद्धंप्रकुर्वीततस्यपु
त्रोविनश्यति प्राजापत्यंरोहिणीपौष्णं रेवती पि
त्र्यंमघा तथा भरणीकृत्तिकाचैव सर्पंचैववि
वर्जयेत् महाभारते नत्तेचनकुर्वीतयस्मिंजातोभ
वेन्नरः नप्रोष्ठपदयोःकार्यंनचाग्नेयेचभारत दारु
णेष्वथसर्वेषुप्रत्यरंचविवर्जयेत् आग्नेयं कृत्तिका
दारुणानि आर्द्राश्लेषाज्येष्ठामूलानि जन्मताराप्र
थमंचतुर्दशं त्रयोविंशांशाप्रत्यरम् ॥

171

© Dharmartha Trust J&K. Digitized by eGangotri

ज्यातिषेमनुष्याणांप्रेतक्रिया कथंचिद्विप्रकृष्टेयम
न्नधिष्ण्येच साधारणांकृत्तिकाविशाखाच उत्तरा
त्रयंरोहिणीचध्रुवाणि पूर्वात्रयंभरणी मघाचो
ग्राणि मैत्रमनूराधा विप्रकृष्टंत्रिपान्नक्षत्रभद्रातिथि
गुरुशनिभौमवारयोगः यमनधिष्ण्यमश्विनी प
वमन्यान्यपिविहितानिषिद्धानि · · · ·
वगन्तव्यानि येषुनविधिर्नप्रतिषेधस्तान्यपिविहि
ताभावे ग्राह्याणि ॥

कृष्णपक्षेद्वादश्यामेकभक्तंत्रयोदश्यामुपवासं
चतुर्दश्यांप्रायश्चित्तंहोमादिकृत्वादर्शेविधाउक्रिया
ततःशुक्लप्रतिपदमारभ्य द्वादशीतावत्प्रारंभका
लीनमासापेक्षयातीतमासाधिपतीनांनामद्वाद
शकेन प्रतिमासंभिन्नानांविष्णुब्रह्मशिवयमानां
मतष्टपृथ्वीजलवह्निवायुरूपाणांप्रेतात्माकाशरूप
स्य विष्णुचेति भूतपंचकस्यकालोग्निःकर्मस्रष्टा
शुभमेतानंनतपोजलम् पक्ष्मानापोनिराहाराश्रमी

© Dharmartha Trust J&K. Digitized by eGangotri

सं
म
१७२

शुद्धि हेतवइत्यादि स्मृत्सवेलगाः श्रोप्यशोधनका
रणतया कारणसंज्ञकस्यैकांशादिनं तावदेकैके
ननाम्ना द्वादशोत्तद्दिने वर्तमानमासाधिपतेरेकै
स्य नारायणादेः कारणपंचकस्यनाम्ना तथैव
मलिम्लुचस्तथाचान्तेस्याप्योयत्साधप्रकाये ब्र
ह्मादिभिर्वरोदत्तस्तत्पतेर्नरकद्विष इतिब्रह्मपु
राणप्रामाण्यात् एतस्य पातकिशोधनकर्म
णोवश्यापेक्षणीयस्य मलिम्लुचस्य कालस्यह
रतरत्वेन प्रत्यवेक्षणामहत्वात् मुख्यकालेयदा
वश्यंकर्म कर्तुंनशक्यते गौणकालेपिकर्तव्यं
गौणेप्यश्रेष्ठोभवेदिति स्मरणात् स्वकाला
दुत्तरोगौणः कालः सर्वस्यकर्मणः यद्वा गार्मि
क्रियाप्रव्यंकालस्याप्यन्तरालवत् गौणकालव
स्मिंश्चतिकेचित्साक्षतनकर्मणीत्यवेत्तया प्रेतैकोद्दिष्टषो
डशापिंडदानी यद्वा दशाह क्रमवत्प्रतिनिधीकृत्या
दीनाकृष्टस्याधि पतेर्नरकारेरेकस्यैवस्वाधिकारवते
तकारणपंचकवृपतयास्थितस्य.

172

© Dharmartha Trust J&K. Digitized by eGangotri

पूजाहोमव्रतस्मरणभोजनबलिदानाख्यपिंडदानादिक्रि
यते तदेवंकृते विष्णुबलिनाग्निप्रायश्चित्ते यदेवश्रूय
ति प्रेतोनारायणवलोकृते तदैवपापनिर्मुक्तःक्रि
यार्होजायतेततः साग्निकस्तुयतोविप्रोचंडालेनात्म
घातकः दग्धेतंब्राह्मणंविप्रोलोकाग्नौमन्त्रवर्जितम्
क्षपास्थीनिदग्ध्वातत्क्षीरेणक्षालयेत्ततः प्रायश्चित्तं
चरेत्पश्चाद्दिब्राह्मणमनुशासनात् श्रौताग्निनाथविधि
वक्रियाकार्यातत:परं प्रस्थामलाभे अकृतदाहस्य
वाकुर्याद्दर्भमयंप्रेतं दर्भैस्त्रिशतषष्टिकैः पलाशैर्वा
समिद्भिर्वासर्वमेवंप्रकीर्तितमित्यादिस्मृति प्रमाणा
नुसारेणाविहितदाहस्य विधिपूर्वकंपर्णपुरुषदाह
दाहंत्रयोदशोक्रियाकृत्वा कृतदाहस्य दाहंविनैववाय
णा यथस्थाने योददातिक्रियापिंडंतस्मैप्रेतायवै
सतः तस्यैवाशौचमुद्दिष्टंत्र्यहमेवनसंशयः विधाउ
श्राद्धसमाप्तौतत्रयोदशपादिनत्रयं आशौचंपिंड
दःकुर्यात्ततदन्यगोत्रजा इतिस्मरणात् अदाहशौ

सं चक्रमेण दिनत्रये शुक्लत्रयोदशी चतुर्दशी पूर्णिमा
म सु क्रियापिंडदशाकं नवश्राद्धैः सह चतुर्थे तत्कृ
१२१ ष्णप्रतिपदि ऊर्ध्वदैहिकादि पंचमे कृष्णद्वितीयस्यां
सपिंडीकरणमिति द्वादशाहक्रमः ति: दिनेचेत्
षष्ठ्यामेकभक्तं सप्तम्यामुपवासमष्टम्यां प्रायश्चित्त·
होमादि कृत्वा नवम्यां दशाविष्णुक्रिया दशम्यां
चतुर्मासाधिमान्विष्णवादीनेकादश्यामपि चतु
रो द्वादश्यां तु पंच पूजयित्वा पूर्ववत्त्रयोदश्यादौ श्र
द्धांशे चक्रमेण प्रेतक्रियादिकं प्रकारयेत् पूर्वव
173 त्क्रमेण प्रायश्चित्तहोमादि कृत्वा द्वादश्यामेव
सर्वेषां विष्णुब्रह्मादीनां कारणानां पूजा ततः पू
र्ववत्त्रयोदश्यादि कृष्णपक्षद्वितीयान्तं प्रेतक्रियादि
विधिः यदि तु सांतात्यविशेषमलमासपर्यायेवि
धिरावश्यकतया प्राप्तः तर्हि श्राद्धकर्ता चेदसंक्रान्ति
के मलिम्लुचतयाहीनस्यदर्शादर्शमिति गणनया
कालक्रमस्य स्थित्या प्रागुक्तयुक्त्यैव यथायथम्

© Dharmartha Trust J&K. Digitized by eGangotri

द्वादशाह सद्यैकाह क्रमोनिःशंकएव यदितुषडगत
न्तागते मलिम्लुचत्वमानीश्राद्धकर्ता तर्हि तत्रानियाम
कत्वेन मासपक्षतिथि वेलानियमसत्त्वाभावाद्विकल्पः
तथाहि कृष्णपक्षे चेन्मलिम्लुचप्रवेशस्तदा सर्वपक्षे
प्रोक्तः क्रमः क्रियाकालस्यात्रस्थितिस्सुलभत्वात्
यदितुशुक्लप्रतिपदिप्रवेशस्तदापि प्रतिपदादितो
द्वादशान्तं विषाउबलिं यथायथं द्वादशाहादिक्रमेण
कृत्वा भावितिथिष्वपि मलिम्लुचसत्तयैव प्रेतक्रिया
दिक्रमःस्वस्थः द्वितीयादिषुदशम्यन्तासुन्नतिथिषु
यथायथं मलविहारस्तु द्वादशी तावद्द्वादशासंख्या
या अपकृष्टत्वाद्दशम्यादित्रयएवविषाउबलिंकृत्वा
त्रापि प्रेतक्रियास्वस्थैव एकादशीद्वादशीवायदि
मलिम्लुचविहा तत्रत्रित्वसंख्यायाअप्यपकृष्टत्वादेका
दृ एवतत्तु यत्रदशम्यादिषु विहारस्तुविषुबलि निर्दे
शास्तत्कथंतत्पूर्वकालीनास्तुतिथिषुमलसत्ताद्दीना
स्तुविषाउक्रियादिः पूर्वपूर्वतरोविधिक्रमः उच्यते

© Dharmartha Trust J&K. Digitized by eGangotri

सं क्वचित्प्रधानमिवाङ्गान्यपि स्वेस्वेमुख्यकालेऽपवानु
म. ष्ठीयन्ते क्वचित्तु प्रधानस्यैव कालापेक्षया तत्पूर्वोत्त
१७४ रकालयोर्यथा यथमंगान्यनुष्ठीयन्ते न तु स्वविहि
ते काले यथा दशम्यादिकमेकादशीकालापेक्षये
ति तथा चोक्तं प्रधानसचिवान्यंगानि भवन्ति न
भवन्ति चेति सचिवानि सदृशानि अनेनैव न्याये
न मलिम्लुच विद्धायां कर्मकाले द्वादश्योपलब्धायां
तदपेक्षयैव पूर्वपूर्वतरादीनां तिथीनां शुद्धानां
कर्मकाले ग्रहणमिति सुस्थं अनेनैवाभिप्रायेण
174 माधवः अन्यांगस्यैकभक्तादेः कालस्त्वंगमनुसार
त इति न तु सर्वेष्वेतेषु पदेषु तीतचोणकालवी
स्मरणयाऽमुकमासामुकपक्षामुकतिथौ चैत्रशु
क्लद्वादशीभूते वैशाखशुक्लद्वादशीभूत इत्येवं
शुद्धामेवातीतानां द्वादशीनां संकल्पकरणश्रुतेः
मलमासाख्याकृष्येपि कथं न तथैवारंभ इत्यतः स
र्वत्र वर्तमानाया उत्तरकालेवर्षंप्रग्राह्यायां मलिम्लुच
द्वादश्याः

© Dharmartha Trust J&K. Digitized by eGangotri

समाद्द्वादशाहविधिरेवास्तु किमिति व्यर्थैकाहसंको
चः सत्यं श्रुत्योवायं विधिक्रमोनिर्विवादः तथापि
शिष्टैः मलमासात्मार्तंडतेत्राष्ट्रान्यदेशकालयोः
प्रांरभे मासपक्षतिथिशुद्धीनामवश्यदर्शनीयतः
याशायशोत्राल्पकालतान्नदलाभादेवनाङ्गुष्ठितश्शति
सिद्धम् श्रीः यदात्वशुक्लत्रयोदशपादौमलप्रवेशा
त्तदाशातीता याद्वादशपामलिम्लुचासमाडमरशुक्ला
पत्तायेतथै वेदंकर्मशाममू तदत्र द्वादशाहक्रमो
नसंभवति यतोमलिम्लुचसमायामेव द्वादशाहक्रो
मेण द्वादशपन्नं विषाडवलोकृतेपि त्रयोदशपामल
मासेनिर्गते कथंप्रेतक्रियादि सपिंडान्तस्य पि
त्र्यस्य कर्मणोमलिम्लुचसमायामेवावश्यकरणी
यस्स मलमासोत्तरकालेनिर्वाहः नचवाच्यं विम्लु
वलावेवदैवेकर्माणि मलमासोपेतरणीयः नत्वपि
त्र्ये प्रेतकर्मणीतितदिदं वैगुण्यावहमुपहासास्प
दंच तथाहि नतावदत्र प्रथममासीयकृष्णाद्वादशे

© Dharmartha Trust J&K. Digitized by eGangotri

सं म १७५

कभक्त्यादिवद्विषयउवलो प्रेतकर्मणोस्याङ्गत्वं नवा
विषयउवलत्वङ्गित्वं केनचिद्वचनेन सिद्धं येनास्यैत
त्कालापेक्षयैव प्रागुक्तन्यायेन कर्त्तव्यता स्यात्
किंत्वत्र प्रेतकर्मणोदाह्यादेरेव प्राधान्येन तदर्थं
प्रवृत्तेरङ्गित्वं विषयउवलेस्तु विवाहादिवनान्दी
श्राद्धस्याह्यादेस्तत्सर्वकालेयत्रक्वचन तदर्थं क्रिय
माणत्वादप्राधान्येन प्रायश्चित्तरूपतयाङ्गत्वमे
व प्रसिद्धम् तथाचोक्तम् अपिंडानामदग्धानां प
तितव्रतिनां तथा श्राद्धं पिंडप्रदानं चैनैव कुर्यादि
ति स्मृतिः तेषां मलिम्लुचे मासि सर्वं तेत्र प्रयत्नतः
सितासिताभ्यां पक्षाभ्यां यस्तिथिः श्राद्धकर्मणि
तस्मिन्नासिप्रवृत्ते त्रेमासे चैव त्रयोदशे श्राद्धं
पिंडप्रदानं च कुर्यान्मातापितादयोः अस्यार्थः
पतितानां न दाहोस्तीत्यादि स्मृत्यपेक्षया येषां दाहोद
कदानाद्यनर्हास्तेषां मृतं संवत्सरात्कुर्यादित्यादि वच
नप्रामाण्येन द्वादशेतीते त्रयोदशसंख्ये मासे प्राप्ते
तत्रैव तदुत्तरं वा यत्र क्वापि मलमाससमायां जातायां

175

© Dharmartha Trust J&K. Digitized by eGangotri

मार्न्नोऽस्तेऽर्श्राद्धं कुर्यात् सितासिताभ्यामित्यादि
तुसिततिथौ विष्णुबलिः पूर्वं प्रसिततिथौ दर्शित
सूर्यबलिक्रमेणेत्यर्थः तथा च कर्मविपाकादौ य
त्र क्वचन यस्यैवैवं श्राद्धस्य प्रायश्चित्ताङ्गत्वमेव तथा
हि एवं पूर्वोक्तप्रकारेण पर्षदमुपस्थाय पर्षद्
पदिष्टं व्रतं मनसि निधाय प्रायश्चित्तोपक्रमं कुर्वी
त तद्यथा दिनान्तेन रवेर्गमाणि वा पयित्वेत्यादि
सम्ममेतद्रंगे दाहं विना तु कथं पिंडदानमित्याह
नारायणबलिं कृत्वा पृथगेनं पुनः दहेत् श्रोत्रा
ग्निना तु विधिवत् क्रिया कार्या ततः परम् यदैव पुत्र
ति प्रेतो नारायणबलिं कृते तदैव पापनिर्मुक्तः
क्रियार्हो जायते नरः नारायणं समुद्दिश्य शिवं वा
यत्प्रदीयते तस्य शुद्धावहं चैव तदक्षयं तदन्यथा
ये केचिन्मानुषे लोके लुप्तपिंडोदकक्रियाः तेषां च
दग्धेदत्तेन पिंडेनास्तु दिवाकर पराप्रिप परं सौख्यं
स्वर्गप्राप्तिर्न संशयः इति ब्रह्माण्डादिभ्यः प्रायेण नर

© Dharmartha Trust J&K. Digitized by eGangotri

सं
म
१२६

कादि मार्तंडनामो ब्रह्मविष्णुशिवयमात्मतेजः स
मुदायीभूतस्य मलिम्लुचाधिपतेर्वरेण सिद्धमेवेदाय
था मार्तंडाख्ये देशविशेषे मलिम्लुचनाम्नः काल
विशेषस्य प्रभेभो सत्सं पतितानां नारायणबलिना
मकं प्रायश्चित्तं कृत्वा दाहोदकदानादि प्रेतकर्मका
र्यमिति प्रेतकर्मणाप्येवेत्थमवश्यकर्तव्यतया प्रथा
त्येनाङ्गित्वं विष्णुबलेस्तु तदर्हत्वसम्पादनद्वाराङ्ग
त्वमेव सर्वत्र श्रुतिस्मृति प्रसिद्धम् तथा च श्रुतिः
यत्षोडशात्त्यजते द्वात्रिंशात्सर्गं मासीदिह्वागार्ह
पत्यं प्रीणाति तेनत्रयोदशमासाः सम्पद्यन्ते तेन
पितरः प्रीणंति तस्मात्त्रयोदशमासः संवत्सरः सं
वत्सरस्यात्थिमप्यव मलिम्लुच इति अस्यायां मार्तंडो
नामाधिपः कथमधिपोस्य ब्रह्माहतो नर्षिपुत्रेणाय
दामहर्षेर्वतत्वमादाच्छापमुक्तिर्मे सम्पद्यन्ति तदाहं
सर्वेषां पतितादीनां मुक्तिकरो भवामि इति वरं ददि अ
त्रापि पतितादत्पगर्भस्त्रावगता व्रतापिराडानाम्

176

© Dharmartha Trust J&K. Digitized by eGangotri

गोत्रसंकरजातानांक्लीवश्चित्रमपः सादिकोऽहिदूषत्नी
पतीनांमातापितृदेवराजर्षिगुर्वाचार्यब्राह्मणतप
स्विशापदग्धानां प्रस्मिन्नेतेषांयद्दीयते तत्सीरण
ति नान्यत्कर्मेति सोमावलीनामोपनिषदि ॥
तथाच मार्तंडमाहात्म्यमपि ब्रह्मपुराणीयम
त्रदृष्टम् नववाच्यम् पतितानां मार्तंडमलिम्नु
चयोर्देशकालयोर्विषये त्वमिदं यच्छ्राद्धं तदिदं
विषाउश्राद्धमेवविषाउवलिनामकंसिद्धंकर्म प
तावतैव तेषांशुक्तिसिद्धेः यत्तुतदुनरकालिकं
दाहादि सपिंडीकरणान्तं तदत्रप्रासंगिकंलोकग
र्होविनिर्हृतिमात्रफलमिति किंचकालान्वेषणेन
नैतत् निरूपितंह्येतच्छतशः श्रावश्यकरणीयस
दाहाद्यनर्हाणादाहादेः पितृकर्मणः सम्बन्धि त
दर्हत्वसम्पादनद्वारास्यविषाउवलिनाम्नोऽङ्गत्वमिति
विषाउश्राद्धमितितच्छ्राद्धशब्देन पिंडदान शब्देनवायो
त्रपितृत्वभ्रमः तन्नेदंविचार्यम् पितृस्यश्राद्धस्ययोऽवि

© Dharmartha Trust J&K. Digitized by eGangotri

सं पिः प्राचीनावीतित्वादिवादर्शोदकादिवा तन्नहि विम

म न्नगणेवा किमत्र लेशतोस्यतीति यश्च पिंडश्राद्धेश्व

१७७ मः मसत्यासि विम्रुवल्लोबलित्रयमिति कथनेनै

वगतार्थः नचायं कश्चिदन्यएवश्राद्धभेदः नित्यनै

मित्तिकंकाम्यंवृद्धिश्राद्धंसपिंडनमित्यादिषु स्मृति

प्रसिद्धेषु श्राद्धभेदेष्वेतल्लक्षणानामदर्शनात् अ

थच यदि ब्रवीषि यथा मलिम्लुचं विनैव यत्रक्व

चनदेशे मासेवैतत्कर्मक्रियते तथात्रापि मलिम्लु

चं विनैव क्रियमाणेकाहानिरिति तर्हिप्रागुक्त

177 मपि पुनःश्रूयतामत्रेदं वैगुण्यमुपहासस्य यत्र

ह्रियति तदायादोल्लोकगर्हाभयात्तो निजसंभो

जनादिसंव्यवहारेष्वयावयुषः तात्त्विकतयावा

तत्कालमेवपितृणामुद्दिधीर्षुः संवत्सरादर्वाग

वपुत्रार्थं यत्रक्वापिकुरुते तत्रापि गौणकाल·

स्वीकारेणैतत्कर्माधिकारसम्पन्नयेवमयम्

मलिम्लुच श्राद्धमुच्यन्तेएव ॥

इष्टत्वतस्य साक्षादेव प्राप्तस्य तदनावश्यपके कर्मणि
विधातुत्वलौल्यथातिपातः तस्यगतवर्षसाध्यत्वात् स
लिङ्गचाधिकारैक साध्यत्वात्तितश्चेत दाक्षाद्दावाव
श्यकेत्वनापेक्षणमित्यपहासः वैगुण्यंपतत्वलौगादिश
त्व गणितात्ज्ञायते कालःकालेतिष्ठन्तिदेवताः वर्वं
त्वेकाह्नतिः कालेनाकालेलक्ष्यकोटयः तथाच मु
ख्यगौणकालविचारे मुख्यकालेहिमुख्यंचेत्साधनंनै
वलभ्यते तत्कालद्वययोःकस्यमुख्यता गौणतापि
वेति प्रश्ने मुख्यकालमुपाश्रित्य गौणंमुख्येत्वसाधनं
इत्यादिमुख्यलोभान्नगौणकालप्रतीक्षणमिति काले
हि कर्मविधीयतेनकर्मणिकालः यत्त्वेच्छाविनि
योगार्ह तदुपादेयं यदुपादेयं तद्विधेयं कालश्च
स्वेच्छयाकर्तुंनशक्यः अतस्त्वानुपादेयपंचकमध्ये
मीमांसकैःकालःपरिगणितः अतःकालाधिकारे
णकर्मकर्तव्यं नतुकर्माधिकारेण कालः तथाच
कालोनिमित्तंनिमित्तभूतकालाभावेपि काराभावा

© Dharmartha Trust J&K. Digitized by eGangotri

सं त्कालान्तरे कृतं कर्माकृतमेवेत्यतो वचनमन्तरेण सं
म वत्सरर्तुमासतिथ्यादिकालविशेषविहितानि कर्मा
१७८ णि स्वकालातिक्रमेण कर्तुं न युज्यन्ते अपि तु तदति
क्रमे प्रायश्चित्तमेवेति पारिजाते एतदेवापरार्केऽपि
तत्कालोऽत्र मत उपादेय इति स्वरूपेणो वाधिकारहेतुः
न हि कालान्तरे वर्तमानः कर्ताऽनुभूतकालान्तरे विही
तं कर्म शक्नुयात्कर्तुं किं तु तत्काल एवेति अतः का
लस्याधिकारहेतुत्वमिति नन्वस्त्वेवं तथापि मलिम्लुच
सन्नैकसम्पाद्यदाहादिसपिंडनान्तप्रेतक्रियान्तरा येन
द्वादशपक्षसमाप्तो विप्लवेऽलिकमध्ये त्वङ्गीक्रियते त
र्हि द्वादशीपूर्वदिनेषु द्वादश्या अलाभात्कथं मलि
म्लुच द्वादश्यधिकार सन्नैकसम्पाद्यस्य विषयत्वेः
सिद्धिः उच्यते एतादृशाशंकामहार्णवे एवमासम
ध्येयत्र दिने यत्कालं भोजयेद्द्विजान् द्वादशीमात्र
विज्ञेया गयाश्रात्तगुणं फलमिति ॥

178

© Dharmartha Trust J&K. Digitized by eGangotri

वचनं स्खलितार्थं नतस्मास्मादेववचनाद्यत्नक्वापि
तिथौ द्वादशाब्दे सिद्धेनकाचिद्विप्रतिपत्तिः नोवा
त्वदभिमतेपिपक्षे कथं प्रतिपदादिषु द्वादशीत्व
सिद्धिः कथंवाकर्मनिर्वाहः इतिनकिंचिदनिष्टम्
अथैवंश्रुतिस्मृतिपुराणोक्तियुक्तिमपेक्ष्य पुनर
पि मदैकमूलभावहठादेवमेव प्रलपसि यथान्य
मासेषु विषाउवलिपूर्वकं प्रेतकर्मक्रियते तथा
स्मिन्नपिमासे भाद्रपदसंकल्पे नैवकुर्याद्धर्मः
नतुमलिम्लुचमत्वासत्वविचारेण तत्सत्वगणि
तागतं मलिम्लुचत्वंनोवेति नास्तिचेत्कथमत्रजग
त्प्रकाशेपलापः अस्तिचेत्तथापिभवदुक्तिर्वैभवा
दत्रकर्मणायतमास्तु अथानंयज्ञकर्माणिप्रायश्चि
त्तव्रतानिच नकुर्यान्मलमासेतुमहादानव्रतानि
च श्रौतस्मार्तक्रियाःसर्वाद्वादशेमासिकीर्तिताः त्र
योदशेतुताःसर्वानिष्फलाइतिकीर्तिताः तस्मात्त्र
योदशेनैतत्कुर्यान्नत्रकथंचन कुर्वन्ननर्थमेवाप्नु

© Dharmartha Trust J&K. Digitized by eGangotri

सं
मं
१८

ऊर्यादात्मविनाशनम् नह्येतावविशेषेज्यामन्यत्रा
वश्यकाह्रियैरित्यादिवचनैः भवन्मतेनास्मिन्मलमा
सेनावश्यकस्या कर्मणोविशेषेज्याद्रूपस्यनिवृत्ति
रेव प्रसज्यतेवाकृतेपिकाचिदनिष्टापत्तिरेवेतिकृ
तंप्रसक्तानुप्रसक्तिकया देवानांप्रियेण इतिहाद
शीसम्प्रदायः ॥ प्रथममलमासेवर्ज्यानि ॥
काठकपरिशिष्टे सोमयागादिकर्माणिनित्यान्य
पि मलिम्लुचे तथैवाग्रायणादानचातुर्मास्यादि
कान्यपि महालयाष्टकाश्राद्धोपाकर्मण्यपिकर्मय
त् स्पष्टमासविशेषाख्याविहितंवर्जयेन्मले महा

179

लयोभाद्रपदापरपक्षः स्पष्टमासेति वैशाखेक
र्तव्यमाषाढेकर्तव्यमित्यादिमासविशेषनामग्रह
णेनयद्विहितम् अनन्ते यस्मिन्मासविशेषेना
मसम्बन्धेनविधानं यथा वैशाखेअक्षततृतीया
व्रतस्यतस्यमलमासविषय आरंभोनज्येष्ठमासि
निर्जलैकादशीव्रतस्य ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्रावणकृष्णपक्षे जन्माष्टमीव्रतस्योत्पादि स्वयमम्यह्
ह्नम् आरभेत काम्यकर्माणि समाप्तिकालादर्वाक्यप
पतिते मलमासेपि काम्यंकर्मकार्यं यथा चातुर्मास्य
व्रतानां कार्तिकावधिकानां संकल्पितानां मध्ये पतित्वा
गस्य संकल्पविरोधेनान्याय्यत्वात् अतएव माधवोपि
आरंभस्य समाप्तेश्च मध्ये स्याच्चेन्मलिम्लुचः प्रवृत्तम
खिलं काम्यं तदानुष्ठेयमेव तु मासविशेषनामग्रह
णेन यद्विहितं तत्सर्वं तत्र निषिद्धमतस्तत्र कार्यम् अनन्ते
उपाकर्म च हव्यं च कव्यं च पितृसेवितं उत्तरे नियतं कु
र्यात्सर्वं तन्निष्फलं भवेत् पराशरः यत्तद्द्वयेकसंक्रा
न्तिर्यदिनस्यात्सितासिते तदातन्मासिकं कार्यमुत्तरे
मासि कारयेत् रविणालंघितो मासः स्यात्तच्चान्द्रोम
लिम्लुचः तत्र यद्विहितं कर्म उत्तरे मासि कारयेत् प
एवं षष्टिदिनो मासस्तदेव स्यान्मलिम्लुचः त्यक्त्वात
तरे कुर्यात्पितृदेवादिकाः क्रियाः अत्रैवं वाक्यसमूहे
मासविशेषनामसम्बन्धेन यद्विहितं तन्मलमासपरी

सं त्यागेनोत्तरत्र विधीयते वर्षे वर्षे तु यच्छ्राद्धं मातापि
म त्रोर्मृताहनि मलमासे न तत्कार्यं व्याघ्रस्य वचनं य
१८० था निर्णयामृते बृहस्पतिः अग्न्याधानं प्रतिष्ठां च य
ज्ञदानव्रतानि च देवव्रतवृषोत्सर्गचूडाकरणमेख
लाः मंगल्यमभिषेकं च मलमासे विवर्जयेत् अग्न्या
दानमित्यत्रानन्तः प्रतिष्ठा देवगृहतडाकवापीकू
पारामाणामुद्यापनं यज्ञाः काम्यनित्या अपि वस
न्तादिसम्बन्धेन विधीयमानाऽन्यत्रेक्रियमाणा ये स
काले पवक्तुना भवन्ति दानानि महादानत्वेन यानि
180 प्रसिद्धानि व्रतानि काम्यान्यारंभे शेषं प्रसिद्धं वृषो
त्सर्गः काम्यपवनत्वेकादशाहे विधीयमानः तस्य
यथा प्राप्तं तत्रैव विधिः अपि च बाले वा यदि वा वृ
द्धे शुक्रे वाऽस्तंगते विधौ शुक्रे जीवे स्तगामिनि मल
मासे तथैतानि वर्जयेद्देवदर्शनं देवदर्शनमपूर्वं तदा
हगार्ग्यः अपूर्वदेवतां दृष्ट्वा नष्टभार्गवे मलमा
स्यप्यनादृत्य तीर्थयात्रां विवर्जयेत् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

शातातपोपि अगस्त्योदयगुरौशुक्रेवालेवृद्धेमलिम्लुचे
व्रतारंभापवर्गंचनकुर्यान्मौञ्जिबन्धनम्‌ निष्क्रमंजात
कर्मादिकाम्यंवृषविसर्जने गार्ग्योपि नवान्नप्राशनंचौलं
विवाहंमौञ्जिबन्धनं उद्यापनमुपारंभं व्रतानांनैवकार
येत्‌ जातकर्मैतिस्वकालेयदि -कृतम्‌ तदाहगार्ग्यः
नामकर्मचजातेष्टिं यथाकालंसमाचरेत्‌ प्रतिपातेतु
कुर्वीतप्रशस्तेमासिशुभप्रदाम्‌ वसिष्ठः वापीकूपतडा
कादिप्रतिष्ठायज्ञकर्मच नकुर्यान्मलमासेतुमहादान
व्रतानिच मरीचिः गृहप्रवेशगोदानप्रस्थान महो
त्सवान्‌ नकुर्यान्मलमासेपिगुरौशुक्रेतथास्तगे मासे
पि आधानंयज्ञकर्माणिप्रायश्चित्तंव्रतानिच नकुर्यान्म
लमासेतुगुरुशुक्रास्तपक्षवे स्मृतिसंग्रहेआरंभेदर्शपू
र्णादेरग्निहोत्रस्यचाहितः प्रतिष्ठारामकूप्याद्यान्मलमा
सेविवर्जयेत्‌ वापीकूपतडाकादिप्रतिष्ठायज्ञकर्मच
नकुर्यान्मलमासेतुमहादानव्रतानिच अनन्ते नकु
र्याद्‌अधिकेमासिकर्माकर्मकदाचन मुक्त्वानैमित्तिकं

© Dharmartha Trust J&K. Digitized by eGangotri

सं श्राद्धंनहितत्रैवकीर्तितं कर्माकर्मपदेनकाम्यंकर्मो
च्यते तद्धिफलकामैः क्रियमाणत्वात्कर्मअफलका
म मैः अक्रियमाणत्वादकर्म तथैवाह प्रजापतिः नष्ट
१८ र्यादधिकेमासिकाम्यंकर्मकदाचन शुक्लानैमित्तिकं
श्राद्धंनहितत्रैवकीर्तितं उपाकर्मतथोत्सर्गः प्रस
वाहोत्सवाष्टकाः मासवृद्धौपराकार्यावर्जयित्वातु पै
तृकम् पैतृकसमावस्याश्राद्धं तस्यमलेपिकर्तव्यता
तु प्रसवाहोत्सवः जन्मदिनोत्सवः वर्षवर्धमानसं
ज्ञः सिनीवालीमतिक्रम्ययदासंक्रमतेरविः पूर्वमा
181 नेपरित्यज्यकालस्तत्रोत्तरःस्मृतः अनन्ते द्वौमासावे
कनामानौस्यातांसंवत्सरेयदि पूर्वेत्तु पितृकार्याणि
देवकार्याणिचोत्तरे पितृकार्याणीतिषोडशश्राद्ध
परम् उत्तरेदेवकार्याणिपवित्रारोपणनागपूजादि
कुलधर्मप्राप्तानि यानितान्युत्तरे क्रियमाणानिदृ
ष्टतिनचलमविधिकानिभवन्ति पवित्रारोपणंहेमा
द्रौ विष्णुरहस्ये श्रावणस्यासितेपक्षेकर्कटस्थेदिवाकरे
द्वादश्यांवासुदेवायपवित्रारोपणंस्मृतं द्वादश्यांश्राव
वापिपंचम्यामथवाद्विज।

© Dharmartha Trust J&K. Digitized by eGangotri

अशक्तेशुक्लकर्तव्यंपंचदश्यामथापिवेति तथाशि
वेतत्रैवकालेतत्र आषाढान्तेचतुर्दश्यांनभ
स्यनभस्योस्तथा अष्टम्यांचचतुर्दश्यांपक्षयोरुभ
योःसममिति अधिवासनंतद्दीपिकायाम् गोदो
ह्यान्तिकेकालेपूर्वेधिवासनमिति गौणकालेरा
मार्चनचन्द्रिकायां पवित्रारोपणंविनाश्रावणो
नभवेद्यदि कार्तिकावधिशुक्लेकर्तव्यमिति
नारदः हैमरूप्यताम्रक्षौमैः सूत्रैःकौशेयपट्टजैः
कुशैःकाशैश्चकार्पासैर्ब्राह्मण्याकर्तितैःशुभैः
कृत्वात्रिगुणितंसूत्रंत्रिगुणीकृत्यशोधयेत् त
तोत्तमंपवित्रंतुषष्ट्यासहशतैस्त्रिभिः समन्त्या
सहितंद्वाभ्यांशताभ्यांमध्यमंस्मृतं साशीतिना
शतेनैवकनिष्ठंतत्समाचरेत् साधारणपवित्रा
णित्रीणिसूत्रैःसमाचरेत् उत्तमंतुशतग्रन्थिपं
चाशद्ग्रन्थिमध्यमं कनिष्ठंतुपवित्रंस्यात्षड्विंशद्ग्र
न्थिशोभनं षड्विंशाश्चतुर्विंशाद्वादशेतिचकेचन

© Dharmartha Trust J&K. Digitized by eGangotri

सं चतुर्विंशाद्द्वादशाष्टाविद्येकेऽप्यनयो विदुः शिवप
म॰ वित्रं तत्रैव शिवागमे एकादशाभिर्वा सूत्रैस्त्रिंशता
१८२ वाष्टयुक्तया पंचाशता तु कर्तव्यं तत्र ग्रन्थ्यन्तरा
लकं द्वादशांगुलमानानि वा सप्तदशांगुलानि च
लिंगविस्तारमानानि चतुरंगुलिकानि च एतच्च नित्यं
न करोति विधानेन पवित्रारोपणं तु यः तस्य सां
वत्सरी पूजा निष्फला मुनिसत्तम तस्माद्भक्तिसमा
युक्तैर्नरैर्विष्णुपरायणैः वर्षे वर्षे प्रकर्तव्यं पवि
रोपणं हरेरिति तत्रैवोक्तम् नागपूजा भविष्ये
श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप द्वारस्यो
भयतो लेख्या गोमयेन विषोल्बणाः पूजयेद्विधिव
त्क्षीरदधिदूर्वांकुराक्षतैरित्यादि तदेवं सर्वमभि
सन्धाय संगृहीतवान्माधवः काम्यारंभं तत्समा
प्तिं मलमासे विवर्जयेत् आरब्धं मलमासात्प्राक्
कृच्छ्रचान्द्रायणादिकं तत्समाप्यं सावनस्य·
मासस्यानतिलंघनात् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

आरब्धस्य समाप्तेश्च मध्ये स्याच्चेन्मलिम्लुचः प्रवृत्तम
विलंकाम्यं तदानुष्ठेयमेव तत् कारीर्यादि तत्र यत्काम्य
तस्यारंभसमापने कार्यकालविलंभस्याप्रतीत्तायाश्च
संभवात् अनन्यगतिकं सन्ध्यामग्निहोत्रादि नत्यजे
त् गत्यन्तरयुतं नित्यं सोमयागादि वर्जयेत् अगति
ग्रहणस्नानं जातेष्टिर्गतिसंयुता इयं नैमित्तिकं त
स्य व्यवस्था नित्यवन्मता शुद्धमासस्थितानां स्यान्मलि
ने प्रथमाह्निकम् मलमासस्थितानां तु मले स्यादाह्नि
कान्तरम् अधिमासे तु श्रौतस्मार्तविषयस्य विवे
कवचनीयस्य बहुलत्वान्नहि विवेकः पृथक्प्रतिज्ञा
यते तत्र वर्ज्यविविक्तं किं काम्यारंभमिति अनेन त
व्रतलक्ष्मीव्रतादिकं काम्यं क्वचित्तु काम्यस्यापि स
माप्तिमंगीकरोति आरब्धमिति द्वादशादिनसा
ध्यं प्राजापत्यकृच्छ्रं त्रिंशाहिनसाध्यं चान्द्रायणं
तथा त्रयोदश रात्रादीनां सत्राणां द्विरात्रादीनामा
वश्यकानां षाण्मासिकदिव ससंख्यातस्याद्वोत्सृ

© Dharmartha Trust J&K. Digitized by eGangotri

सं यित्वमशक्यत्वात्कृच्छ्रादिसमाप्तिरावश्यकी आ
शि रब्धसमाप्तिवदनुष्ठानमपि वर्जनीयमित्याशं
१८३ क्याह आरंभस्येति अतएव शिष्टाः श्रावणादिष्व
पि मासेष्वपि चातुर्मास्यव्रतान्यनुतिष्ठन्ति यथा
विषयविशेषेणमलमासे समाप्तिरनुष्ठानं चाभ्यु
पेयेते तथाआरंभोपिक्वचिदभ्युपेय इत्याह का
रीर्येति कारीर्यावृष्टिकामोयजेतेति कारीरीवि
हिता आदिशब्देनग्रहयज्ञं चिकित्सितं विहिता
रिष्टोद्वेष्टिर्दृश्यते तत्रयदामलमाससमपनेतुंका
लविलंबः प्रतीक्ष्येत तदासस्यानिशुष्येयुः य
ह्यस्तस्त्रियेत काम्यकर्मस्विव नित्यकर्मस्व
पि वर्ज्यावर्ज्यविभागं दर्शयति अनन्येति प्र
तिदिनं सायंप्रातःकालयोर्विहितस्याग्निहोत्रस्या
करणेप्रत्यवायादनन्यगतित्वं आदिशब्दाद्दर्शपौ
र्णमासोगृह्यते सोमयागस्यतुवसन्ते विहितस्य
शुद्धमासेपि कर्तुमशक्यत्वादनन्यगतिकत्वं आदिश
ब्देनशुद्धमासेपि ।

© Dharmartha Trust J&K. Digitized by eGangotri

कर्तुमशक्तो निरूढः पश्चवन्धो गद्यते नित्यकर्मन्यायं
नैमित्तिकेप्यतिदिशति अगतीति मलमासे प्राप्तस्य
ग्रहणस्नानस्य शुद्धमासे सम्पादयितुमशक्यत्वादग
तिकत्वम् वैशाखे नंदहादशाकपालं निर्वपेत्पुत्रे जाते इ
ति जातेष्टिर्विहिता तस्याश्च शुद्धमासेपि कर्तुमशक्यत्वा
दगतित्वम् प्रत्याब्दिकस्य मरणं विशेषमुपजीव्य व
र्ज्यावर्ज्यव्यवस्थां दर्शयति शुद्धेति मलमासरहिते सं
वत्सरे वैशाखे मृतस्य यद्यपरेति न संवत्सरे अधिके वै
शाखे प्रथमाब्दिकं प्राप्नुयात्तदा कर्तव्यमेव अधिके वै
शाखे मृतस्यापि प्रथमं प्रत्याब्दिकं सर्वथा नाधिकमा
से प्राप्नोति किंत्वाब्दिकान्तरं कदाकदाचिदधिमासे
प्राप्नोति तदा कार्यम् उभयोरपि शुद्धमासे प्रत्याब्दि
कं कार्यं तत्र किंचिन्मलमासे एव कर्तव्यं तद्यथा
मलमृतानां यदाकदाचित्प्रत्याब्दिकं अन्यमासमृ
तानां प्रथमाब्दिकं च तथा च हेमाद्रिसारेपीत्यमे
व मलमासविषये कर्तव्याकर्तव्यविचारः तत्र प्रथ

© Dharmartha Trust J&K. Digitized by eGangotri

सं संमन्वादीनाह मात्स्ये आश्वयुक्शुक्लनवमी का
म र्तिके द्वादशी तथा तृतीया चैत्रमासस्य तथा भाद्रप
१८४ दस्य च फाल्गुनस्य त्वमावस्या पुष्यस्यैकादशी तथा
आषाढस्यापि दशमी माघमासस्य सप्तमी श्रावण
स्याष्टमी कृष्णा तथाषाढी च पूर्णिमा कार्तिकी फाल्गु
नी चैत्री ज्यैष्ठी पंचदशी तथा मन्वन्तरादयस्त्वेता द
त्तस्याक्षयकारकाः अमावस्या श्रावणाष्टमी व्यति
रिक्ताः सर्वास्तिथयः शुक्लाः अत्र च श्राद्धमुक्तं मा
त्स्ये कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु हाय
नानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत् इदं च मन्वा
दिश्राद्धं मलिने शुद्धे चेत्युभयोरेव कार्यं तथा च स्मृ
तिचंद्रिकायां मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि चेति
चैत्रशुद्धि दुर्गाष्टमी रामनवमी च मलमासे न कार्या सज
ममप्यतमंस्यात्रोपवासः कृते न भवेत् न कुर्यान्मलमासे
तन्महादानं व्रतानि चेति माधवीये संग्रहवचनात् यदा तु
वैशाखे मलमासस्तदा कामाख्यानां तत्र समाप्तिनिषेधान्मास

184

स्नानंतन्नियमाश्चकर्तव्याः विस्तरस्त्वत्रकालनिर्णया
द्वैशाखनिर्णयेबोद्धव्यः मासोपवासचान्द्रायणादि
त्वमलमासएवसमापयेतमलिनेमासोपवासव्रतंमि
ति वैशाखशुक्लान्तृतीयायुगादि तथाच युगादित
त्वाणं ब्राह्मे वैशाखेशुक्लपक्षेतुत्रेतातुनवमीदिने
अथभाद्रपदेकृष्णत्रयोदश्यांतुद्वापरं माघेतुपौर्ण
मास्यांतुघोरंकलियुगंस्मृतम् मलमासेसति तत्रैव
युगादिः कार्योनोत्तरत्र दर्शश्राद्धवत्तन्नोत्कर्षः चतुर्ष्व
पियुगादिष्विति हेमाद्रौऋष्यशृंगवचनात् अथो
दकुंभमन्वादिमहालययुगादिष्विति कालादर्शोक्ते
तामलमासकर्तव्येषुपरिगणनाच्च महालयश्राद्धे
नमध्यात्त्रयोदशीविवर्जितेति माधवः स्मृतिचंद्रि
कायांतुमासद्वयेपिकर्त्तव्यमित्युक्तं योगादिकंमा
सिकंचश्राद्धंचापरपाक्षिकम् मन्वादिकं तैर्थिकंच
कुर्यान्मासद्वयेपिच मदनरत्नेमरीचिः प्रतिमासंम
ताहस्तुश्राद्धंयत्प्रतिवत्सरम् मन्वादौचयुगादौचत

© Dharmartha Trust J&K. Digitized by eGangotri

सं न्मासोरुभयोरपि इति प्रतिवत्सरं क्रियमाणे कल्पा
द दिश्राद्धमिति तत्रैव व्याख्यातम् वैशाखशुक्लसप्त
१८५ म्यां गंगोत्पत्तिः ब्राह्मे वैशाखशुक्लसप्तम्यां जाह्नवी
जह्नुना पुरा क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु द
क्षिणात् तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति
अस्यापवयोगविशेषप्राशस्त्यं तत्रैव स्मर्यते स्वाती
नतत्रयोगेन शनिवारे महद्भुतं सिद्धियोगस्य संयो
गे वणिजे करणे तथा पुंसां सौभाग्ययोगेन लभ्यते
दैवयोगतः अत्रापि योगादिकं मासिकं चेति वचना
त् शुद्धे वा मलिने वा यत्रैव योगसंभवस्तत्रैव कर्तव्यं
ज्येष्ठशुक्लदशमी दशहरा हेमाद्रौ ब्राह्मे ज्येष्ठमा
सि सिते पक्षे दशमी हस्तसंयुता हरते दश पापानि
तस्माद्दशहरा स्मृतेति वाराहे दशमी शुक्लपक्षे तु
ज्येष्ठमासि कुजेऽहनि अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च स
रिद्वरा हरते दश पापानि तस्माद्दशहरा स्मृतेति स्कान्दे
तद्दशयोगा उक्ताः ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयो :

185

© Dharmartha Trust J&K. Digitized by eGangotri

गङ्गास्नानं व्यतीपाते कन्याचन्द्रे रवौ दशयोगेन
रः स्नात्वा सर्वपापैः प्रमुच्यते ज्यैष्ठे मलमासेपि
तत्रैव कार्या दशहरा न तु शुद्धे दशावशानुलोकर्षः
स्तमैः परमार्थतः योगाधिक्ये फलाधिक्यात्तयो
गबाहुल्यं तत्र कार्या शुद्धे वा मलिने वा स्कान्दे यां को
विस्तरितं प्राप्य दर्पणाद्युत्तिलोदकं मुच्यते दशभिः
पापैः समहापातकैरपीति ज्यैष्ठी पौर्णमासी मन्वा
दिः तस्या मलमासे प्राप्तौ विधिः आषाढशुक्लैका
दश्यां द्वादश्यां वा विष्णुशयनोत्सवः सत्र मलमा
से सति न कर्तव्यः ईशानस्य बलिर्विष्णोः शयनं प
रिवर्तनमिति कालादर्शे निषेधात् शुद्धे पुनः
कार्याः अत्र चातुर्मास्यव्रतारम्भः उक्तो भारते श्रा
वणे तु सिते पक्षे एकादश्यामुपोषितः चातुर्मा
स्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः इति अस्यारम्भस्तु
शुक्रास्तमयादावपि कार्यः तथा चोक्तम् न
वैशायनसौष्ठ्यं च शुक्रास्तमये बालातिथेः खंडत्वे

© Dharmartha Trust J&K. Digitized by eGangotri

सं चिन्तयेदादौ चातुर्मास्यविधौ नरः इति वृद्धगार्ग्योक्तेः
म॰ इदं च द्वितीयारंभविषयं प्रथमारंभस्तु गुरुशुक्रास्त
१८६ मयादिमलादिषु वर्ज्य एव तथाचाशौचमध्येपि द्वि
तीयाद्यारंभो भवत्येव उक्तं च प्रसूतिर्वाशुचिर्वापि
यदि स्त्रीयदि वा पुमान् व्रतमेतन्नरः कृत्वा मुच्यते स
र्वपातकैरिति भार्गवार्चनदीपिकायां स्कान्दे प्रारब्धेसू
तकं न स्यादनारब्धे तु सूतकमिति विष्णुवचनाच्च
असंक्रान्ते तथा मासे दैवे पित्र्ये च कर्माणि मलमास
मशौचं च वर्जयेन्मतिमान्नरः इति हेमाद्रौ चातुर्मास्य
व्रतप्रकरणे भविष्यद्वचनं तत्प्रथमारंभविषयम्
द्वितीयाद्यारंभस्तु मलेपि कार्यः प्रसंगाच्चातुर्मास्य
ग्रहणप्रकारः हेमाद्रौ भविष्ये एवं तां प्रतिमां विष्णो
पूजयित्वा स्वयं नरः प्रभाषेत प्रभो विष्णोः कृताञ्ज
लिपुटस्तथा चतुरो वार्षिकान्मासान्देवस्योत्था
पनावधि इमं करिष्ये नियमं निर्विघ्नं कु
रु मेऽच्युत ॥

© Dharmartha Trust J&K. Digitized by eGangotri

भविष्ये श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा दु
ग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् स्कान्दे
चत्वार्येतानि नित्यानि चतुराश्रमवर्तिनाम् प्रथमे मा
सि कर्तव्यं नित्यशाकव्रतं नरैः द्वितीये मासि कर्तव्यं द
धिव्रतमनुत्तमम् पयोव्रतं तृतीये तु चतुर्थे च निशा
मय द्विदलं बहुबीजं च वार्ताकं चैव वर्जयेत् नित्यान्ये
तानि विप्रेन्द्र व्रतान्याहुर्मनीषिणः तथा जंभीरं राज
माषांश्च मूलं रक्तमूलकम् कूष्माण्डं चेक्षुदण्डं चेत्तुदं
डं च चातुर्मास्ये त्यजेद् बुधः विशेषात् बदरीधात्रीकूष्मा
ण्डं तिन्तिणीं त्यजेत् जीर्णधात्रीफलं चैव कपित्थं चिक्का
यशोधनं स्कान्दे वार्षिकांश्चतुरो मासान् यस्त्यजेत् कृष्ण
नार्दने पंचत्वं ब्रह्मादि शयने वर्जयेन्मतिमान् नरः भ्रष्टान्नं
वर्जयेद्भार्यामांसं मधु परौदनं पटोलं मूलकं चैव वृन्ता
कं च न भक्षयेदित्यादि शाकशब्दश्च दशधा तु स्मृतः मूल
पत्रकरीराग्रफलकाण्डाधिरूढकम् त्वक्पुष्पं कवचं
चेति शाकं दशविधं स्मृतम् इत्युक्तेः अधिरूढं संज्ञरः

सं आचारप्रदीपे वृन्ताकं च कलिंगं च विल्वोडुम्बराभिः
द॰ सदाः ऽद्वेयस्य जीर्यतीति तस्य हरतरो हरिः भिः सदेति
१८० ह्रस्वापाठे दग्धान्नभीः सदेति दीर्घपाठे भीसदं स्नेषा
तकमिति पात्वन्तविनिर्द्धुराः तथा निष्पावे राजमा
षांश्च मसूरं सन्धितानि च वृन्ताकं च कलिंगं च स्वमेदे
वे विसर्जयेत् सन्धितानि लवणशाकादीनि श्राव
ण्यामुपाकर्म इदं च मलमासे न कर्तव्यं तथा च का
त्यायनः उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणि
वत्सरस्य तु संगः दशाहं वापनोत्कर्षे स्तत्रापि युग
दिषु ऽपाकर्म मलाबस्योद्येत हिंस्यं पादित इति
तच्छन्दोगविषयम् तेषां सिंहार्कपर्वोपाकर्मविधा
नात् नागरखंडे परपक्षमधिकृत्य नभो वाथ नभस्यो
वा मलमासो यदा भवेत् सप्तमः पितृपक्षः स्यादन्य
त्रैव तु पंचमः आषाढीमवधिं कृत्वा सप्तमः पंचमोऽपि
हृद्यो घटगतन्दागता पिमासे महालयात्सर्वमे
वाकस्मात्पतिते तस्मात्कति पयेषु,

187

© Dharmartha Trust J&K. Digitized by eGangotri

महालयदिनेष्वशुद्धेषु तत्रैवमलमासनिर्गमाद्

नन्तेषु कतिपयेषु शुद्धेष्वविशिष्टेषु प्रथमममनारब्ध

मपि श्राद्धं कुर्यादेव तथाहि मलमासमशौचं वर्ज

येन्नतिमात्रमिति भविष्यद्वचनेनाशौचमलमास

योः मात्रशेषेणैव वर्ज्यत्वम् तदयथा प्रथमपतित

स्याशौचस्य मलयादावनारब्धमपि महालयश्राद्धं

शुद्धेष्ववशिष्टेषु चरमदिनेषु शिष्टैरनुष्ठीयते तथैव

महालयाष्टकाश्राद्धापाकर्माद्यपि कर्म यत स्पष्टं

मासविशेषाख्या विहितं वर्जयेन्मलमिति पारिशि

ष्टस्मरणात् वृद्धश्राद्धं तथा सोमममग्न्याधेयं महाल

यम् राज्याभिषेकं काम्यं च नैव कुर्यान्मलिम्लुचे इ

त्यादिभ्रवादिवचनाच्च मलमाससत्तयाप्रथमदि

नेषु विरुद्धेष्वकृतस्य मलमासासमगमोत्तरं तु

उपाकर्म च हव्यं च कव्यं च पितृसेवितम् उत्तरे निय

तं कुर्यात् एवं तन्निष्फलं भवेत् एवं षष्टिदिनो मा

सस्तदेवत्तमलिम्लुचः तत्र यद्विहितं कर्म उत्तरे मा

सं
प्र
१८८

सिकार्ययेत् इत्यादिवचनबलादन्तरेऽब्दे श्राद्धा
दैवश्राद्धं करणीयत्वात्तत्प्रथममनारभ्यमपिचरम
मदिनेष्ववशिष्टेषु महालयश्राद्धं कार्यमेव तथै
व आषाढीमवधिंकृत्वायःपतःपंचमोभवेदिति
गणनयाश्वहौसत्यांप्रक्रान्तमपिमहालयश्राद्धम
कस्मान्मध्येपगनन्त्वागताधिमासपाते तदाभ्यश्रा
दिवचनैर्निवर्तितपव तदेवावशिष्टंस्मृतिवचनप्रा
माण्यात्मनः कालान्तरेऽब्दे प्रवर्ततेच यथोदाहृ
तंनिबन्धकारैः श्रेष्ठोवादिनामहालयश्राद्धस्य
स्वकालाकरणे येयं दीपान्विताराजनव्यातापंच
दशीभुवि तस्यांदद्यान्नचेद्दत्तंपितृणांवैमहाल
यइति समस्तवचनादन्यकालविशेषकरणा
मादृतं तथैवमध्येमलपातात् प्रथमेचाधिके
मासिमलिनेपापसंभवे नाश्नन्तिपितरोदेवा
दाश्वारेनोपतिष्ठन्तीति दोषश्रवणात्स्मृतिवचनैनि
वर्तितमपिमहालयश्राद्धमवशिष्टमन्तरेऽब्देकार्यमि
ति स्मृतिभिरेव प्रवर्तितम् ॥

188

© Dharmartha Trust J&K. Digitized by eGangotri

तथाम्र लोगमक्षि: सतिमाता यते कालः काले
तिष्ठन्ति देवताः ब्रतंत्वेकाङ्गुलिः कालेलच्यको
ट्यः तथैवाग्रान्तपङ्क्ति: वृद्धाद्विवसै: मासः
कथितोबाथरायणो पूर्वार्धंतपरिस्य स्यकर्तव्या
उत्तराक्रियाः षट्ठीनसि: प्रोतस्मान्निक्रियाः सर्वा
द्वादशेमासिकीर्तिताः त्रयोदशेतद्ब्रुतः सर्वा ति
ष्फलाइतिसंज्ञिताः तस्मात्त्रयोदशेमासिकुर्याव
तन्नकदाचन कुर्वन्ननर्थमेवाप्नुकुर्यादात्मविनाशनं
मतंवदन्तिकालस्यमासेकालविदोजनाः नेदेतात
विशेषेज्यामन्यत्रावचकाद्विथेः नेहेतनाचरेत् य
स्यानुत्तरेमासि क्रियमाणायांनास्तिविशेषः सा
विशेषेज्या यथावसन्ते वसन्तेज्योतिषायजेतेति
वसन्तेविहितस्यज्योतिष्टोमस्य मलिम्लुचेवैशा
खेपरित्यागेनोत्तरस्मिन्वैशाखे क्रियमाणस्यवस
न्तपवकृतत्वात्रास्तिविधिलोपः तथाचैतन्मीमां
सकैरपिनिर्णीतमेव यथाकालेहिकर्मविधीयते

© Dharmartha Trust J&K. Digitized by eGangotri

सं नकर्माङ्गं कालः यत्स्वेच्छाविनियोगार्हं तदुपादेयं
१८९ यदुपादेयं तद्विधेयम् कालश्च स्वेच्छया कर्तुं नश
क्यः स्वरूपेण अतएवानुपादेयः पंचकस्य मध्ये मीमां
सकैः कालः परिगणितः अतः कालोद्देशेन कर्मक
र्तव्यं न तु कर्मोद्देशेन कालः निमित्तभूतकाला
भावेधिकाराभावात्कृते कर्माकृतमेवेति नियु
क्तमायमर्थः स्मृतिसंग्रहकारैर्यथायथमुपयुक्त
स्थलेषु तथाह्यपरार्के तत्र कालोङ्गमनुपादेयः इ
ति स्वरूपेणैवाधिकारहेतुः न हि कालान्तरे वर्त
189 मानः कर्ताङ्गभूतकालान्तरविशिष्टं कर्म शक्नुया
त्कर्तुम् किन्तु तत्काल एवेति युक्तं कालस्याधि
कारहेतुत्वमिति न चात्र विषये आरब्धस्य समा
प्तेश्च मध्ये स्यान्मलिम्लुचः आरब्धमविलंकाम्यं त
दनुष्ठेयमेव तु इति माधवसंग्रहवचनमारणी
यं इत्यंशिष्टैः सम्प्रदायान्नानुष्ठितमेव अस्य सं
ग्रहवचनस्य काम्यत्वादित्यलम् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तथाचात्रषोडशानामपिश्राद्धानां परस्तं भिन्नत्वा १

दैकोद्दिष्टेनप्रारंभसमाप्त्योरभावादेवमध्येविरमण

शंकानाशः तथाचोक्तंनिबन्धकारैः महालयेभि ·

न्नानामेवकर्मणांप्रतिदिनं संभवात् ब्राह्मणादि

विसर्जनंच हेमाद्रिसारे पतत्त्वनित्यकाम्यं महाल

यश्राद्धंमलमासेपिनकार्यं हंसेहंसस्थितेयात्तम

मावुक्तात्रयोदशीतिथिर्वैवस्वतीनाममाख्यायाउक्तं

त्रस्यत मघात्रयोदशीश्राद्धंमलपक्षस्थितिरेतकं

प्रनन्यगतिकत्वेनकर्तव्यंस्यामलिम्लुचे ब्रह्मपुराणे

कन्यागतेसवितरियान्यहानिचषोडश क्रतुभिस्ता

नितुल्यानितेषुदत्तंमहाफलंइति षोडशत्वमाद्यु

नप्रतिपदासह तत्रचकृष्णप्रतिपदितिथिकृत्येषु

वमेवदर्शनान्नान्दीमुखश्राद्धंव्यवस्थितं तथाहि क

लियुगस्यमपिवेद मुनिवेदसितेषुवर्षेषुगतेषु ४७४०

सप्तर्षिचारेणात्रद्वाविंशेवर्षेदिभावदि ६ मकुशे १२

बदि १० पगविष्र २ हर्षणादि १५ अधिकमासप्रवे

© Dharmartha Trust J&K. Digitized by eGangotri

सं शोगि ५ संवत् २२ श्रावणवदि ५ शाकादि ३ पंप्र ० सि
दि २७ अधिकमासो निर्गतोनि १ धजः इत्यस्मिन्का
लेनुष्ठितमेव विशिष्टमतिसमुपासनीयैरित्यमस्म॰
ड्रोत्रगरिष्ठैः शिष्टाचारप्रवर्तकैः ॥

अथ शिवरात्रेर्मले विचारः तत्र प्रथमं शिवरात्रिस्व
रूपमेव अर्धरात्रे त्रयोदश्यामभिजिज्ञो हरिणोदये
उत्पन्नं तु महारावं लिंगरत्नमयं गुरु द्वादशीसहिता
यत्र शिवरात्रिस्त्रयोदशी जागरस्तु तया कार्यं न कार्य
मपरे हनि तिथिमाहात्म्ये रात्रौ जागरणं कुर्यात्त्रयो
दश्यां वरानने यदास्तगस्त्रयोदश्यां रविर्वेलाप्रसं
190 भवे सा तिथिः सकला तस्यां कुर्याच्छिवनिशाव्रतं
सेतानाभावे सितच्छागालंभवद्योगसाधनम् द्वाद
श्यामर्धरात्रे तु प्रविष्टा चेत्त्रयोदशी तदाहं सकलभो
दे विनो चेज्जन्मशतैरपि द्वादश्यामधिवासं तत्र त्रयोद
श्यां तु जागरम् दानधर्मक्रियाश्चैव चतुर्दश्यां तु
कारयेत् पंचदश्यां विशेषार्चा पर्वणयुक्तं विजनमिति

© Dharmartha Trust J&K. Digitized by eGangotri

शिवरात्रिबलिषु त्रयोदशीप्रधानत्वेपि द्वादशादयस्त्व
गं तथैवेदं ग्राह्यमपि तदित्यमंगिभूतास्त्रयोदश्यापव
शुद्धाशुद्धे विचार्ये न तु तदङ्गभूता द्वादश्याश्चतुर्दश्यादेर्वा
ईशानस्य बलिर्विष्णोः शयनं परिवर्तनमिति शिवरा
त्रित्रयोदशीद्वयस्येशानबलेर्मले कालादर्शादिनिब
न्धकृद्भिः स्पष्टमासविशेषाख्या विहितवर्जयेन्मले
इति सामान्यतो विशेषतश्च निषेधात् द्वादश्यां चतुर्द
श्यादिषु च मलेन विहास शुद्धा स्ववा विधिनिषेधप्रवृ
त्तिः किं तु त्रयोदश्यामेव तथा च त्रयोदश्यां शुद्धायां
सर्वास्तदङ्गभूतास्तिथयो मलेपि विहिता अपि शुद्धाप
व तदुक्तं माधवेन प्रधानस्य क्रियायास्तु कालाङ्गानीति मीमां
सकवाक्यानुसारम् अन्याङ्गस्य कर्मकालादेः का
लस्वरूपानुसारतः इति एवं स्पष्टमासविशेषाः
ख्या विहितवर्जयेन्मल इति वचनप्रपंचितस्य चैत्रे
दुर्गाष्टमी रामनवमी ज्येष्ठे निर्जला व्रता
दौ आषाढे विष्णुशयनादौ भाद्रे जन्माष्टमी

© Dharmartha Trust J&K. Digitized by eGangotri

सं व्रते अन्यमासेचैत्राद्दशाविषयेषु प्रधानत्वेनाङ्गिभू-
म तस्याष्टम्यादेरेव कालमपेक्ष्य मलमासविधिनिषे-
१९१ धावनुसरणीयौ न तु तदङ्गभूतस्य सप्तम्यादेर्नव-
म्यादेर्वा कालमपेक्ष्येति स्पष्टम् तथा वैशाखादि
चातुर्मास्यव्रतेषु पूर्वमेव पतितमले कतिपयदि-
नानामुत्क्रान्तत्वात्प्रथममनारब्धमपि तद्व्रतं मध्ये
आरभेत तथारब्धमपि शुद्धे मलपातान्मध्ये निवर्त-
येत पुनः शुद्धे प्रवर्तयेत न च षष्टिदिनावच्छिन्न
मासग्रहणेन या मासैकाद्युद्देशे पक्षाद्व्यहयोरपि
कार्यम् अथवा मलिनपक्षसमापयेदिति पक्ष
द्वयं युक्तम् न सत्रमासैकाद्युद्देशे पक्षं वा किन्त्वस्य
त्र मुख्यैव शाखाभिप्रेयत मधिके त्वमलिम्लुचा-
द्यभिधेयत्वं ॥ तथाचात्र ग्रन्थस्य
विस्तरभयात् कालभेदेनोद्देशाभेदोपि तथाहि
वैशाखे शुक्लपक्षसप्तम्यां श्रीसहितायजनादिना
यविभूतिसहिताय मधुसूदनायेति ॥

191

© Dharmartha Trust J&K. Digitized by eGangotri

उद्दिश्य पूजयन्ति मलिम्लुचे तु सत्यभामासहिताय
नरकारये निष्कलासहितायमार्तण्डायेत्यस्मार्य
पूजयंति तस्मात्स्पष्टमेवास्ति मलिम्लुचे वैशाख
योर्भेदः अत एवोभयत्र षष्टिदिने तद्व्रतंकामिति
पतः शिथिल एव तथारम्भमपि मलमासात्प्रा
गिति न्यायेन मल एव समापनीयमिति द्विती·
योपि पतः परास्तप्राय एव तस्मान्नकालस्यैव
तद्गुणा इति स्वकाले पूजिता जनार्दनादयः फलं
न्ति नापरत्रेति निश्चयात् शुद्धे प्रारब्धेपि वैशाख
व्रते शुद्धिं तावज्जनार्दनाख्यस्य विष्णोः पूजाक्रिय
माराणामध्ये मलपातात्तद्गुणत्वेन मलिने नरकारे
रिति पूजनीयभेदान्निवृत्ता पुनः मलिम्लुचे पगते
शुद्धे लब्धायां वैशाखे जनार्दनस्यैवोद्देश्यत्वात्
पूजेति तद्व्रतमिव व्रतमपि मध्ये निवृत्तमपि पुनः
प्रवर्तते इति गुरवः लौगाक्षिः गणितान्नाय
तेकालः कालेतिष्ठन्ति देवताः वंतेकाङ्क्षतिः का

© Dharmartha Trust J&K. Digitized by eGangotri

सं लेनानाकालेलस्वकोदयः तथाच विष्णुधर्मे
षु स्वकालेदेवताः पूज्याः सोपवासैर्विशेषतः
१९२ ताभ्यः सकाशात्कर्मज्ञकामयद्भिः महत्फलम् का
लेस्वकेयः प्रयतस्तुभक्त्यादेवान्यथावत्समुपैति
राजन् सपर्ययातस्यदिशन्तिदेवावरान्नभीष्टान्
कुलोच्छ्रिताद्येति वज्रमार्कण्डेयसंवादे ॥
अतस्सात् अथद्वयोरशौचयोः परस्परंसन्निपा
तस्तथाजननयोःसन्निपातेन मरणयोःसन्नि
पातेन मरणयोःसन्निपातेन जननमरणयोः
सन्निपातेनचेति तत्रपूर्वप्रवृत्ताशौचस्य मध्ये
192 द्वितीयेन सजातीयेन जननेनमरणेनवासन्नि
पाते पूर्वप्रवृत्तस्यैवदशरात्रादेरवशिष्टैरहोरा
त्रैः शुद्धिः नपुनः मध्ये सन्निपतिते द्वितीयमा
रभ्य दशरात्रान्तरं शुद्धयेकार्यम् तथाचयाज्ञव
ल्क्यः अन्तराजन्ममरणे शेषाहोभिर्विशुध्यति ज
न्ममरणमित्येकवचनमतन्त्रं बहूनामशौचानाम्

© Dharmartha Trust J&K. Digitized by eGangotri

सन्निपातस्यैव न्यायस्य तुल्यत्वात् एतच्च समसंख्य
योः समानजातीययोरशौचयोः सन्निपाते विजा
तीययोर्विषमसंख्ययोश्च व्यवस्थान्तरमेव तथाच
शंखः समानाशौचसन्निपाते प्रथमेन समापये
त् असमानं द्वितीयेन धर्मराजवचो यथा ऽचना
स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि न पूर्वे
ण विशुद्धिः स्यात्स्वकालेनैव शुद्ध्यति हारीतः
शावान्तः शाव आयाते पूर्वाशौचेन शुद्ध्यति लघु
नालघु शुद्ध्येत वृद्धिनावृद्धिरेव च शावेति सूतक
स्याप्युपलक्षणम् लघुनैकाहादिनैकाहादिकमे
व शुद्ध्येन्न तु पक्षिणी त्रिरात्रदशरात्रादि अतएव
यमोपि अघवृद्धिमदाशौचं पश्चिमेन समापयेत्
यथा त्रिरात्रे प्रक्रान्ते दशाहं प्रविशेत्पादि आशौचं
पुनरागच्छेत्तत्समाप्य विशुद्ध्यति सर्वोत्पन्नाशौ
चकालादल्पिककालेन वृद्धिमत्वं विजातीययोः
र्जननमरणयोः समसंख्ययोर्विषमसंख्ययोश्च

© Dharmartha Trust J&K. Digitized by eGangotri

सं सन्निपाते विशेषमाह देवलः अघानां योगपद्ये
अ तज्ज्ञेया शुद्धिर्गरीयसा मरणोत्पत्तियोगे तु गरीयो
१९३ मरणं भवेत् अघानामशौचानां गुरुलघूनां यो
गपद्ये दशाहंयावदघत्र्यहकंचनयुगपत्सन्निपाते
गरीयसा लघु शुध्यति न तु लघुना गरीयः तदेव
गुरुलघुत्वमाह मरणस्य उत्पत्तेर्जननस्य च यो
गे मरणं गरीयः जननं लघु इत्यर्थः शावाशौचे
वर्तमाने यदि तेन त्वल्पकालापनोद्यं शावं सूतकं
द्वितीयमाशौचं पतति तदा पूर्वेणैव शुद्धिः य
दा तु स्वल्पकालापनोद्ये शावे वर्तमाने बहुका
193 लापनोद्यमशौचान्तरं सूतकं वा पतति अथ
वा सूतके वर्तमाने त्वल्पकालापनोद्यं मृत
कमापतति तदोत्तरेणैव शुद्धिरित्यपरार्कः अंगि
राः सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकं तत्रा
धिकृत्य मृतकं शौचं कुर्यान्न सूतकं षड्त्रिंशन्मते
शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

शावेन शुध्यति सूतिर्न सूति शावशोधिनी समसं
ख्याकदिनापनोद्यविषयमेतदित्यपरार्कः तत्रैव
लघुहारीतोपि सूतके मृतकं चेत्स्यान्मृतके सूत
कं तथा मृतेन सूतकं गच्छेन्नेतरत्सूतकेन तु शावे
पि मृतकस्यान्तरं यत्र सूतकं प्रतिपद्यते मृतकां
ते भवेच्छुद्धिः सर्ववर्णेषु सर्वशः इत्यतो मरण
दशौचस्यैव बलवत्त्वात्स्वल्पकालापनोद्येनापि
मरणाशौचेन सन्निपाते बहुकालापनोद्यस्य जनन
नाशौचस्यापगमः तथा च शुद्धिचिन्तामणौ
संकरो जननयोर्वा मरणयोर्वा आद्ययोरपि सम
योर्वा न्यूनाधिकयोर्वा तत्र न्यूनाधिकयोः सजाती
योर्जननमरणयोर्विजातीययोः सन्निपाते व्यव-
स्थायां देवलः अघानां योगपद्ये तु ज्ञेया शुद्धिर्ग
रीयसा मरणोत्पत्तियोगे तु गरीयो मरणं भवेत्
विषमकालव्यापकानामशौचानां सन्निपातेऽधिक
दिनव्यापकेनाशौचेनापगतेन मता शुद्धिः मरण

© Dharmartha Trust J&K. Digitized by eGangotri

सं स्वत्वमरणान्तेनैवचयस्तं न तदधिकदिनव्यापकत्वे
प्र॰ न तथाल्पीयसापिमरणेनसन्निपातेतेनमहाग
१९४ रीयोपिजननाशौचमपैतीत्यर्थः अत्रविशेषोऽपरा
र्के मातर्यग्रेप्रमीतायामशुद्धोम्रियतेपिता पितुःशे
षेणशुद्धिःस्यान्मातुःकार्यातुपक्षिणीति अत्रपूर्वा
शौचेनशुद्धौविशेषान्तरंविज्ञानेश्वरः पूर्वाशौचेन
याशुद्धिःसूतकेमृतकेतथा सूतिकामग्निदंहित्वा
प्रेतस्यस्त्रीसुतानपि जननेसूतिकाग्निदातत्परिचा
कापूर्वाशौचेनशुध्यन्तिन तथामरणेपिप्रेतस्याग्नि
दोदाहकर्तास्त्रीसुताश्चनशुध्यन्ति पूर्वाशौचेन किं
तुस्वकालेनैवेत्यर्थः अथद्वयोरशौचयोरेकस्मिन्नेव
दिनेसन्निपातेथवा नवमादिनंतावद्यत्र क्वचनभिन्न
काले सन्निपाते तथान्तिमदिनेवापातेविशेषव्यव
स्थामाह बौधायनः जननमरणयोः सन्निपातेसमा
ने दशरात्रः अस्यार्थः समसंख्ययोर्जननयोर्मरणयो
र्वाजननमरणयोर्वैकस्मिन्नहनि सन्निपाते ।

194

© Dharmartha Trust J&K. Digitized by eGangotri

उभाभ्यामेकएवदशरात्रः शुद्धिहेतुः नतु निमित्ता
नेकत्वेन द्वितीयदशरात्रावृत्तिरित्यर्थः भिन्नदिने
प्ययमेव व्यनक्ति अथयदि दशरात्राः सन्निपतेयु
राद्यं दशरात्रमाशौचमानवमाद्दिवसात् दशरात्रं
स्वजात्युक्ताशौचपरम् नवपदं तदुपान्त्यदिनपरं
अभिविधौ आङ्. तथाचायमर्थः प्रथमप्रवृत्ता
शौचस्योपान्त्यदिनं यावत् यस्मिन्कस्मिंश्चिद्दिने
समानजातीयद्वितीयाशौचपाते द्वाभ्यामप्याशौ
चाभ्यां प्रथमाशौचस्यैव दशरात्रं ग्राह्यं नतु द्विती
यदशरात्रावृत्तिः अन्तिमदिने पाते तु विशेषं गौत
मः तच्चेत्पुनरापतेच्छेषेण शुध्येरन् रात्रिशेषे द्वा
भ्यां प्रभाते तिसृभिः अयमर्थः तत्समानजातीयं
द्वितीयमाशौचं प्रथमाशौचस्यान्त्यमदिने चेत्प
तति तदा द्व्यहो विशेषः दिवसमध्य एव पाते पूर्वा
शौचेनैव शुद्धिः न पुनरावृत्तिः तस्यैवान्तिमदि
नस्य रात्रिमात्रावशेषे द्वितीयपाते पूर्वाशौचशे

© Dharmartha Trust J&K. Digitized by eGangotri

सं षेणाशुद्धिर्न किं तु तदनन्तरं द्वाभ्यामन्याभ्यां रात्रि
प्र भ्यां अत्रैव प्रभाते रात्रिपश्चिमयामे शौचान्तरपाते
१९५ त्रिभिरन्यैर्दिनैः न पूर्वशेषसमाप्तेरत्र प्रभातपदं
घसंज्ञाशहृटीकालः प्रातःकालो निगद्यते इति प
रिभाषितरात्रिशेषनाडीचतुष्टयपरम् न त्वेकाद
शादिनप्रारंभपरं एकादशादिनप्रारंभपाते द्वितीय
दशरात्राशौचस्याहुतिर्भवत्येव अस्यामेवाशेषे चान्य
दिनव्यवस्थायां पारिजाते शातातपः रात्रिशेषे द्व
याच्छुद्धिर्यामशेषे शुचिस्त्र्यहात् ब्राह्मे प्राग्भागद्व
195 यं यावत्सूतकस्य तु सूतके द्वितीये पतिते त्वाद्यात्
सूतके शुद्धिरिष्यते अतऊर्ध्वं द्वितीयान्तात्सूतका
त्स्याशुचिः स्मृतः एवमेव विचार्यं स्यान्मृतके मृत
कान्तरे मृतकस्यान्तरे यत्र सूतकं प्रतिपद्यते सू
तकस्यान्तरे वाथ मृतकं प्रतिपद्यते मृतकान्ते भ
वेत्तत्र शुद्धिर्वर्णोक्तसर्वशः अस्यार्थः सूतकस
मभिचरमेऽहोरात्रस्य यदाद्यं भागद्वयं दिवमा

© Dharmartha Trust J&K. Digitized by eGangotri

स्मकं तत्र द्वितीये सूतके पतिते आद्यादेव सूतका
च्छुद्धिः अतऊर्ध्वमस्तमयानन्तरं सूतकान्तरपाते द्वि
तीयसूतकान्ताच्छुद्धिरिति अत्रापि विशेषं विष्णुः
रात्रिशेषे दिनद्वयेन प्रभाते दिनत्रयेण ब्रह्मद्याघ
त्याशौचान्त्यमदिननिशयोर्नैयंव्यवस्था समाना
शौचस्य किंतु तत्र लघुगरीयस्तया वहुदोषपश्चिमेन
समापयेदित्येव प्रमाणम् अथ चा नैवत्रालघुग
णवाकेनिबन्धकारैः परतः परतः शुद्धिरयंदोषो वि
धीयते स्मार्त्तेसंचनमादृक्षः सर्वैरप्यनुशिष्यते
इति देवलवचनम् अत्र तु द्विसदाशौचपूर्वं चेत
न शुध्यति अथ चेत्पंचमीरात्रिपनीत्य परतो भवे
दिति कूर्मपुराणवचनं चाश्रित्य संपूर्णाशौचम
दशरात्रादेरन्तर्भागकरणे विशेषं व्याख्याय वि
षयविभागो दर्शितस्तदुपेक्षणीयमेव अत्रान्तर
मदिनस्यैव भागकरणप्रामाण्ये विधाउप्रभ्यति
वचनानुपजीव्यापरार्केच तन्निर्गुणविषयम्

© Dharmartha Trust J&K. Digitized by eGangotri

सं मरणविषयं पुनः गौतमीयमित्येष विचारः सदा
प्र॰ चारस्मृतप्रमाणम् श्रीः पतद्वाशौचमाहिताग्नेः सं
१९६ स्कारदिनप्रभृति अनाहिताग्नेस्तु मरणादिनप्रभृ
ति अस्थिसंचयनं तूभयोरपि संस्कारदिनप्रभृ
तीति विवेकः पैठीनसि अनग्निमत्स्कान्तेवाशौ
चाद्विजातिषु दाहादग्निमतो विद्याद्विदेशस्थे सते
तथेति ॥ ॐतत्सत् अथात्रैकदा कस्यचिद्विद्व
कस्य चिकीर्षिते पुत्रोपनयने तावद्दैवात्प्रभृति रद
196 हीतकुलशौचपातेन प्रतिरुद्धे पितस्मिन्नाणको
पदिष्टे मौञ्जीबन्धनमुहूर्तदिने यत्तस्मादिष्टं केन
चिद पठितशिरोमणिना पंडितंमन्येन मूढम
तिनानावबद्धस्मृतिवाक्यार्थेन निजदक्षिणाग्रहणै
कविचक्षणेन परलोकधर्मावीक्षणविलक्षणेन
लौल्यैकलक्षणेन शौरसं वर्जयित्वैकं सर्ववर्णेषु
सर्वदा देवज्ञादिषु पद्मेषु जातेषु च मृतेषु च आ
शौचं त्रिरात्रं स्यात्समानमिति निश्चयः इतीदं व

© Dharmartha Trust J&K. Digitized by eGangotri

चनाश्रयादारभ्यतो मौञ्जीबन्धनं विधीयते ।शि
शूनामुपनयनं नास्त्यशौचं तथैवेति कृतवाङ्मतथै
वायसतिशूद्रः तदेतत्केनचित्कदाचिदकृतसर्वं
केनचिद्धिष्टेनानादिष्टंकथमिदमनिष्टंकृतवाने
तिमश्लोऽहं विमृष्टवेदविधिभिर्विधिवन्नस्तसर्वमेत
द्धिमतितिमिरंनिराकृत्योद्योतयामि॥इह हिता
वदाशौचं सपिंडसमानोदकगोत्राणांजननमर
णहेतुकम् तथाच शंखः सपिंडता तु सर्वेषां गो
त्रतः साप्तपौरुषी पिंडश्चोदकदानं च शौचाशौचं
तदानुगम् पिंडानुगामितेव्याकिस्र्वं मत्स्यः ले
पभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः पिंड
दः सप्तमस्तेषां सापिंड्यं साप्तपौरुषम् मन्त्ररपिव्य
तिरेकेनाह सपिंडता तु पुरुषे सप्तमे विनिवर्तते
समानोदकभावस्तु जन्मनाम्नोरभवेदने दशाहेः
प्रावमाशौचं सपिंडेषु विधीयते जननेप्येवमेवः
स्यात्रिपुणंशुद्धिमिच्छताम् शौचाशौचंप्रकुर्वीर

© Dharmartha Trust J&K. Digitized by eGangotri

सं श्रद्धावर्णसंकराः तदेवं बीजिनमारभ्य सप्तमसप्त
प्र· पुरुषपर्यन्तंलेपभाजस्त्याद्युक्तयुक्तामतपत्तेपर
१९७ स्परमेकनिर्वाप्यपिंडान्वयिनः जीवत्यद्वेपकारस्य
शारीरान्वयिनोवासपिंडाः संपूर्णाशौचभागिनः
अष्टमपुरुषंतारभ्य दशमपुरुषपर्यंतं पूर्वोक्तनी
त्यापिंडैकान्वयाभावे सप्तमाद्दशमाद्वापिज्ञातयो
भुपयन्त्यपरतिवचनोपलक्षिताहेहदाहोत्तरका
लिकस्यजलदानस्यैकान्वयात्समनोदकाः तेचत्र्य
हाशौचभागिनः मनुः त्र्यहात्तूदकदायिनः बृहस्प
197 तिः दशाहेनसपिंडास्तुयत्रशुध्यन्ति सूतके त्र्यहे
णमोदकास्तत्रस्नात्वाचेवतुगोत्रजाः एकादशापुरु
षमारभ्य समानगोत्रजादिपुरुषजन्मनामपरिज्ञा
नं यावत्समानगोत्राः तेषांतुपिंडोदकदानयोरन
न्वयात्समानगोत्रादिपुरुषज्ञानान्वयादेकाहः जावा
लिः जाताशौचेमृताशौचेप्रोक्तंयत्रमहर्षिभिः मोद
कानांत्र्यहंतत्रसगोत्राणामहःस्मृतं हारीतः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पकारहस्त्वसपिंडतः असपिंडे सगोत्रेऽप्युतइति शुद्धि
विन्नासगौ गौतमः पतिरणीमसपिंडेयोनिसम्ब
न्धे समृद्ध्याध्यायिनिचेति असपिंडे दशमाहर्ध्वंज्ञायः
मानजन्मनामकेऽप्युते पतिरणीति शुद्धिविवेकः अ
ज्ञायमानेत्वादिपुरुषजन्मनामनिस्ववेशपत्वेनज्ञा
यमानागोत्रजाः तेचसप्तशुद्धाः बृहस्पतिः स्वा
त्वाश्रुयन्तिगोत्रजाः तदेतत्सर्वमभिसन्धायम
नुः आसप्तानामेकपिंडस्वधानामादशमाद्द
मैविच्छित्तिर्भवति आतृतीयात्स्वधाविच्छित्तिर्भ
वति आसप्तमाद्दिक्कविच्छित्तिर्भवति अन्यथा
पिंडक्रियाशौचक्रियाशुच्छेदाद्वृस्मरतत्योभवति
आदशमाद्दशमात्परः धर्मो शौचादिस्तद्व्यपगमः
पवमात्तृतीयादिति स्वधापिंडः तृतीयात्परतः
लेपभाक्त्वान्वयात् असप्तमाद्दिक्कविच्छित्तिरिति
विदेशस्थपश्चादायनदायादतायपरम् अन्यथे
ति चतुर्थाद्दर्वीलिंडस्य अष्टमाद्दर्वीग्रिहस्य

© Dharmartha Trust J&K. Digitized by eGangotri

सं
ग्र
१९८

198

पकादशाहर्वाग शौचस्य निवृत्तौ तन्निवर्त्तकः ब्रह्म
हतुल्यो भवति ब्रह्महत्यासमानां पापानां करणे
प्रायश्चित्तं यत्तदस्मै देयमिति शुद्धिचिन्तामणौ तदि
त्थमेकपिंडानामेकोदकानामेकगोत्राणां पिंडोदक
योः संप्रदानत्वस्य कर्तृत्वस्य विषयतया शौचस्य
विप्रतिपत्त्यभावे सत्यपि दत्तकविषये येषां मस्ते
शिष्टैः प्रष्टव्याः दत्तकस्य गृहीत्रा सह पितापुत्रत्वस
म्बन्धस्तद्गोत्रप्रतिपत्तिस्तत्पिंडदत्वं चेत्यस्ति वा न वा ।
अस्ति चेद्गानिरेव का अथ नास्तीति तत्र किं प्रमाणं
श्रुतिः स्मृतिः सदाचारो वेति एतत्त्रयमेव जिज्ञासि
ते सन्दिग्धे वस्तुनि प्रामाण्येन तत्त्वे पादकम् अथ
बालोन्मत्तवदविमृष्टकारी सन्नदृष्टयो वा पर्यनुयुक्ते
ऽस्मानेव प्रत्यनुयुंक्ते देवानांप्रियः भवद्भिरेव दत्त
कस्य गृहीत्रा सह पितापुत्रत्वादि सम्बन्धसत्तायां
प्रामाण्योपपत्तिर्दर्शयितामिति नहि शृणोत्वायुष्मा
न् अस्यां श्रुतिः स्मृतिः सदाचारश्च प्रामाण्योपपादकः

© Dharmartha Trust J&K. Digitized by eGangotri

तथाहि श्रुतिस्तावद्दर्शिता पत्यनामनिर्वचनेतृ
तीयाध्यायप्रथमपादेनिरुक्तिकृता पारिषघंस
रणरिक्णैश्त्यचापत्यत्वानपत्ये प्रतिपाद्य इति
मध्यत्रिका पुत्रयोरपत्यत्वप्रतिपादिका तत्रदक्ष
केयथा नहिग्रभायोरणः सुत्वोन्यादर्योमनसा
मन्तवात अथचिदोकः पुनरित्सपत्ननोवाजीवे
जनवानभिषहमाणः अचेतानस्यमापथोविदु
क्षः नहियभायोग्राह्योरणोहृठः सुसुवतमोप्यो
पिदर्योसमायमिति मनसापिनमन्तव्यः अथ
सकः पुनरेवतदेति यतश्रागतोभवति पकृती
निवासनामोच्यते पत्ननोवाजीवेजनवान् नव
सपत्यांजातः अभिषहमाणः सपवपुत्रः अथै
वंवाक्यार्थः समायसौरसइतिहठोनयाह्यः म
नसादर्योपिनकार्यः किंतु अचेतानस्य मापथो
विदुक्ष इति व्यतिरेकेणायश्चेतनः पिंडदत्वादिः
नाश्रुतिमार्गरतकः परतश्रागतोपिपत्न्यासजा

© Dharmartha Trust J&K. Digitized by eGangotri

मं तोपि सपवदत्तकः पुत्रकार्यकर्तेति पुत्रिकापुत्रे
प्र त आशातेवंसपति प्रतीचेत्यादि स्मृतयस्त्वत्र व
१९८ ऊनमाः तथाचमनुः मातापितावादद्यातांयमद्भिः
पुत्रमापदि सदृशंप्रीतिसंयुक्तोसज्ञेयोदत्रिमःसुतः
एवंलक्षणमुक्त्वाकार्यातिदेशमाह गोत्ररिक्थेज
नयितुर्नभजेद्दत्रिमः सुतः गोत्ररिक्थानुगःपिंडो
व्यपैतिददतःस्वधा अस्यार्थः दत्तकेजनकस्यगो
त्रंरिक्थंधनंचनगृह्णीयात् पिंडंचास्मैनदद्यात्
199 यतःपिंडोगोत्रधनग्रहणानुगामी किंतुगृहीतु
रेवगोत्रंरिक्थंचगृह्णीयात् पिंडमपिग्रहीतुरेव
दद्यात् पिंडशब्दोत्रसकलौर्ध्वदैहिकोपलक्षणा
र्थः विष्णुः दत्तकस्तुषष्ठः सच मातापितृभ्यां
यस्यदत्तः वसिष्ठः पुत्रदानप्रकारपूर्वकं कार्या
तिदेशमाह शुक्रशोणितसंभवःपुरुषोमातापि
तृनिमित्तकः तस्यदानविक्रयपरित्यागेषुमाता
पितरौप्रभवेताम् नत्वेकंपुत्रंदद्यात्प्रतिगृह्णीयाद्वा

© Dharmartha Trust J&K. Digitized by eGangotri

साहिसन्तानाय सर्वेषां नतस्त्री पुत्रं दद्यात्प्रतिगृह्णी
याद्वान्यत्राज्ञानाद्गतः पुत्रं प्रतिगृह्णीयाद्बन्धून्नाहूय
राज्ञ निवावेद्य निवेशनस्य मध्ये वाह्यतिभिर्हुत्वा अ
हूरेवान्ववं सन्निकृष्टमेव गृह्णीयात् सन्देहे चोत्पन्ने
हूरेवान्ववं शूद्रमिव स्थापयेत् विज्ञायते ह्येको बहून्
त्रायते इति निवेशनस्य मध्ये गेहाग्निमध्ये अहूरे
वान्ववायस्य सोऽहूरेवान्ववः वान्ववानां हूरत्वे नहि
शाकाज्ञलीनतात्ततं तेनाहूरेवान्ववं विदित्वाभिज
नं पुत्रं गृह्णीयादित्यर्थः सन्निकृष्टमिति व्यवहित
देशाध्याप्तविप्रकृष्टस्य निषेधार्थं जाति सन्देहे चो
त्पन्ने व्यवहितदेशवर्तिबान्धवं शूद्रमिव स्थापये
दनिश्चयात् महता यत्नेन निश्चयं कुर्यादिति
तात्पर्यार्थः अत्र हेतुत्वेन श्रुतिमुपन्यस्यति
विज्ञायते ह्येकेन बहून् त्रायते इति एकेन पुत्रेण
बहून्सर्वेजानां त्रायते तस्माज्ज्ञाताभिजनमेव गृह्णी
याज्ञापरामितयपराके अस्मिन्नेव वसिष्ठवचने बृह

© Dharmartha Trust J&K. Digitized by eGangotri

सं विवेकः पुत्रप्रतिग्रहीताप्रथममतएव बन्धूनाहूय
प्र राज्ञेचोक्त्वा स्वगृहमध्ये स्वगृह्योक्तविधिनाग्निस्था
२०० पनादिकृत्वा आघारावाज्यभागान्तेहुत्वाव्याहृतिस
र्वप्रायश्चित्तस्विष्टकृद्धोमंकृत्वा नैमित्तिकंव्याहृति
होमंकुर्यात् ततोहोमानन्तरं संस्रावप्राशनादि
पूर्णहोमान्तंकृत्वापुत्रंप्रतिगृह्णीयात् अत्रराज्ञःनि
वन्धुभ्यश्चनिवेदनंदृष्टार्थमेव तस्यप्रतिग्रहीतस्यतत्
ग्रहणेनिःशंकत्वार्थं दातृग्रहीत्रोः प्रतिनयनप्रति
दानशंकानिवारणार्थंच एवंव्याहृतिहोमस्यपु
त्रप्रतिग्रहाङ्गत्वाद्व्याहृतिमन्त्रपाठेपाठेच तयो
रनधिकारात्स्त्रीशूद्रयोर्दत्तकेनभवत्येवेति सदा
चारोप्यत्रस्मृतिस्मृत्यविरुद्धः प्रसिद्धएवाबाल
वृद्धः यथादत्तकः प्रतिग्रहीत्राविधिवदाहृतः
प्रतिग्रहीतैरेवगोत्रं गृह्णातितस्मैएवपिण्डमपि
निर्वपति एतद्धितयानुगामि नतस्मैनैवाशौच
मपिगृह्णाति तथाच प्रतिग्रहीता।

200

© Dharmartha Trust J&K. Digitized by eGangotri

एवमातृवर्जनकानुसारेणोदयपार्वणद्वैमातामहश्रा
द्धंकुरुते प्रतिगृहीतसम्बन्धेनापिविवाहेसापिंड्यमी
मांसते व्याख्यानंचैतत्पारिजातनकृता ॥
असपिंडाचयामातुरित्यत्रदत्तपुत्रीयस्य माताभव
तीत्यादिगृहस्थरत्नाकरेविवाहप्रकरणे तस्मात्सि
द्धमेतत्प्रतिगृहीतसम्बन्धेनैवदत्तकस्यगोत्रंगोत्रा
नुगःपिंडःपिंडानुगंचाशौचमिति अथश्रुषे का
मोदकंसनाभिप्रत्तास्वस्त्रेयश्वशुरर्त्विजामिति याज्ञ
वल्क्ये अशौचप्रकरणे कामोदकमृत्विक्श्वश्रु
रसखमातामातुलभागिनेयादीनामिति पारस्करे
वान्येषामपिअादिशाह्यात् यद्युदकं कामयतेतदा
दद्यादिति कामनासमानन्यायेनदत्तकोपिश्वशु
तरैवैकस्यपिंडदानादिमोक्षकारकः आचार्यस्ये
वशिष्योनतत्सर्वजानामिति कृतोस्यगृहीत्यकु
लेनसहसापिंड्यंक्वचनदत्तगामिस्वर्गाशौचं
परंतवनोरमेषुपुत्रेष्वित्यादि वाचनिके अस्मे

सं वेति चेत् नैतत्सारं विज्ञायते बहूनां ज्ञायते इति वसि
श्रा॰ ष्ठेन सकृदमेवास्यौरसवत्सपिंडश्राद्धकर्तृतया त्रि
२०१ पुरुषपिंडदानेनच दत्तकस्य प्रतिगृहीतृसम्बन्धि
नां वहूनां पूर्वजानां त्राणमुक्तम् कामोदकदृष्टान्ते
तु कामोदकानां सर्वेषां मातुलाचार्ययोस्तथा अ
त्कमाश्रमीतानां नैव कार्या सपिण्डना किंतु त
स्य त्रिरात्रमशौचे द्वितीये त्वस्थिसंचयः तृतीये तु त
कं कृत्वा चतुर्थे श्राद्धमाचरेत् चतुर्थे श्राद्धप्रकारश्च
मनुपरिशिष्टे त्रिरात्राशौचिनां पिंडे श्राद्धपारस्करो
मुनिः प्रथमे दिवसे देयास्त्रयः पिंडाः समाहितैः द्वि
तीये चतुरो दद्यादस्थिसंचयनं तथा त्रींस्तु दद्यात् तृ
तीये कि वस्त्रादि क्षालयेत्ततः पको दिष्टं तु कर्तव्यं
श्राद्धकर्म ततः परमित्यादिवाक्याविचारात् त्रिरात्रा
शौचे मातामहादेर्यस्य कस्यचिच्चतुर्थे दिवसे गर्भदेहि
के श्राद्धं क्रियते तस्यैकपिंडमेव श्राद्धं न तु सपिंडीकरणं
तथैव संवत्सरोर्ध्वमप्येकोद्दिष्टप्रकारेणैकपिंडेनैव

201

© Dharmartha Trust J&K. Digitized by eGangotri

ननु पार्वणवत्त्रिपौरुषम् दत्तकस्यौरसवदेवनी
वेष्कृतिस्मृति सदाचारप्रामाण्यबलाद्गृहीतः
सपिंडनं पार्वणश्राद्धं च कुरुते मृतस्य च दत्तकस्य
पुत्रो गृहीतुरेव गोत्रमुच्चार्य तत्सम्बद्धसम्बन्धेनै
व सपिंडनमपि कुरुते यदि तु जनकस्यापि कश्चिद
न्यः पिंडदो नास्ति तदा तस्याप्ययमेव द्व्यामुष्या
यणीभूय श्राद्धं कुरुते दर्शितश्चायं क्रमस्त्रिपौरु
षेयत्वेन गदाधरपद्धतौ देवपालेन द्वितीयस्य प्रथमो
द्धृतं हविष्येरुपसि वाहनादिसिद्धम् सम्प्रदाने
श्वैणनिपरणं व्याख्यातमिति सूत्रे द्व्यामुष्याय
णस्य द्विधाश्राद्धं स्मृतिषूक्तं परिगृहीतृगोत्रे
ण जनयितृगोत्रेण कुर्यात् श्राद्धमयावेति तन्त्रे॰
ण तदा प्रदाने निरपरणो मन्त्रोहः कार्यः असमै
स्वधानम इत्यत्र प्रतिगृहीतृजनकयोः नाम चतु
र्थी द्विर्वचनान्तमुच्चारयितव्यम् देवदत्तयज्ञद
त्ताभ्यां स्वधा नम इत्यादि एकश्राद्धे वा पृथगन्नहि

© Dharmartha Trust J&K. Digitized by eGangotri

सं
ग्र
२२

द्वैपेकपिंडे द्वौ द्वावनुकीर्तयेत्ततिग्रहीतारं चोत्या
दयितारं चातरीयादिति प्रवराध्याये यद्वा एको
पिद्विमादिः पुत्रोभिधीयते कुलद्वये सम्बन्धभेदा
त्तत्रप्रतिग्रहीतुःश्राद्धे कृते जनकस्यश्राद्धं कुर्वाणः
सएव द्वितीयउच्यते इत्यादौ प्रथमोक्तं तद्दविषयैः
परिग्रहीतुःश्राद्धं कृत्वा तच्छेषाज्जनकस्यान्यैः
ब्राह्मणैःश्राद्धं क्रियते परिग्रहीतस्तत्पितुस्तत्पि
तामहस्येति एवं जनयितुस्पितामहस्येति एवं
मात्रादीनामप्यरस्त्रिकस्तत्रेणाज्ञेय इतिसिद्धं
अथयदिवदसि अपरार्कादिषु प्रसिद्धेषुनि
बन्धेषु अनौरसेषुपुत्रेषु भार्यास्वन्यगतासुच
औरसव्यतिरिक्तेत्वत्रजादिपुत्रेषुजातेषुच परि
णीतास्त्रियोभार्यास्तासु पुरुषान्तराश्रितासुच
मृतासुहोरात्रमाशौचम् चकारेणात्रपूर्वोक्तमहो
रात्रमनुकृष्यते ॥ प्रजापतिः ॥
अन्याश्रितेषुचारेषुपरपत्नीसुतेषुच ॥

© Dharmartha Trust J&K. Digitized by eGangotri

गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पिता सन्नि
धौ त्रिरात्रमसन्निधावेकरात्रमिति कल्पम् विष्णुः
अनौरसेषु पुत्रेषु जातेषु च मृतेषु च परपूर्वासु भा
र्यासु प्रसूतासु मृतासु च त्रिरात्रमित्यनुवर्तते ॥
मरीचिः सूतके मृतके चैव त्रिरात्रं परपूर्वयोः एका
हस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुः परः पूर्वः पतिर्य
स्या भार्यायाः यस्य च पुत्रस्य क्रीतादेः परः पूर्वः पि
ता तयोः परपूर्वयोरित्यर्थः तयोस्तु गुणवत्वे सन्नि
धौ वा त्रिरात्रमन्यथैकाहः नाशौचमित्यनुवृत्तौ
शंखलिखितौ अन्यपूर्वासु भार्यासु सूतकेषु मृते
षु वा नानध्यायो नोदकक्रिया ब्राह्मे गेरसंवर्जयेत्
स्नातु सर्ववर्णेषु सर्वदा देवजादिषु पुत्रेषु जातेषु
च मृतेषु च अशौचं तु त्रिरात्रं स्यात्समानमिति नि
श्चयः तथा पित्रा दत्ता तु या कन्या स्वातन्त्र्यादन्यमा
श्रिता यं यं श्रितवती भूयस्तस्या शौचं त्र्यहं त्र्यहम्
ग्दादावन्यत्रदत्तायां ऊढचिन्त्वयोर्द्वयोः पितर्यत्र

© Dharmartha Trust J&K. Digitized by eGangotri

सं रात्रं स्यादेकं तत्र सपिण्डिनामित्यादिर्यः स्मृतिर्वाक्य
प्र० संघातस्तेनौरसं तत्संपुत्रिकापुत्रं च वर्जयित्वा प
१०३ रेषु दशस्वेकादशसु वा पुत्रेषु वाचनिकमेव त्र्यं
हाशौचितं साध्यते कोर्थः सपिंडीकरणादिमू
लगवेषणेनेति अत्रोच्यते सन्त्येतानि वाक्यानि प
रमाप्तप्रणीतानि स्वस्वविषये प्रमाणानि न तु
भवदभिमतविषये तथाह्यस्मिन् याज्ञवल्क्या
दिवाक्यसमूहे औरसादिपुत्रजननमरणनिमि
203 त्तमाशौचं पितुस्त्रिरात्रं तत्सपिंडानामेकाहः स
द्यः शुद्धिर्वा विकल्पश्चायं गुणवत्त्वाद्यपेक्ष इति
सर्वैर्निबन्धकृद्भिः सादाब्रह्माभिधेयो योर्थो निश्च
त्यालिखित एव न चात्र कस्यचिद्विप्रतिपत्तिः
योर्थस्त्वत्राभिप्रेतो भवतः गृहीतसपिण्डजनन
मरणनिमित्ताशौचं दत्तकस्य त्र्यहमिति तं कश्चन
प्यात्राह्रियेत नह्ययमर्थः शब्दैरभिधीयते न च ल
क्षणया लक्ष्यते लक्षणाहेतूनाम्

© Dharmartha Trust J&K. Digitized by eGangotri

मुख्यार्थबाधादीनामभावात् परमार्थतस्तु औरः
सव्यतिरिक्तानां क्षेत्रजादीनां कलौ गर्हितानां ज
नने मरणे वा पितुस्त्रिरात्रं तत्सपिण्डानामेकाहः स
द्यःशुद्धिर्वा पितृतत्सपिण्डजननमरणाशौचं ते
षां पूर्णमेव एवं परपूर्वाणां स्त्रीणामपि भर्तृपक्षे
योज्यम् तथा च विष्णुः हीनवर्णानामधिकवर्णे
षु तदशौचापगमेन शुद्धिः तथा च पत्नीनां दा
सानामानुलोम्येन स्वामितुल्यमाशौचम् श्रुति
श्चात्रापि पुत्राणां हीनवर्णानामप्रत्तानां च योषितां
सपिण्डता हि विज्ञेया पितृपक्षे त्रियोरुषीत्यादि सा
पिण्डत्वे मरणमूलमेव त्र्यहाशौचम् क्षेत्रजानां ह
निवर्णत्वसादृश्यमनुपरिशिष्टे निर्दिष्टमेव अप
त्ये क्षेत्रजो नास्ति नियोगात्सम्भवो हि जायते शिष्टास्तु ना
नुतिष्ठन्ति नियोगं साम्प्रतं यतः अनियुक्ताः सुताः
सन्ति ते च शास्त्रबहिष्कृताः तथा संकरजातानामि
ति श्लोकेन वार्तिके अनौरसशब्दस्य औरसव्यः

© Dharmartha Trust J&K. Digitized by eGangotri

सं तिरिक्तानांदेवत्रण अश्वति अपविद्धान्तं सर्वेषांच
अ. चप्रतिनिधीनांवाचकत्वेसत्यपि अनेकार्थस्य शब्द
२०५ स्य वाचकत्वेनियन्त्रिते संयोगाद्यैरवाच्यार्थधीकृ
द्यास्ततिरञ्जनमित्यत्र संयोगो विप्रयोगश्च साहचर्य
विरोधिता अर्थःप्रकरणंलिंगंशब्दस्यान्यस्यसन्नि
धिः सामर्थ्यमौचितीदेशःकालोव्यक्तिःस्वरादयः
शब्दार्थस्यानवच्छेदेविशेषस्मृतिहेतव इतिदशा
रामलक्ष्मणाविति रामशब्दस्यानेकार्थस्य लक्ष्म
णशब्दमाह चर्याद्यथादाशरथ्यर्थाभिधायकत्वं
तथानौरसशब्दस्य प्रतिश्लोके परपूर्वादिशब्दमाह
चर्यात्कलिगर्हितपरपूर्वापत्नीसुतदेवजपौनः
भवकानीनसहोढपुत्रोत्पन्नाभिधायकत्वंसिद्धमे
वनतुगर्हितानीहशोत्पन्नदत्तकादिवाचकत्वमि
ति गर्हितांश्चैतान् पूर्वं बृहस्पतिः \ उक्त्वानियोगो
मनुनानिषिद्धःस्वयमेवतु युगक्रमादशक्योयंक
र्तुमन्यैर्विधानतः तपोज्ञानसमायुक्ताःकृतेत्रेतायुगेनराः

205

© Dharmartha Trust J&K. Digitized by eGangotri

द्वापरे च कलौ नृणां शक्तिह्रासनिर्विनिर्मिता अ
नेकधा कृताः धर्मा ऋषिभिस्तैः पुरातनैः नशक्यं
त्वधुना कर्तुं शक्तिहीनैरिदं नरैः पारचार्यमथर्मी
स्यामस्तात्तोक्तएवं गोलकोश्च श्राद्धेयाव भोज्यान्नो ते
व्रजाश्रमस्तत्तोस्तुभाः आदिशाह्नेन संग्राह्यानाह
तेव्रजे गर्हितः सद्भिस्तथा पौनर्भवः स्मृतः का
नीनस्य सहोढस्य शूद्रोत्पन्नस्तथैव च पुत्रैयप्त्री
कास्त्रः सर्गप्राप्तिकरावुभौ रिक्तपिंडास्तु दाने
न प्रथमौ तौ प्रकीर्तितौ इति गौरमधुत्रिकाथव
योः प्रथमतममभिधाय तदपेति तमथ्ये संज्ञयाम
हेतुका नगर्हितान पितृबृहस्पतिरेव दत्तोपविष्टः
क्रीतस्वयं दत्तः कृतस्तथा जातिशुद्धाः कर्मशु
द्धा मध्यमाः पूजिताः स्मृताः अपरार्कस्तु दपि स
र्वैवैवस्वतस्यायमानान्तरपरेति मन्यमानः अन्ये का
लौ निवर्तन्ते इत्यनुकृष्य दत्तौरसेतरेषां तु पु
त्रत्वेन परिग्रहः इति शौनकवचनं सर्वेमरत्वेन

© Dharmartha Trust J&K. Digitized by eGangotri

सं सिद्धान्तीकृत्य दत्तकौरसयोः ममकस्तत्तयास
प्र० र्वस्मिन्कर्मण्यर्हत्वमुक्तवान् अनुष्ठितं च तथैव
२०५ प्रामाणिकैः तथा परार्कें प्रनौरसप्रसंगे दे
त्रजादिषु पुत्रेष्विति यद्ब्रह्मपुराणवचनं तद
पि दत्तकजादिशब्देन प्रकारार्थे वर्तमानेन दत्तकजा
द्यास्ततोऽन्या इति वक्तव्ये सदृशा एव पारचार्य
सधर्म्मस्यादित्येवं प्रकाराः पौनर्भवादय एव संग
हीताः नचादिशब्दस्य प्रकारार्थकथनमपूर्वं तत्रै
205 नशासनम् तथाहि भूवादयो धातव इति सूत्रेऽस्य
विवृतिं नेन्द्रः आदिशब्दः प्रकारे प्रकारः सादृश्यं
तत्सुनः क्रियार्थतयेति भू इति गणपाठपठिताः
वा गतिगन्धोपादानयोरिति प्रकारेण क्रियाव
चना ये शब्दास्ते धातुसंज्ञा इति व्याख्यातवान्
सर्वा चेयं वाचोयुक्तिरभियुक्तजनयाप्ता प्रतिरूप
सकलमुनि मताभिप्रायसंग्रहरूपमनुपरिशिष्ट
प्रकारो १०
दृष्टप्रमाणं तथाच मनुपरिशिष्टे पंचमेऽध्याये शौच

© Dharmartha Trust J&K. Digitized by eGangotri

अनौरसेषु पुत्रेषु जातेषु च मृतेषु च परपूर्वासु
भार्यासु प्रसूतासु मृतासु च भार्यास्वन्यगतासु
वै त्रिरात्रेण विशुध्यति गोत्ररिक्थं जनयितुर्न भ
जेद्दत्त्रिमः सुतः गोत्ररिक्थानुगः पिंडो व्यपैति
ददतः स्वधा अनौरसास्त्वनेपुत्राः परपूर्वासुता
न क्षेत्रजाद्याः मातृचर्यात्परपूर्वादिभिः यतः ते
क्षेत्रजो दत्तकः क्रीतो दत्तात्मा कृत्रिमस्तथा गृहीतः
पिंडदाः पंचरिक्थगोत्रहराश्चापि गोत्ररिक्थ इति
श्लोके वक्ष्योदत्तकः क्वचित् उदितो दत्त्रिमस्त
स्मात्पंचानामेतदुच्यते तस्मादेतेऽप्रसूतावामृता
वाशौचकारिणः गृहीतस्तत्सपिंडानां कात्यायने
वयथौरसः यस्त्वदत्तास्तेद्व्यामुष्यायणवत्
किल द्वयोः ऊर्ध्वं सपिंडानामशौचं कुलयोस्तदे
ति बृहस्पति नागर्हितत्वेन संख्यातस्यापि तेत्र
जस्यात्र दत्ताद्यैरनिर्दिष्टैः महोक्तिर्युगान्तरपरत्वेन
व्यवस्थितेति नान्येषु हृषणावकाशः युगान्तरव्यव
स्थाहृत्त्वपूर्वैव नवास्य मनुपरिशिष्टस्यानार्षेयत्वमा
शंकां तथाहि ।

© Dharmartha Trust J&K. Digitized by eGangotri

सं प्रथमस्तूपोद्घात एव प्रतिपादितमपरार्कोक्त
ग्रं तास्य ग्रन्थस्य षड्विंशात्स्मृतिसमशीर्षिकया ध
२०६ र्मशास्त्रत्वेन प्रामाण्यम् । अविरोधित्वाच्छ्रुतिस्मृ
त्यन्तरोपबृंहकत्वाच्छिष्टपरिग्रहीतत्वादाप्तोक्त
त्वाच्चतुर्विंशतिमतमत्रपरिशिष्टादयोपि ध
र्मशास्त्रत्वेन ज्ञेया इति सिद्धिः ॥
गौतमस्तु गौण्यथा चैवं सपिंडसोदकसगोत्रसंज्ञक
विषयत्रये शौचस्य संसर्गाद्यहःसद्यःशुद्धिभेदे
न तत्तत्कालावधित्वसिद्धेः श्रुतिस्मृतिसदाचारवे
206 प्रसिद्धेपि मृतेष्वाजीवत्स्वपूर्वेतरेषु जीवतामेव
क्रियार्हत्वानर्हत्वप्रयोजकतया सपिंडादिसंज्ञा
संज्ञितेषु लेपभाजश्चतुर्थाद्या इत्यादि मात्स्योक्ते
त्वानवबोधात्पस्तु मृतेषु पिंडभागिषु सप्त
मस्य पिंडदस्य सापिंडसंज्ञित्वमस्तीति षष्ठे पिंड
भागिनि सप्तमे च पिंडदातरि जीवति पूर्वपूर्व
तरपिंडदानापेतया सप्तमस्य स्वगोत्रजैः सहसा

© Dharmartha Trust J&K. Digitized by eGangotri

पिंडंननिवर्त्ततेनच पुनः मोदकत्वंप्रवर्त्तते अतःपु
नरस्यहाशोचित्वमिति विप्रतिपत्तितिमिरान्धबोधना
यसहृदयावर्जकंकिमपिविस्तारयामः इहहिपिंड
शब्दस्यसद्भावेर्थोपिंडोदेहः निवाप्यतिलादष्टाङ्गस्य
पिंडः तथाच मृतेपुत्रनिवाप्यपिंडान्वयापेक्षयासा
पिंडगणनाजीवत्सुतुशरीरान्वयापेक्षया गण
नाप्रकारस्तु सितादरायां पित्रादयः षट् पुत्रःस
प्तमः पुत्रादयःषट् आत्माच सप्तमइति सन्तानभे
देपियतःसन्तानभेदस्तमादायगणायेदिति एवमे
वपारिजातेपि तस्माद्यत्केनदिदहष्टश्रुतिस्मृति
वाक्येनपित्रादय एवोर्ध्वक्रमेणसप्तमाष्टनवे
तिगणितास्तदुन्मत्तप्रलपितमिवोपहसनीय
मेवमतिमतां तथाहि श्रवघट्टचदीपुत्ता

इत्यस्यवाक्यार्थस्य समुदायाश्रितोयंक्रमः शि
ष्टाहिष्टंकिमपिरहस्यं प्रादुर्भावयति सप्तमस्य

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प्र
२०७

दिवः पतनहेतुतयैव ज्ञातस्य प्रायश्चितत्वादशौ
चित्वात्कर्मानर्हत्वमिति इयंच पित्रादिः प्रपौत्रान्ता पु
त्रादिपित्रन्ताचेति क्रमद्वयेन गणना एकतरपदेव
इष्टुम्नतेषु परस्परंजीवत्स्वयथा नाव्याप्तत्याप्ती
स्यातामित्येवमर्था तथाच शुद्धिचिन्तामणौ वाच
स्पतिः सपिंडता सर्वेषां गोत्रतः साप्तपौरुषी पिंडश्चो
दकदानं च शौचाशौचं सदानुगम् इति शंखवचने
गोत्रं सन्ततिः तेनबीजिनमारभ्य सप्तमपुरुषमभि
व्याप्य सर्वेषां सन्तानिनां सन्तानानां चान्योन्यं साापिं
ड्यमेकस्यापि सप्ताधिकत्वे तेन सं सप्तमान्तर्गतस्या
पि सापिंड्यं निवर्तते संयोगवडुभयनिष्ठत्वादि
ति तदेवं निवाप्य पिंडान्वयेन भाविनिभूतवदुप
चार इति न्यायात्सन्तानानां वाजीवतां सप्तावधिका
नां सप्तमसमंजितेष्टमनवमदशमानां सोदकसंज्ञे
ते तः परं सगोत्रसंज्ञितेवास्थितेपिपादिजानेतु
निवाप्य पिंडान्वयेन सापिंड्यगणनायाम्

© Dharmartha Trust J&K. Digitized by eGangotri

कल्पनागौनवात्परिहरणीयताव्यापितालाघवा
च्छरीरान्वय एवस्वीकृतः तथाच सितान्तराया
मपि असपिंडांयवीयसीमिति विवाहप्रकरणे
समानएकःपिंडोदेहोयस्यास्मासपिंडानसपिंडा
सपिंड्यंचैकशरीरावयवान्वयेनभवति तथाहि
पुत्रस्य पितृद्वारेणतच्छरीरावयवान्वयः निवा
प्यपिंडान्वये ततमातृसन्तानेमातृमातुलप्रभृ
तिषुसापिंड्यंनस्यादिति तथाचात्रैवश्राद्धप्रकर
रणेसपिंडीकरणेयोपिप्रमीतमात्रेप्रेतश्राद्धःसो
पिभूतःसर्वगत्यासपिंडतात्रपुरुषेसममेवविनिव
र्तते इतिचतुर्थस्यपिंडत्रयव्यापित्वं पंचमस्यापि
ण्डद्वयव्यापित्वं षष्ठस्यैकपिंडस्य चतुर्थव्यापिता
द्वितीयस्य पंचमव्यापितात्तृतीयस्य षष्ठव्यापि
त्वात्सममेवविनिवृत्तिरित्येवमुपपद्यते इत्युक्तत्वा
नः अपिच निवाप्यपिंडान्वयेनसापिंड्यनव्या
पकत्वात् अपित्वेकशरीरावयवान्वयेनेत्युक्तं

© Dharmartha Trust J&K. Digitized by eGangotri

सं अव्यापकत्वं चात्र हेतोः प्राप्तीयप्रसिद्ध्यातिव्याप्त्य
अ० व्याप्त्योः संभवः तथाहि यत्पर्यन्तो निवाप्यपिंडदा
१०८ तृत्वदेवतान्वयः तत्रतावत्सापिंड्यं ततः परं विनिव
र्तते अतोजीवत्पितृपितामहादेरष्टमस्यापि
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्सपिंडक इति स्या
येन स्वगोत्रजैः सह सप्तमान्तर्गतत्वमेव संभवती
ति विप्रतिपन्नविवादे जीवन्देवदत्तः तत्पितृपि
तामहादयश्चमृताः परस्परं सपिण्डाः निवाप्य
पिंडलेपषङ्कदातृत्वदेवतान्वयादिति प्रमाणा
र्थः अत्रच यत्रयत्रनिवाप्यपिंडलेपषङ्कदातृत्वदे
वतान्वयः तत्रतत्र सापिंड्यं यत्र सापिंड्यं नास्ति तत्र
तत्रनिवाप्यपिंडलेपषङ्कदातृत्वदेवतान्वयोना
स्तीति निवा पिंडलेप षङ्कदातृत्वदेवतान्वयस्य हेतोः
सापिंड्यस्य साध्यस्य साधनेनान्वयव्यतिरेकाभ्यां व्यापक
त्वं वाच्यं तच्चात्र न संभवति अव्याप्त्यतिव्याप्तिदूषित
त्वात् तथाहि भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य
एव वा सपिंडीकरणं कुर्यात्तत्र हीनेऽस्ते सतीति विषये

208

© Dharmartha Trust J&K. Digitized by eGangotri

अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनमित्यस्मि

न्विषये चाव्याप्तिः यथा भ्रातृश्राद्धपिंडदस्य भ्रात

र्मुख्यावस्थायां सपिंडैः सह समानान्तर्गतस्यापि भ्रातृ

पिंडस्य मृतपितृपितामहाद्यैर्योजनयायः पंचमः

स षष्ठीभवति षष्ठश्च सप्तमीभवतीति भ्रातृपुत्र

समानकक्षान्यायात्तत्रात्मा चास्याष्टमः निवाप्य

पिंडान्वयस्याष्टेव समाप्ते नित्यव्याप्तिः एवमेवा

पुत्रायाः पत्न्याः पिंडदस्य भर्तुरपि योज्याः अपि वा

भिस्तु मृते पितरि स्वगोत्रजैः सह समाधिपितामह

स्य पितामहयोरेकतरस्मिन्द्वयोर्वा जीवतोः यस्य

पिता प्रेतः स्यात्पितामहो जीवेत्स पित्रे निधाय पि

तामहात्परं द्वाभ्यां दद्यादिति विष्णुस्मृतिवाक्या

र्थतः जीवत्परदीयमानपिंडान्वयेन कदाचिदपि

सापिंडं न निवर्तते इत्यतिव्याप्तिः ॥ तस्मात्पुत्र

स्याष्टमस्यापि जीवतोः पितृपितामहयोः सतोः

पितामहयोः सतोः पितामहत्यज्यमानपिंडापे

© Dharmartha Trust J&K. Digitized by eGangotri

सं.
श्र.
२.९

तयास्मापिद्यानिवृत्तेः गोत्रजानां पतिमरणाशौच
कारित्वंसूतकमृतकयोः नतुशरीरावयवान्वयात् दृष्ट
मस्यापि सोदकसंज्ञाप्राप्तौत्र्यहाशौचकारित्वम्
देवात्पितृपितामहाभ्यां पूर्वंमृतस्यास्य तथैव स
पिंडीकरणप्राप्तेरिति यत्केनचित्कल्पितं तन्नि
र्मूलमेव प्रबन्धकारैरेतादृशविषयेस्याःशंकायाः
निवर्तनात् तथाच ब्राह्मणानामेकपिंडस्वधा
नामिति सुमन्तुवचने शुद्धिचिन्तामणिविवेचि
ते दर्शयिष्यामः तथाच स्मृतिकारैः सपिंडसो
दकशब्दयोर्थवाचिकत्वात्संशयितेपि एकश
रीरावयवान्वयपरं संज्ञाद्वयंसनाभिसकुल्यप
र्यायंपरमेवकृतंजीवत्संस्यर्थे अपिचायमज्ञान्य
त्यष्टव्यः व्युत्क्रममृतस्यास्यभवत्यदेपिण्डदान
क्रमोयं तात्त्विकोनात्त्विकोवा तात्त्विकश्चेत्तदनुका
लान्तरात्मीतयोरपि पितृपितामहयोरस्यसपिं
डीकृतक्रमेणैवोद्दिश्यमानत्त्विपोरुषपिंडदानक्रम :

209

© Dharmartha Trust J&K. Digitized by eGangotri

प्राप्नोति नतस्त्वेनतिजेन पितृपितामह पूर्वक्रमे
ण तथाचायं पैतामहो द्वितीयो भ्रातेवसिद्धः प
तदीया पुत्रपौत्रादिसन्ततिरवाचीनापिकदाचि
त्प्राचीनत्वंनजहाति उपरितनसपिण्डीकरणक्र
मेणैवगणनीयत्वात् प्रथत्रूषे एवमस्तु तत्रतथा
चास्यव्युत्क्रमस्तस्य कलान्तरे यथाक्रमेजातन
कादिपूर्वविधिश्रेन्नातिष्ठीयते तर्हिशिष्टादिषुः
सर्वएवक्रमोविपर्यस्याति तथाहिव्युत्क्रमस्तवि
षयेपारिजातः मृतेपितरियस्याथविद्यतेचपिता
महः तेनदेयास्त्रयः पिंडाः प्रपितामह पूर्वकाइति
वाक्योक्तविधिनाचतुर्थ्यादिभ्योतिव्याप्यासपिंड
नेकृतेपि पुनः पूर्वसपिंडनव्याप्तिमेवातिदिश
ति स्मृत्यन्तरः त्रयाणामपिपिंडानामेकेनापिसपि
ण्डने पितृत्वमश्नुतेप्रेत इतिधर्मोव्यवस्थितः अ
स्यार्थः त्रयाणांपितामहादिपिण्डानांमध्ये ए
केनापि पितामहपिंडेनवा सहपूर्वेपूर्वेजीवति

© Dharmartha Trust J&K. Digitized by eGangotri

सं पितुः सपिंडने कृते प्रेतः पितृत्वं वसुत्वं प्राप्नोतीत्यर्थः
प्र॰ मनुः वसून्वदन्ति हि पितॄन् रुद्रांश्चैव पितामहान् प्र
११० पितामहांस्तथादित्यान् श्रुतिरेषा सनातनी श्रुति
श्चाह ब्राह्मणे वसवः पितरो रुद्राः पितामहा आ
दित्याः प्रपितामहास्तस्माद्देवाः पितरः पितरो दे
वा इति नदन्तेः कृतसपिंडनस्य कालान्तरेण यथा
प्राप्तं सुख्यसपिंडीकरणं कार्यमापतेदिति शंकाप्य
नेन वचनेन दूरीकृता तथा चापरार्केऽपि विष्णुपुराणं
ततः पितृत्वमापन्ने तस्मिन्प्रेते महीपते श्राद्धधर्मैरशेषै
210 स्तत्र पूर्वान्नर्चयेत्पितॄन् न च तदर्थं पिंडं गच्छतीत्या
दि निषेधात् एवमेव सितादतरायासपि सर्वत्र पितृ
भ्यः पितामहेभ्यः प्रपितामहेभ्य इत्येव प्रयोगे
न पुनः कदाचिदपि पितामहस्य वा दितं वृद्धप्रपिता
महस्य। प्रपितामहस्य। तत्पितुर्वा तत्त्वं प्रेतत्व
पित्रादिश्राद्धानां सम्बन्धि श्राद्धात् पितुः पितृभ्यः
पितुः पितामहेभ्यः पितुः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रपितामहेभ्य इत्यूहोनभवति पितामहे भ्रियमा
णे पितामहस्य पितृभ्यः पितामहस्य पितामहेभ्य
इत्यादीनामूहोनभवति पिंडपितृयज्ञे तथाश्रुत्य
तो पितर इत्यादि मन्त्राणामूहोनभविष्यतीति ॥
सुतः सपिंडीकरणंनकुर्याद्यदि सोहितः यावज्जीव
तिङः खातोंस्ततोनरकस्याद्दयादिति प्रेतानामिह
सर्वेषांयेमन्त्रेश्चनियोजिताः कृतान्नास्तेहिसंबन्धाः
सपिंडीकरणेकृते प्रेतत्वात्रहनिर्मुक्तः पात्राः
पितृगणेप्रतीत्यादिस्मृति वचन पर्यालोचनया
व्युत्क्रममृतस्यापि पित्रादेरवश्यकरणीयं सपिंड
नं तत्रश्रुत्यक्रमागमिगोणस्याश्रयणीयतयाप
द्दर्मसामान्येनानुकल्पतयाजीवतयापद्दर्मसामा
न्येनानुकल्पतयाजीवत्परैःद्विजैः सहकृतंकाल्पनि
कत्वादोपचारिकसेवालव्यदेहस्यापर्णोभुक्तमा
ह इवोर्ध्वदेहिकविधिप्राप्तयेस्थितमिति पुनः
कालान्तरेणायथावास्थितोनिजजनकक्रमसम्ब

© Dharmartha Trust J&K. Digitized by eGangotri

सं क्रमएवग्राह्य इतिचेद्ब्रवीषि सत्यमेतत् तर्हि
प्र यंप्रमारणार्थः सम्पन्नः भ्रातावा भ्रातृपुत्रोवासपिं
२११ डःशिष्यएववा सपिंडीकरणंकुर्यात्तदहीनेऽस्मे
सति तथा सर्ववन्धुविहीनस्य पत्नीकुर्यात्सपिंडने
ऋत्विजंकारयेद्वापि पुत्रोहितमथापिवेत्यादिवच
नात् असपिंडस्याप्यन्यवंशजस्य शिष्यादेराचार्या
दि पिंडदाने प्रवृत्तस्यान्यस्य मानपितृदातृदेवत्वान्व
येनाचार्यसपिंडैः सहसापिंड्यमाशौचादिषु यथा
२८॥ नगण्यते तथास्यापिनगणनीयम् किंतु सर्वत्रै
वम्प्रकाराभिमतेनतात्विकेन शरीरावयवान्वये
नैवाशौचादौसापिंड्यमोदकत्वादिगणनीयमिति
सिद्धएव प्रसिद्धनसोमार्गोमार्गणीयोमनीषि
णाम् एकशरीरावयवान्वयेनसापिंड्यस्यपूर्वं
नाव्यति व्याप्तिदोषः तत्कृतानांजीवतांचाऽ
व्यभिचारि तदेतत्सर्वंचेतस्यभिसन्धायश्रु
द्धि चिन्तामणिकृत् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पिण्डः शरीरमित्याद्युक्त्वा निजवाक्य उपसंहृतवा
न् यथा अत एव सापिण्ड्यशरीरावयवान्वयेनै
वोक्तं तस्यैव पिंडदानादितन्त्रत्वात् नहि सपिंड
दानान्वय एव शरीरावयवान्वये तन्त्रमिति युक्ति
मदित्यादि लिखित्वा सिद्धान्तितवान् यथा मनुः
सपिंडता तु पुरुषे सप्तमे विनिवर्तते समानोद
कभावास्तु जन्मनाम्नोरवेदने सप्तम इति मृतानां
मध्ये सप्तमे तेन पिंडदातृत्वमित्यर्थे यद्वा जीवतां
मध्ये सप्तमध्ये सप्तमे सति बीजितोऽष्टमे विनिवर्त
ते इत्यर्थः तदत्र पिंडितार्थोऽयम् यस्य द्वौ त्रयो वा
जीवन्ति तत्र सपिंडपदस्य शरीरावयवान्वया
त् तस्य बीजितोऽष्टमस्य स्वगोत्रजैः सह सापिंड्या
त्समानोदकया अष्टाशेषाचित्रमेवेति सिद्धम्
निर्णये चास्य निबन्धकृतः प्रतिज्ञा एकस्य सप्ता
धिकत्वे तेन समं समानगतस्यापि सापिंड्यनिव
र्तते इति तदियतास्य परितुष्टः वाचस्पतिः

© Dharmartha Trust J&K. Digitized by eGangotri

सं ब्राह्मणानामेकपिंडस्वधानामादशमाहर्मविच्छि
स त्तिः आत्रतीयात्स्वधाविच्छित्तिः आसप्तमाद्दिक्त
२१२ विच्छित्तिर्भगवति अन्यथापिंडक्रियाशेषेचक्रिया
पुच्छेदाद्ब्रह्महतत्योभवतीति सुमन्तुवाक्ये यस्य
कर्तस्वयोजीवन्ति तस्य दशमपर्यन्तमेकपिंडा
न्वयइति रत्नाकरोक्ते अन्नेथ्यारोपापवादन्या
येनहरुपितादेशान्वयमेवगृहीतवान् एकपिं
डस्वधानामिति निरूपजीयेकपिंडस्वधान्वयिनः
धर्मोशौचादिः आदशमाहशमात्परतः अत्रच
दशमपर्यन्तमेकपिंडान्वयोनेत्याशंक्य यस्यक
र्तस्वयोजीवन्ति तस्यैकपिंडान्वयइति रत्नाकरे
रागोक्तमा सप्तमादिति चिरविदेशस्य पश्चादाग
तदायादपरं आत्रतीयात्स्वधात्रपिंडः अन्यथे
ति चतुर्थादवान्पिराद्वस्य सप्तमाद्वोगपनस्य एकाद
शादर्वागशौचस्यच निवृत्तेतत्र्कपर्यन्तमुक्तं विशे
षणायतो ब्राह्मणानां सापिंडे संपूर्णशौचं स्यादे
तद्वचनवलादिति चेत् ।

212

© Dharmartha Trust J&K. Digitized by eGangotri

एवं सत्यनीदृशानां तत्त्रियादीनां सप्तमाद्यन्तरे थ
नविच्छेदः स्यात् विशेषाभिधाने स्वरसात् नैव
तद्विशेषणं धर्मविच्छित्तिमात्रपरमग्रिमयोरपि
समन्वयात् कांतायामतदन्वयस्यापरिहार्यत्वात्
अष्टभाव्यन्तरे दायनिवृत्तौ वाक्यान्तरविरोधः स्या
दिति चेत् तुल्यं अत्रापि सप्तमोत्तरं सप्तमान्तु दू
तौ बहुवचनविरोध इति तस्माद्भ्रातॄणामिति
एकपिंडस्वधानामिति द्वयमपि पञ्चमान्तवा
दः तेन दशमपुरुषपर्यन्तमाशौचं किंतु वाक्या
न्तरैकवाक्यतया आसप्तमसंस्पृष्टाशौचं तत्र आद
शमं त्र्यहं तदतिक्रम एव पापोद्देशः इत्येवमवि
रोधेन रमणीयमिति अत एवैतद्वचनालिखना
नन्तरमपि रत्नाकरादौ सर्वनिबन्धसाम्ये पौरुष
मेव सपिंडत्वमसंकोचेनैवोपगतमिति अत्रह
न्त्वेवमिति वाक्ये अतस्मिन्नपि रज्जाविव सर्पत्व
मसपिंडे सापिंड्यमध्यारोप्य पुनः नायं सर्पो रज्जुरे

© Dharmartha Trust J&K. Digitized by eGangotri

से वाद्यमिति वदशाहमस्य सापिंड्यमपवदति एवं
स सतीत्यादि वाक्यानां वाचोयुक्त्या अत्रायमर्थः यद्ये
२१२ कपिंडस्तथानामिति विशेषवलाजीवत्क्षत्रियाणां
दशमपुरुषपर्यन्तंनिवाप्यपिंडान्वये परिपूर्णाः
शौचभागित्वं तद्वास्मिन्नेववचने ब्राह्मणानामित्ये
वोक्तेः क्षत्रियादीनामपि यद्याश्चिरविदेशास्यप
श्चादागतस्य द्वितीयस्य वा तृतीयादेः सप्तमाभ्यंत
रस्यापि दायोनावतिष्ठतेति तस्माद्ब्राह्मणानामिति
एकपिंडस्तथानामिति द्वयमपि एतन्मात्रानुवादः
तेनदशमपुरुषपर्यन्तमशौचं किंतु वाक्यान्तरैक
213 वाक्यतयापूर्णाशौचमासप्तमं तत्र आदशमंत्र्यहं
तदतिक्रमएव पापोद्देशः इति सिद्धान्तः अत्रा
यं प्रमाणार्थः अशौचत्वंनामसामान्यंगोत्वमि
वैकमनेकव्यक्तिवृत्ति तस्मादेकाहत्र्यहः पूर्णा
शौचादयोशौचव्यक्तयः सर्वत्राशौचत्वंनामसामा
न्यंतुल्यमेव गोत्वमिव गोव्यक्तिषु एकाहत्वादिवि

© Dharmartha Trust J&K. Digitized by eGangotri

शेषस्तुव्यक्तिभेदाद्गोव्यक्तीनामिव शाबलेयादिभे
दाः परस्परव्यक्तिविवेकाय लोकव्यवहारायेति सि
द्धिः अथद्वासप्ततिश्राद्धकालाः ॥ चैत्रे अमा १ मीने
र्कः २ शुक्लपक्षतृतीया औत्तममनुः ३ रुद्रमनुः ४
वैशाखे अमा १ श्राद्धपिंडरहितं मेषेर्कः २ शुक्लतृतीया
त्रेतायुगं ३ पू॰ अनन्तिका ४ ज्येष्ठे अमा १ वृषेर्कः २
पौर्णमास्यां सावर्णिकमनुः ३ आषाढे अमा १ मि
थुनेर्कः २ अमा दक्षो मनुः ३ शुक्लदशमी वैवस्वतमनु :४
पूर्णिमा अनन्तिका ५ श्रावणे अमा १ कर्कटेर्कः २
अमा रैवतमनुः ३ भाद्रे अमा १ सिंहेर्कः २ अष्टम्यांस
र्यो मनुः ३ त्रयोदशी कलियुगे ४ शुक्लतृतीया ताम
समनुः ५ आश्विने अमा १ कन्यार्कः २ शुक्लनवमी
स्वायंभुवो मनुः ३ अपरपक्षदिनानि षोडश ४ का
र्तिके अमा १ तुलार्कः २ अष्टम्यां ब्रह्ममनुः ३ शुक्लद्वा
दश्यां स्वारोचिषः पूर्णिमा अनन्तिका ५ शुक्लनव
मी कृतयुगं ६ मार्गे अमा १ वृश्चिकेर्कः २ पौषे अमा १

© Dharmartha Trust J&K. Digitized by eGangotri

सं धनुष्यर्कः २ अष्टम्यामष्टका ३ नवम्यामन्वष्टका ४
२१४ शुक्लैकादशीचाक्षुषीमनुः ५ माघे अमा १ द्वापरं २
मकरेऽर्कः ३ अष्टम्यामष्टका ४ नवम्यामनुष्टका ५
शुक्लासप्तमीमनुः ६ पूर्णिमा अनन्तिका ७ फाल्गुणे
अमा १ कुंभेऽर्कः २ अष्टम्यामष्टका ३ नवम्यामन्वष्टका ४
पूर्णाधर्मोमनुः ५ पितृश्राद्धं ४ मातृश्राद्धं २ ग्रीष्मेव
वान्नं १ शरदि नवान्नं २ पर्वश्राद्धसमतिः १२ चै ४ वै ४ ज्ये ३
आ ३ भा ५ आश्व १९ का ६ मा २ पौ ५ मा ७ फा ५ नवान्नं २
पित्रोः श्राद्धदिनं २ पर्वं १२ पौषकृष्णाष्टम्यामष्टका
श्राद्धं सांवत्सरिकावदष्टका अत्रनवम्यामन्वष्टका
श्राद्धं माघकृष्णाष्टम्यांमध्यमपंचके नाष्टकाप
काष्टका अनन्वष्टका २ देवाग्रावाराणइति सर्वत्रस्था
लीपाकेन ततऽपहोमः पंचकृष्णीरत्र ज्योतिष्म
ती २ विषान्नमानं २ शुक्लर्षभाः ऋतत्वांपत्नीस्त्रुवे
णाज्यहोमः अत्रनवम्यामनेनमध्यमपंचके नाष्टका
पक्षे र्षेनन्वष्टकानवदेवतं श्राद्धं फाल्गुणकृष्णाष्टम्या
मष्टकाश्राद्धम् ।

© Dharmartha Trust J&K. Digitized by eGangotri

उन्नमपंचकेनाष्टकातथा पितृभ्योऽन्नष्टंतिवमासि
आज्यभागान्ते अभूत्ननः १प्रथमाह्व्यः देवाग्राव
ण२इति सर्वत्रस्थालीपाकेनहोमः ततआज्येनपं
चभिः स्रुवेणोपहोमः ऋतस्यथाम पकाष्टका
अनानुज्ञा अभूत्ननाः प्रथमाह्व्यवासमा द्वादश
दैवतम् अस्यांनवम्यामन्वष्टकाश्राद्धं अनेनोन्नमं
पंचकेनाष्टका नवदैवतंश्राद्धं षड्दैवतन्वष्टका
अमावस्याः १२ तेष्वमावस्याश्राद्धेषून्नमपंचकेना
ष्टका अभूत्ननाः १प्रथमाह्व्य २ देवग्रावण३इति
सर्वत्रस्थालीपाकेनहोमः ततआज्येनपंचभिः
स्रुवेणोपहोमः ऋतस्यथाम १पकाष्टका २अना
नुज्ञा ३ अभूत्ननः ४ प्रथमाह्व्यवासमा ५ षड्दैव
तंश्राद्धं पकविंशत्यन्वष्टका संक्रांति श्राद्धानि १२
सांवत्सरिकवदष्टका द्वादशदैवतंश्राद्धंपिंडरहि
तं मन्वन्तरश्राद्धानि १४ सांवत्सरिकवदष्टका
द्वादशदैवतंश्राद्धं पिण्डसहितं कन्यागतश्राद्ध

© Dharmartha Trust J&K. Digitized by eGangotri

सं नि ९९ अत्रपंचदशश्राद्धेष्टिसहित्वमावस्यां ताव
म त्सांवत्सरिकवदष्टका षोडशेश्राद्धे शुक्लप्रतिपदि
२१५ स्वकर्मणः वैकेचघ्ना चूतवतीभुवनायातेथामाति
इतिस्थालीपाकेन तत उपहोमः ज्ञातायुथाय इमे
चत्वारो वसन्तो ग्रीष्मो संवत्सराय इयंस्वस्ति चतुर्थे
गेषुसांवत्सरिकवदष्टका द्वादशदैवतंश्राद्धम् ॥
वैशाखस्यतृतीयायांनवम्यांकार्तिकस्यच श्राद्धंअ
याद्य शुक्लायांसंक्रान्तिविधिनानरः वैशाखस्यशु
क्लपक्षतृतीयायांत्रेतायुगश्राद्धं कार्तिकशुक्लपक्ष
नवम्यां कृतयुगश्राद्धं एतच्छ्राद्धद्वयंपिंडरहितम्
विष्णुपुराणे वैशाखशुक्लपक्षतयातृतीयानव
म्येमीकार्तिकशुक्लपक्षे नभस्यमासस्यच कृष्णप
क्षे त्रयोदशीपंचदशीचमाघे एताश्चतस्त्रस्तिथ
योयुगाद्याद्दत्तंहुतंचास्त भवेदनन्तं तथाचास्य
टीका माघपंचदशी कृष्णपक्षेमावस्येत्यर्थः ॥
अतएवापराकेपि कृष्णपक्षइति ॥

215

© Dharmartha Trust J&K. Digitized by eGangotri

त्रयोदश्याः पंचदश्याश्च विशेषणमिति तथा च ॥
विष्णुपुराणमेव वक्ष्ये श्लोके तथा कृष्णो गुणादीन्गुन
योविदुः श्लोके सर्वाह्निके ग्राह्ये कृष्णो ग्राह्ये पराह्णि
के तथा च विष्णुपुराणमेव उपप्लवश्चन्द्रमसौर
वेष्टतिश्चाष्टकाश्चायनद्वयं च पानीयमप्यत्र ति
लैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः इति पत्नी
कार्यां कर्मवचने मार्गशीर्षे तथा पौषे माघमा
से तथैव च तिस्रोऽष्टकाः समाख्याताः कृष्णपक्षे
षु सूरिभिः अपरार्के चतुर्दश्यष्टमी पर्वप्रतिपद्व
र्जितेषु च वेदाङ्ग न्यायमीमांसा धर्मशास्त्राणि वाच
येत् पितृगेहे तु या कन्या रजः पश्येदसंस्कृता भ्रूण
हा तत्पिता ज्ञेया वृषली मातृकन्यका यस्तां परिण
येन्मोहात्स भवेद्वृषलीपतिः अपरार्के पात्रापात्रवि
चारे यमः गौराववातृषिकाद्वष्टाः परस्वानां च नाश
काः चातुराश्रम्यबाह्याश्च विज्ञेयाः पङ्क्तिदूषकाः
येऽपेताः स्वकर्मभ्यः स्तेनास्ते परिकीर्तिताः कार्यं

© Dharmartha Trust J&K. Digitized by eGangotri

सं ददाति यस्तेभ्यस्तस्य तत्पात्यनश्यति ज्ञानपूर्वं च ये
तेभ्यः प्रयच्छन्त्यल्पमेधसः पुरीषं भुञ्जते सर्वे शातेव
३९६ र्षाण्यमुत्रते तस्माद्धि दातृकामेन दैवं श्राद्धं च सर्वशः
प्रशान्तेभ्यः प्रदातव्यं नाशान्तेभ्यः कथञ्चनेत्यादि
प्रसंगे देवलः प्रेष्यग्रामस्य राज्ञश्च कुनखी श्याव
दन्तकः प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा
वार्धुषिः निषिद्धवृद्ध्युपजीवी निषेधश्च यथा
यत्तु गृह्णन्त्यमर्घार्थे यः प्रयच्छति सर्वैर्वार्धुषिकेना
216 मन्त्रस्तु वादिभिर्गर्हितः मनुः सोमविक्रयिणो वि
ष्ठाभिषजे पूयशोणितम् अप्रतिष्ठं वार्धुषिके नष्टं
देवलके भवेत् भस्मनीव हुतं हव्यं तथा पौनर्भवे
द्विजे चन्द्रविंशतिमते अनुपनीताः पित्रोः स्वधानि
र्वपणादृते मंत्रान्नब्रूयुः तथा च गौतमः न ब्रह्माभि
व्याहारयेदन्यत्र स्वधानिर्वपणादिति मनुरपि नह्यस्मि
न्युज्यते कर्म किंचिदामौञ्जिबन्धनात् नाभिव्याहार
येद्ब्रह्म स्वधानिर्वपणादृते इति स्वधानिर्वपणादि

पित्र्यस्य सर्वस्य कर्मणा ऽपलक्षणम्‌ अन्यत्रोद॰
ककर्मस्त्वथापितृसंयुक्तेभ्य इतिवृद्धवसिष्ठोक्तेः
अगृहीतात्मनः पुत्राः पित्रोः संस्कारमर्हन्तीत्यादिस्म
न्तराच्चेति हरदत्तः एतन्निर्णयास्तनेपीत्यमेव
तथाच गर्भस्रावाक्यविहृतौ अथैकाग्नेः समाधान
मिति वाक्ये इहैवायमपरोजातवेदा वेदेभ्यो हव्यं
वहतुप्रजानन्‌ इत्यनेन मन्त्रलिंगेनाकृतविवाह॰
स्याप्यग्न्यर्जनमिच्छन्ति पुत्रस्यनित्यवदास्नायादि
त्याचार्यादित्यदर्शनः विस्तरस्त्वग्रदेवपालाद्बोध्य ः
इति श्रीसंस्कारदीपिका समाप्तम्‌ ॥ संपूर्णं

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri